**टीका**—खु स्फुटं द्रव्यं सप्तभङ्गं सम्भवति। केन ? आदेशवशेन पूर्वसूरिकथनवशेन। ते सप्त भङ्गाः के? इति चेदुच्यन्ते—'सिय अत्थि' इत्यादि। स्याच्छब्दः प्रत्येकमभिसम्बध्यते—[40]स्यादस्ति स्यान्नास्ति स्यादस्तिनास्ति स्यादवक्तव्यम्। पुनरपि तृतीयं स्यादस्त्यवक्तव्यम् स्यान्नास्त्यवक्तव्यम् स्यादस्तिनास्त्यवक्तव्यम्। तद्यथा—

**एकस्मिन्नविरोधेन प्रमाणनयवाक्यतः।**
**सदादिकल्पना या च सप्तभङ्गीति सा मता ॥३॥**

**टीका**—स्यादस्ति—स्यात्कथञ्चित् विवक्षितप्रकारेण स्वद्रव्यादिचतुष्टयापेक्षया द्रव्यमस्तीत्यर्थः। [स्यान्नास्ति-स्यात्कथञ्चित् विवक्षितप्रकारेण परद्रव्यादि-चतुष्टयापेक्षया द्रव्यं नास्तीत्यर्थः] स्यादस्तिनास्ति-स्यात् कथञ्चित् विवक्षितप्रकारेण क्रमेण स्वपरद्रव्यादिचतुष्टयापेक्षया द्रव्यमस्ति-नास्तीत्यर्थः। स्यादवक्तव्यम्-स्यात् कथञ्चित् विवक्षितप्रकारेण युगपद्वक्तुमशक्यत्वात् 'क्रमप्रवर्त्तिनी

---

४०.ब प्रतौ इतोऽग्रे टीकापाठो भिन्नप्रकारः। तद्यथा—स्यात् कथञ्चित् स्वद्रव्यादिचतुष्टयापेक्षया द्रव्यमस्ति १। स्यात् कथञ्चित् परद्रव्यादिचतुष्टयापेक्षया द्रव्यं नास्ति २। स्यात् कथञ्चित् स्व-परद्रव्यादिचतुष्टयापेक्षया द्रव्यमस्तिनास्ति ३। स्यात् कथञ्चित् युगपत्स्वपरद्रव्यादिचतुष्टयापेक्षया वक्तुमशक्यत्वाद्द्रव्यमवक्तव्यम् ४। स्यात् कथञ्चित् स्वद्रव्यादिचतुष्टयापेक्षया युगपत् स्वपरद्रव्यादिचतुष्टयापेक्षया च वक्तुमशक्यत्वाद्द्रव्यमस्त्यवक्तव्यम् ५। स्यात् कथञ्चित् परद्रव्यादिचतुष्टयापेक्षया युगपत् स्वपरद्रव्यादिचतुष्टयापेक्षया च वक्तुमशक्यत्वाद् द्रव्यं नास्त्यवक्तव्यम् ६। स्यात् कथञ्चित्स्वपरद्रव्यादिचतुष्टयापेक्षया युगपत् स्वपरद्रव्यादिचतुष्टयापेक्षया च वक्तुम-शक्यत्वाद् द्रव्यमस्तिनास्त्यवक्तव्यम् ७।

भारती' ति वचनात् युगपत् स्वपरद्रव्यादिचतुष्टयापेक्षया द्रव्यमवक्तव्यमित्यर्थः। स्यादस्त्यवक्तव्यम्-स्यात् कथञ्चित् विवक्षितप्रकारेण स्वद्रव्यादिचतुष्टयापेक्षया युगपत् स्वपरद्रव्यादिचतुष्टयापेक्षया च द्रव्यमस्त्य-वक्तव्यमित्यर्थः। स्यान्नास्त्यवक्तव्यम्-स्यात् कथञ्चित् विवक्षितप्रकारेण परद्रव्यादि-चतुष्टयापेक्षया युगपत् स्वपरद्रव्यादिचतुष्टयापेक्षया च द्रव्यं नास्त्यवक्तव्यमित्यर्थः। स्यादस्तिनास्त्य-वक्तव्यम्-स्यात् कथञ्चित् विवक्षितप्रकारेण क्रमेण स्वपरद्रव्यादिचतुष्टयापेक्षया युगपत् स्वपरद्रव्यादि-चतुष्टयापेक्षया च द्रव्यमस्तिनास्त्यवक्तव्यमित्यर्थः। × एकमपि द्रव्यं कथं सप्तभङ्गात्मकं भवतीति प्रश्ने परिहारमाह-यथैकोऽपि देवदत्तो गौण-मुख्यविवक्षावशेन बहुप्रकारो भवति। कथमिति चेत् पुत्रापेक्षया पिता भण्यते, सोऽपि स्वकीयपित्रपेक्षया पुत्रो भण्यते, मातुलापेक्षया भागिनेयो भण्यते, स एव भागिनेयापेक्षया मातुलो भण्यते, भार्यापेक्षया भर्त्ता भण्यते, भगिन्यपेक्षया भ्राता भण्यते, विपक्षापेक्षया शत्रुर्भण्यते, इष्टापेक्षया मित्रं भण्यते इत्यादि। तथैकमपि द्रव्यं गौणमुख्यविवक्षावशेन सप्तभङ्गात्मकं भवतीति नास्ति दोष इति[४१]॥१६॥

**अथ तदावरणानां पाठक्रमं प्रतीतिपूर्वकमाह—**

**अब्भरिहिदादु पुव्वं णाणं तत्तो दु दंसणं होदि।**
**सम्मत्तमदो विरियं जीवाजीवगदमिदि चरिमे[४२] ॥१७॥**

**ग्रन्थकार ने 'अत्थं देक्खिय जाणदि' इस गाथा में जिस क्रम से जीव के गुणों का निर्देश किया है, तदनुसार पहले दर्शनावरण का और पीछे ज्ञानावरणकर्म का निर्देश करना चाहिए था, परन्तु वैसा न करके पहले ज्ञानावरणकर्म का जो निर्देश आगम-परम्परा में पाया जाता है, सो क्यों ? इस शंका का समाधान ग्रन्थकार युक्तिपूर्वक करते हैं—**जीव के सर्व गुणों में ज्ञानगुण प्रधान है, इसलिए उसके आवरण करने वाले कर्म का सबसे पहले नाम-निर्देश किया गया है। उसके पश्चात् दर्शन और सम्यक्त्वगुण के आवरण करने या घातने वाले कर्मों का निर्देश किया गया है। वीर्यगुण शक्तिरूप है और यह शक्तिरूप गुण जीव और अजीव दोनों में पाया जाता है, इसलिए उसके घात करने वाले अन्तराय कर्म का सब कर्मों के अन्त में निर्देश किया गया है।

**टीका—**अभ्यर्हितात् पूज्यात् पूर्वं ज्ञानं भणितम्, [४३]यच्चार्च्चितं द्वयोः, इति सूत्रसद्भावात्। ततो हि दर्शनं भवति। अतः सम्यक्त्वं भवति। वीर्यं तु जीवाजीवेषु प्राप्तमिति हेतोः चरिमे अन्ते पठितम् ॥१७॥

**घादीवि अघादिं वा णिस्सेसं घादणे असक्कादो।**
**णामतियणिमित्तादो विग्घं पठिदं[४४] अघादिचरिमम्हि[४५]॥१८॥**

---

४१. सन्दर्भोऽयं पञ्चास्तिकायजयसेनीयतात्पर्यवृत्या सह शब्दशः समानः। ब प्रतौ चिह्नान्तर्गतपाठो नास्ति। ४२. गोम्मटसार कर्मकाण्ड १६। ४३. ब यच्चावितं। ४४. ब पडिदं। ४५. गोम्मटसार कर्मकाण्ड १७।

**यहाँ पर पुनः शंका उत्पन्न होती है कि अन्तराय तो घातियाकर्म है उसका अघातिया कर्मों के अन्त में क्यों नाम-निर्देश किया गया है ? ग्रन्थकार इसका समाधान करते हुए कहते हैं—**यद्यपि अन्तराय घातिया कर्म है तथापि अघातिया कर्मों के समान वह जीव के वीर्यगुण को सम्पूर्ण रूप से घात करने में समर्थ नहीं तथा नाम, गोत्र और वेदनीय इन तीन कर्मों के निमित्त से ही वह अपना कार्य करता है, इसलिए उसे अघातिया कर्मों के अन्त में कहा गया है।

**टीका—**अन्तरायकर्म घात्यपि अघातिवद् ज्ञातव्यम्। कुतः? निःशेषजीवगुणघातने अशक्यत्वात्, नामगोत्रवेदनीयनिमित्तत्वाच्च। नामगोत्रवेदनीयान्येव निमित्तं कारणं यस्यान्तरायस्य तत्तथोक्तम्। तस्मादघातिनां चरमे प्रान्ते पठितं पतितं वा। आयुर्नामगोत्रसंज्ञाघातिनां प्रान्ते कथितम्। अथवा घातिनां चरमे पठितम् ॥१८॥

**आउबलेण अवट्ठिदि भवस्स इदि णाममाउपुव्वं तु।**
**भवमस्सिय णीचुच्चं इदि गोदं णामपुव्वं तु[४६] ॥१९॥**

**अब ग्रन्थकार शेष कर्मों के क्रम की सार्थकता बतलाते हैं—**आयुकर्म के बल से जीव का विवक्षित भव या चतुर्गतिरूप संसार में अवस्थान होता है, इसलिए आयुकर्म के निर्देश के पश्चात् नामकर्म का निर्देश किया गया है तथा शरीर रूप भव का आश्रय लेकर ही नीच और ऊँचपने का व्यवहार होता है, इसलिए नामकर्म के पश्चात् गोत्रकर्म का निर्देश किया गया है।

**टीका—**तु पुनः आयुर्बलाधानेना[४७]वस्थितिः। कस्य ? नामकर्मकार्यगतिलक्षणभवस्य। इति हेतोः नामकर्म आयुःकर्मपूर्वकं भवति। आयुःकर्म पूर्वमस्येति नामकर्मणः। तत्तु पुनः गतिलक्षणभवमाश्रित्य नीचत्वमुच्चत्वं चेति हेतोः गोत्रकर्म नामकर्मपूर्वकं कथितम्। नामकर्म पूर्वं यस्य गोत्रस्य तत् ॥१९॥

**घादिं व वेयणीयं मोहस्स बलेण घाददे जीवं।**
**इदि घादीणं मज्झे मोहस्सादिम्हि पठिदं[४८] तु[४९] ॥२०॥**

**यहाँ पर शंका उत्पन्न होती है कि वेदनीयकर्म तो अघातिया है, फिर उसका पाठ घातिया कर्मों के बीच में क्यों किया गया है ? इसका ग्रन्थकार समाधान करते हैं—**यद्यपि वेदनीयकर्म अघातिया है तथापि वह मोहनीयकर्म के बल से घातिया कर्म के समान ही जीव का घात करता है, इसलिए घातिया कर्मों के मध्य में और मोहनीयकर्म के आदि में उसका नाम-निर्देश किया गया है।

**भावार्थ—**जब तक जीव के मोहकर्म का सद्भाव रहता है, तब तक ही वेदनीयकर्म जीव को सुख-दुःख का अनुभव कराकर उसे अपने ज्ञानादिगुणों में उपयुक्त नहीं रहने देता, प्रत्युत पर पदार्थों में सुख-दुःख की कल्पना उत्पन्न कर उन्हें सुखी या दुःखी बनाता रहता है इस कारण उसका नाम-

४६. गोम्मटसार कर्मकाण्ड १८। ४७. ब बलाधारेण। ४८. ब पडिदं। ४९. गोम्मटसार कर्मकाण्ड १९।

निर्देश मोहकर्म के पूर्व घातिया कर्मों के बीच में किया गया है।

**टीका**—वेदनीयं कर्म घातिकर्मवत् मोहनीयविशेषरत्यरत्युदयबलेनैव जीवं घातयति, सुखदु:खरूप-सातासातनिमित्तेन्द्रियविषयानुभवनेन हन्तीति हेतो: घातिकर्मणां मध्ये मोहनीयस्यादौ वेदनीयं पठितम् ॥२०॥

**णाणस्स दंसणस्स य आवरणं वेयणीय मोहणियं।**
**आउग णामं गोदंतरायमिदि पठिदमिदि सिद्धं[५०] ॥२१॥**

**इस प्रकार से कर्मों का जो पाठक्रम सिद्ध हुआ उसका ग्रन्थकार उपसंहार करते हैं**—ज्ञानावरण, दर्शनावरण, वेदनीय, मोहनीय, आयु, नाम, गोत्र और अन्तराय इस प्रकार से आगम में जो कर्मों का पाठ का क्रम है वही युक्ति-पूर्वक सिद्ध होता है।

**टीका**—ज्ञानावरणीयं दर्शनावरणीयं वेदनीयं मोहनीयं आयु: नाम गोत्रं अन्तराय: इति पूर्वोक्तपाठक्रम एवं सिद्ध:। तेषां निरुक्ति: कथ्यते-ज्ञानमावृणोतीति ज्ञानावरणीयम्। तस्य का प्रकृति:? ज्ञानप्रच्छादनता। किंवत् ? देवतामुखवस्त्रवत्। दर्शनमावृणोतीति दर्शनावरणीयम्। तस्य का प्रकृति: ? दर्शनप्रच्छादनता। किं वत् ? राजद्वारप्रतिहारवत्। राजद्वारे प्रतिनियुक्तप्रतिहारवत्। वेदयतीति वेदनीयम्। तस्य का प्रकृति: ? सुखदु:खोत्पादनता। किंवत् ? मधुलिप्तासिधारावत्। मोहयतीति मोहनीयम्। तस्य का प्रकृति: ? मोहोत्पादनता। किंवत् ? मद्यधत्तूरमदनकोद्रववत्। भवधारणाय एति गच्छतीत्यायु:। तस्य का प्रकृति: ? भवधारणता। किंवत् ? शृङ्खलाहडिवत्। नाना मिनोतीति नाम। तस्य का प्रकृति:? नर-नारकादिनानाविधकरणता। किंवत् ? चित्रकारकवत्। उच्चं नीचं गमयतीति गोत्रम्। तस्य का प्रकृति:? उच्चत्वनीचत्वप्रापकता। किंवत् ? कुम्भकारवत्। दातृ-पात्रयोरन्तरमेतीत्यन्तराय:। तस्य का प्रकृति: ? विघ्नकरणता। किंवत् ? भाण्डागारिकवत् ॥२१॥

**जीवपएसेक्केक्के कम्मपएसा हु अंतपरिहीणा।**
**होंति घणणिविडभूओ संबंधो होइ णायव्वो[५१] ॥२२॥**

**अब ग्रन्थकार जीव के प्रदेशों के साथ कर्म के प्रदेशों के सम्बन्ध होने का निरूपण कहते हैं**—जीव के एक-एक प्रदेश के ऊपर कर्मों के अन्त-परिहीन अर्थात् अनन्त प्रदेश अत्यन्त सघन प्रगाढ़ रूप से अवस्थित होकर सम्बन्ध को प्राप्त हो रहे हैं, ऐसा जानना चाहिए।

**टीका**—जीवराशिरनन्त:। प्रत्येकमेकैकस्य जीवस्यासङ्ख्याता: प्रदेशा:। आत्मन एकैकस्मिन् प्रदेशे कर्मप्रदेशा: हु स्फुटं अन्तपरिहीना इति अनन्ता भवन्ति। एतेषां आत्म-कर्मप्रदेशानां सम्यक् बन्धो भवति सम्बन्ध:। किंलक्षणो ज्ञातव्य: ? घननिबिडभूत:-घनवत् लोहमुद्‌गरवत् निबिडभूत: दृढतर इत्यर्थ: ॥२२॥

---

५०. गोम्मटसार कर्मकाण्ड २०। ५१. भावसं० ३२५।

**अत्थि अणाईभूओ बंधो जीवस्स विविहकम्मेण[५२]।**
**तस्सोदएण जायइ भावो पुण राय-दोसमओ[५३] ॥२३॥**

**अब ग्रन्थकार जीव और कर्म के अनादिकालीन सम्बन्ध का निरूपण करते हैं—** इस जीव का नाना प्रकार के कर्मों के साथ अनादिकालीन सम्बन्ध है। पुनः उन कर्मों के उदय से जीव के राग-द्वेषमय भाव उत्पन्न होता है।

**टीका—** जीवस्य विविधकर्मणा सह अनादिभूतो बन्धोऽस्ति। तस्य द्रव्यकर्मबन्धस्योदयेन जीवस्य पुनः रागद्वेषमयः भावः परिणामः भावकर्म इति यावत् जायते उत्पद्यते ॥२३॥

**भावेण तेण पुणरवि अण्णे बहुपुग्गला हु लग्गंति।**
**जह तुप्पियगत्तस्स य णिविडा रेणुव्व लग्गंति[५४] ॥२४॥**

पुनः उस राग-द्वेषमय भाव के निमित्त से बहुत से अन्य कर्मपुद्गल-परमाणु जीव के साथ सम्बन्ध को प्राप्त होते हैं। जैसे कि घृत से लिप्त शरीर के साथ धूलि-कण अति सघनता के साथ चिपक जाते हैं।

**टीका—** पुनरपि तेन रागद्वेषमयेन भावेन अन्ये बहवः कर्मपुद्गलाः आत्मनः लगन्ति बन्धं प्राप्नुवन्ति। यथा घृतविलिप्तगात्रस्य निविडा रेणवो लगन्ति, [५५]तथा रागद्वेषक्रोधादिपरिणाम-स्निग्धावलिप्तात्मनः निविडकर्मरजसो लगन्तीत्यर्थः ॥२४॥

**एक्कसमएण बद्धं कम्मं जीवेण सत्तभेएहिं।**
**परिणमइ आउकम्मं बंधं भूयाउ [भुत्ताउ] सेसेण[५६] ॥२५॥**

**अब ग्रन्थकार एक समय में बँधनेवाले कर्मों के विभाग का क्रम बतलाते हैं—** जीव के द्वारा एक समय में बाँधा गया कर्म आयुकर्म के बिना शेष सात कर्मों के स्वरूप से परिणमित होता है, किन्तु जो आयुकर्म है, वह भुज्यमान आयु के (त्रिभाग के) शेष रहने पर बन्ध को प्राप्त होता है।

**भावार्थ—** जीव के राग-द्वेष रूप भावों का निमित्त पाकर प्रति समय जो अनन्त कर्म-परमाणु आत्मा के साथ सम्बन्ध को प्राप्त होते हैं, वे प्रति समय ही आयुकर्म के बिना शेष सात कर्मों के रूप में परिणत होते रहते हैं, किन्तु आयुकर्म का बन्ध प्रति समय नहीं होता, किन्तु जो आयुकर्म भोगा जा रहा है, उसके दो भाग भोग लिये जाने पर तथा तीसरा भाग शेष रहने पर नवीन आयु का बन्ध होगा। यदि इस प्रथम त्रिभाग के शेष रहने पर परभव-सम्बन्धी आयु का बन्ध किसी कारण से नहीं हो सके, तो शेष जो आयु बची है, उसके भी दो भाग भोग लेने और एक भाग शेष रहने पर नवीन आयु का बन्ध होगा। यही नियम आगे भी जानना चाहिए। जैसे यदि किसी जीव की आयु ८१ वर्ष

५२. क कम्मेहिं। ५३. भावसं० ३२६। ५४. भावसं० ३२७। ५५. ब प्रतौ चिह्नान्तर्गतपाठो नास्ति। ५६. भावसं० ३२८।

की हो, तो उसके ५४ वर्ष व्यतीत होने पर एक अन्तर्मुहूर्त काल तक नवीन आयु बन्ध का अवसर प्राप्त होगा। यदि किसी कारणवश उस समय आयु-बन्ध न हो, तो शेष जो २७ वर्ष बची है, उनमें से दो भाग बीतने और एक भाग के शेष रहने पर अर्थात् ७२ वर्ष की आयु में आयु-बन्ध का अवसर प्राप्त होता है। इसके भी खाली जाने पर ८० वर्ष में तीसरी बार नवीन आयु के बन्ध का अवसर प्राप्त होता है। इसी प्रकार आगे भी जानना। इस प्रकार भुज्यमान आयु के त्रिभाग शेष रहने पर आठ अवसर नवीन आयुबन्ध के प्राप्त होते हैं। यदि इन सभी त्रिभागों में नवीन आयु का बन्ध न हो सके, तो मरण से कुछ काल पूर्व नियम से नवीन आयु का बन्ध हो जायेगा। यहाँ इतना विशेष ज्ञातव्य है कि किसी जीव के नवीन आयु का बन्ध एक ही त्रिभाग में होता है, किसी के दो त्रिभागों में होता है, इस प्रकार अधिक से अधिक आठ बार तक जीव विवक्षित एक ही आयु का बन्ध कर सकता है।

**टीका**—जीवेन एकसमयेन बद्धं यत्कर्म तत्कर्म आयुष्कर्म विना ज्ञानावरण-दर्शनावरण-वेदनीय-मोहनीय-नामगोत्रन्तरायसप्तभेदैः परिणमति बन्धं प्राप्नोति। च पुनः यदायुः कर्म तद् भुक्तायुःशेषेण भुक्तायुस्तृतीयभागेन [५७]त्रिभागानुक्रमेणबन्धं प्राप्नोति ॥२५॥

**सो बंधो चउभेओ णायव्वो होदि सुत्तणिद्दिट्ठो।**
**पयडिट्ठिदि-अणुभाग-पएसबंधो पुरा कहियो[५८]॥२६॥**

**अब ग्रन्थकार बन्ध के भेदों का निरूपण करते हैं**—जीव के एक समय में जो कर्मबन्ध होता है वह प्रकृति, स्थिति, अनुभाग और प्रदेश बन्ध के रूप में आगमसूत्र में चार प्रकार का पुरातन आचार्यों द्वारा निर्देश किया गया है, ऐसा जानना चाहिए।

**विशेषार्थ**—प्रतिसमय बँधने वाले कर्म परमाणुओं के भीतर ज्ञान दर्शन आदि आत्मगुणों को आवरणादि करने का जो स्वभाव पड़ता है, उसे प्रकृतिबन्ध कहते हैं। वे बँधे हुए कर्म-परमाणु जितने समय तक आत्मा के साथ रहेंगे, उस काल की मर्यादा को स्थितिबन्ध कहते हैं। उन कर्म-परमाणुओं में जो सुख-दुःखादिरूप फल देने की शक्ति होती है, उसे अनुभागबन्ध कहते हैं और आने वाले कर्म-परमाणुओं का जो पृथक्-पृथक् कर्मों में विभाजन होकर आत्मा के साथ सम्बन्ध होता है, उसे प्रदेशबन्ध कहते हैं।

**टीका**—स पूर्वोक्तकर्मबन्धश्चतुर्भेदो ज्ञातव्यो भवति। स कथम्भूतः ? जिनागमे कथितः। ते चत्वारो भेदाः के ? प्रकृतिस्थित्यनुभागप्रदेशाः। बन्धस्य अयं भेदः पुरा पूर्वोक्तगाथासु कथितः। उक्तं हि—

---

५७. ब त्रिभंग्यनुक्रमेण। ५८. भावसं० ३२९।

प्रकृतिः परिणामः स्यात् स्थितिः कालावधारणम्।
अनुभागो रसो ज्ञेयः प्रदेशः प्रचयात्मकः[५९]॥४॥

पूर्वोक्तज्ञानावरणादिकर्मणां क्रमेण दृष्टान्तमाह–

**पडपडिहारसिमज्जा - हडि - चित्त - कुलाल - भंडयारीणं।**
**जह एदेसिं भावा तहविह कम्मा मुणेयव्वा[६०] ॥२७॥**

**अब दृष्टान्तपूर्वक आठों कर्मों के स्वभाव का निरूपण करते हैं–**पट (वस्त्र), प्रतीहार (द्वारपाल), मधु-लिप्त असि, मद्य (मदिरा), हलि (पैर को फाँसकर रखने वाला काठ का यन्त्र-खोड़ा), चित्रकार, कुलाल (कुम्भकार) और भण्डारी के जैसे अपने-अपने कार्य करने के भाव होते हैं, उसी प्रकार क्रम से आठों कर्मों के कार्य जानना चाहिए।

**विशेषार्थ–**ज्ञान के आवरण करने वाले कर्म को ज्ञानावरण कहते हैं। इसका स्वभाव देव-मूर्ति के मुख पर ढके हुए वस्त्र के समान है। जिस प्रकार देवमूर्ति के मुख पर ढका हुआ वस्त्र देवता सम्बन्धी विशेष ज्ञान नहीं होने देता उसी प्रकार ज्ञानावरणकर्म ज्ञान को रोकता हुआ उसे प्रकट नहीं होने देता। आत्मा के दर्शनगुण को आवरण करने वाले कर्म को दर्शनावरण कहते हैं। इसका स्वभाव द्वारपाल के समान कहा है। जैसे द्वारपाल आगन्तुक व्यक्ति को राजद्वार पर ही रोक देता है, भीतर जाकर राजा के दर्शन नहीं करने देता उसी प्रकार यह कर्म भी आत्मा के दर्शनगुण को प्रकट नहीं होने देता। जो सुख-दुःख का वेदन या अनुभव करावे, उसे वेदनीयकर्म कहते हैं। इसका स्वभाव शहद लपेटी तलवार की धार के समान है, जिसे चखने से पहले कुछ सुख होता है परन्तु पीछे जीभ के कट जाने पर अत्यन्त दुःख होता है। इसी प्रकार साता और असाता वेदनीयकर्म जीव को सुख और दुःख का अनुभव कराते हैं। जो जीव को मोहित या अचेत करे उसे मोहनीयकर्म कहते हैं इसका स्वभाव मदिरा के समान है। जैसे मदिरा जीव को अचेत कर देती है, उसी प्रकार मोहनीयकर्म भी आत्मा को मोहित कर देता है, उसे अपने स्वरूप का कुछ भी भान नहीं रहता। जो जीव को किसी एक पर्याय-विशेष में रोके रखता है, उसे आयुकर्म कहते हैं। इसका स्वभाव लोहे की साँकल या काठ के खोड़े के समान है। जिस प्रकार साँकल या काठ का खोड़ा मनुष्य को एक ही स्थान पर रोक रखता है, दूसरे स्थान पर नहीं जाने देता; उसी प्रकार आयुकर्म भी जीव को मनुष्य-पशु आदि की पर्याय में रोके रखता है। जो शरीर और उसके अंग-उपांग आदि की रचना करे, उसे नामकर्म कहते हैं। इसका स्वभाव चित्रकार के समान है। जैसे चित्रकार अनेक प्रकार के चित्र बनाता है उसी प्रकार नामकर्म भी जीव के मनुष्य-पशु आदि अनेक रूपों का निर्माण करता है। जो जीव को ऊँच या नीच कुल में उत्पन्न करे, उसे गोत्रकर्म कहते हैं। इसका स्वभाव कुम्भकार के समान है। जैसे कुम्भकार मिट्टी के छोटे-बड़े नाना

५९. सं० पञ्चसं० ४, ३६६। ब प्रतौ नास्त्ययं श्लोकः। ६०. गोम्मटसार कर्मकाण्ड २१।

प्रकार के बर्तन बनाता है, उसी प्रकार गोत्रकर्म भी जीव को ऊँच या नीच कुल में उत्पन्न करता है। जो जीव को मनोवांछित वस्तु की प्राप्ति न होने दे, उसे अन्तराय कर्म कहते हैं। इसका स्वभाव राजभण्डारी के समान है। जैसे भण्डारी दूसरे को इच्छित द्रव्य प्राप्त करने में विघ्न करता है उसी प्रकार अन्तराय कर्म भी जीव को इच्छित वस्तु की प्राप्ति नहीं होने देता।

**टीका**—देवतामुखवस्त्र राजद्वारप्रतिनियुक्तप्रतिहार मधुलिप्तासिधारा मद्य हडि[६१] चित्रक कुलाल भाण्डागारिकाणां एतेषां भावा यथा तथैव यथासङ्ख्यं ज्ञानावरणादिकर्माणि ज्ञातव्यानि ॥२७॥

**अथाष्टकर्मणां ज्ञानावरणादीनामुत्तरप्रकृतिसंख्यार्थं तेषां च स्वभावनिर्दर्शनार्थं गाथाष्टकमाह—**

**णाणावरणं कम्मं पंचविहं होइ सुत्तणिद्दिट्ठं।**
**जह पडिमोवरि खित्तं कप्पडयं छादयं होइ[६२] ॥२८॥**

ज्ञानावरणकर्म आगमसूत्र में पाँच प्रकार का कहा गया है। जिस प्रकार प्रतिमा के ऊपर पड़ा हुआ कपड़ा प्रतिमा का आच्छादक होता है उसी प्रकार यह कर्म आत्मा के ज्ञानगुण का आच्छादन करता है।

**टीका**—ज्ञानावरणं कर्म पञ्चविधं सूत्रनिर्दिष्टं जिनागमे कथितं भवति। तत्स्वभावदृष्टान्तमाह-यथा प्रतिमोपरि क्षिप्तं कर्पटकं छादकं भवति तथा ज्ञानावरणं कर्म जीवगुणज्ञानाच्छादकं भवति ॥२८॥

**दंसण-आवरणं पुण जह पडिहारो हु णिवदुवारम्हि।**
**तं णवविहं पउत्तं फुडत्थवाईहि[६३] सुत्तम्हि[६४] ॥२९॥**

जिस प्रकार राजद्वार पर बैठा हुआ प्रतिहार (द्वारपाल) किसी को राजा के दर्शन नहीं करने देता उसी प्रकार दर्शनावरणकर्म आत्मा के दर्शन नहीं करने देता। यह कर्म स्पष्टवादी आचार्यों ने परमागमसूत्र में नौ प्रकार का कहा है।

**टीका**—पुनः दर्शनावरणं कर्म किं स्वभावम् ? यथा नृपद्वारे प्रतिहारः राजदर्शननिषेधको भवति तथा दर्शनावरणं कर्म वस्तुदर्शननिषेधकं भवति। तद्दर्शनावरणं कर्म नवप्रकारं स्फुटार्थवाग्भिर्गणधर-देवादिभिः[६५] सूत्रे सिद्धान्ते प्रोक्तम्[६६] ॥२९॥

**महुलित्तखग्गसरिसं दुविहं पुण होइ वेयणीयं तु।**
**सायासायविभिण्णं सुह-दुक्खं देइ जीवस्स[६७] ॥३०॥**

मधुलिप्त खड्ग के सदृश वेदनीयकर्म है। वह दो प्रकार का है जो सातावेदनीय कर्म है वह जीव को सुख देता है और जो असातावेदनीय कर्म है, वह जीव को दुःख देता है।

**टीका**—पुनः वेदनीयं कर्म द्विविधं भवति। कथम्भूतम्? मधुलिप्तखड्गसदृशम्। तत्सातासात-

---

६१. बा हलि। ६२. भावसं० ३३१। ६३. ब फुडत्थवागियहिं। ६४. भावसं० ३३२। ६५. ब जिनैः। ६६. ब कथितम्। ६७. भावसं० ३३४।

भेदप्राप्तं सत् जीवस्य सुख-दुःखं ददाति ॥३०॥

**मोहेइ मोहणीयं [६८]जह मयिरा अहव कोद्दवा पुरिसं।**
**तं अडवीसविभिण्णं णायव्वं जिणुवदेसेण[६९] ॥३१॥**

जिस प्रकार मदिरा अथवा मत्तौनिया कोदों पुरुष को मोहित करते हैं उसी प्रकार मोहनीयकर्म जीव को मोहित करता है। जिनेन्द्रदेव के उपदेश से उसे अट्ठाईस भेदरूप जानना चाहिए।

**टीका**—मोहनीयं कर्म आत्मानं मोहयति। यथा पुरुषं मदिरा मोहयति। अथवा कोद्रवाः पुरुषं मोहयन्ति। तन्मोहनीयं अष्टाविंशति-भेदभिन्नं जिनोपदेशेन ज्ञातव्यम् ॥३१॥

**आऊ[७०] चउप्पयारं णारय-तिरिच्छ-मणुय-सुरगइगं।**
**हडिखित्त पुरिससरिसं जीवे भवधारणसमत्थं[७१] ॥३२॥**

नारक, तिर्यंच, मनुष्य और देवायु के भेद से आयुकर्म चार प्रकार का कहा गया है। यह कर्म हडि (खोड़े) में डाले गये पुरुष के सदृश जीवों को किसी एक भव में धारण करने के लिए समर्थ है।

**टीका**—आयुःकर्म चतुःप्रकारम्-नारक-तिर्यङ्मनुष्य-सुरगतिप्राप्तं सत्। कथम्भूतम्? हडिक्षिप्त-पुरुषसदृशम्। पुनः किं लक्षणम्? जीवानां भवधारणसमर्थं भवति ॥३२॥

**चित्तपडं[७२] व विचित्तं णाणाणामे णिवत्तणं णामं।**
**तेयाणवदी गणियं गइ-जाइ-सरीर-आईयं[७३] ॥३३॥**

चित्रकार के सदृश नामकर्म जीव के नाना प्रकार के आकारों का निर्माण करता है। यह गति, जाति, शरीर आदि के भेद से तेरानवे प्रकार का कहा गया है।

**टीका**—नामकर्म गति-जाति-शरीरादिकं त्रिनवति संख्यागणितं भवति। पुनः तन्नामकर्म किम्भूतम्? चित्रपटवद् विचित्रं भवति। पुनः किम्भूतम्? नानाप्रकारनामनिष्पादकं भवति ॥३३॥

**गोदं कुलालसरिसं णीचुच्चकुले[७४]सुपायणे दच्छं।**
**घडरंजणाइकरणे कुंभायारो जहा णिउणो[७५]॥३४॥**

कुलाल (कुम्भकार) के सदृश गोत्रकर्म नीच और उच्चकुलों में उत्पादन करने में समर्थ कहा गया है। जिस प्रकार कुम्भकार घट-सिकोरा आदि बनाने में निपुण होता है उसी प्रकार यह गोत्रकर्म भी नीच और ऊँच कुलों में जीव को पैदा करने में समर्थ है।

**टीका**—गोत्रं कर्म कुलालसदृशं नीचोच्चकुलेषु समुत्पादने दक्षं समर्थं भवति। यथा कुम्भकारो [७६]घटरञ्जनादिकरणे निपुणो भवति तथा गोत्रकर्म नीचोच्चकुलेषूत्पादने समर्थं भवति ॥३४॥

---

६८. ब जिह। ६९. भावसं० ३३३। ७०. ब आउं। ७१. भावसं० ३३५। ७२. ब पडव्व। ७३. भावसं० ३३६। ७४. ज समुपायणे। ७५. भावसं० ३३७। ७६. ब घटालंजरादिकरणे।

**जह भंडयारि पुरिसो धणं णिवारेइ राइणा दिण्णं।**
**तह अंतरायपणगं णिवारयं होइ [७७]लद्धीणं[७८] ॥३५॥**

जिस प्रकार राजा के द्वारा दिये गये धन को भण्डारी देने से रोकता है उसी प्रकार पाँच प्रकार का अन्तरायकर्म दान आदि लब्धियों का निवारक कहा गया है।

**टीका**—यथा भाण्डागारिकपुरुषः राज्ञा दत्तं धनं निवारयति तथा अन्तरायपञ्चकं दानलाभ-भोगोपभोगवीर्यलब्धीनां[७९] निवारकं भवति ॥३५॥

**ज्ञानावरणादीना[८०]मुत्तरप्रकृत्युत्पत्तिक्रममाह—**

**पंच णव दोण्णि [८१]अट्ठावीसं चउरो कमेण तेणवदी।**
**ते उत्तरं सयं वा दुग पणगं उत्तरा होंति[८२] ॥३६॥**

**ज्ञानावरणादि कर्मों की उत्तर प्रकृति का कथन**—उक्त आठों कर्मों के क्रमशः पाँच, नौ, दो, अट्ठाईस, चार, तेरानवे अथवा एक सौ तीन, दो और पाँच उत्तर भेद होते हैं।

**टीका**—*ज्ञानावरणादीनां कर्मणां यथासंख्यमुत्तरभेदान् कथयन्ति सूरयःपञ्च नव द्वावष्टा-विंशतिश्चत्वारस्त्रिनवति स्त्र्युत्तरशतं वा द्वौ पंच भवन्ति। तद्यथा–ज्ञानावरणीयं दर्शनावरणीयं वेदनीयं मोहनीयमायुर्नामगोत्रमन्तरायश्चेति मूलप्रकृतयः[८३]। ज्ञानावरणस्य पञ्च प्रकृतयो भवन्ति। दर्शनावरणस्य नव प्रकृतयो भवन्ति। वेदनीयस्य द्वे प्रकृती भवतः। मोहनीयस्य अष्टाविंशतिः प्रकृतयो भवन्ति। आयुष्कर्मणश्चतस्रः प्रकृतयः सन्ति। नामकर्मणः त्रिनवतिः त्र्यधिकशतप्रकृतयो वा भवन्ति। गोत्रकर्मणः द्वे प्रकृती भवतः । अन्तरायकर्मणः पञ्च प्रकृतयो भवन्ति। अनुक्रमेण ज्ञानावरणादीनां प्रकृतिसंख्या ज्ञातव्या ॥३६॥

**तत्र ज्ञानावरणीयं पञ्चप्रकारम्–मति–श्रुतावधि–मनःपर्ययज्ञानावरणीयं केवलज्ञानावरणीयं चेति। मतिज्ञानावरणादिस्वरूपं गाथापञ्चकेनाऽऽह—**

**अहिमुहणियमियबोहणमाभिणिबोहियमणिंदि - इंदियजं।**
**बहुआदि–ओग्गहादिय–कयछत्तीसतिसयभेयं[८४] ॥३७॥**

**अब ग्रन्थकार ज्ञान के पाँच भेदों में से पहले मतिज्ञान का स्वरूप कहते हैं**—इन्द्रिय और अनिन्द्रिय (मन) की सहायता से अभिमुख और नियमित पदार्थ के जानने वाले ज्ञान को आभिनिबोधिक कहते हैं। यह प्रत्येक अवग्रह, ईहा, अवाय और धारणा के भेद से तथा बहु आदि के भेद से तीन सौ छत्तीस प्रकार का कहा गया है।

---

७७. ब ऋद्धीणं। ७८. भावसं० ३३८। ७९. ब दानादिलब्धीनां। ८०. ब ज्ञानावरणानीनामिति पाठो नास्ति। ८१. ब अट्ठावीसं। ८२. गोम्मटसार कर्मकाण्ड २२। ८३.ज प्रतौ चिह्नान्तर्गतपाठो नास्ति। ८४. पञ्चसं० १, १२१। गोम्मटसार जीवकाण्ड ३०५।

**विशेषार्थ**—स्थूल, वर्तमान योग्य क्षेत्र में अवस्थित पदार्थ को अभिमुख कहते हैं। प्रत्येक इन्द्रिय के निश्चित विषय को नियमित कहते हैं। इन दोनों प्रकार के पदार्थों का मन और इन्द्रियों की सहायता से जो ज्ञान होता है उसे आभिनिबोधिक या मतिज्ञान कहते हैं। इस प्रकार पाँच इन्द्रिय और मन की अपेक्षा उक्त ज्ञान के छह भेद होते हैं। इसमें भी प्रत्येक के अवग्रह, ईहा, अवाय और धारणा ये चार-चार भेद होते हैं। वस्तु के सामान्य ज्ञान को अवग्रह कहते हैं, जैसे कि यह मनुष्य है। इससे अधिक विशेष जानने की इच्छा को ईहा कहते हैं जैसे कि यह मनुष्य दक्षिणी है या उत्तरी। इसी के आकार-प्रकार एवं बोलचाल आदि के द्वारा निश्चय करने को अवाय कहते हैं, जैसे कि उक्त मनुष्य दक्षिणी ही है और आगे कालान्तर में इसे नहीं भूलने को धारणा कहते हैं। पुनः उनके बहु, बहुविध आदि बारह प्रकार के पदार्थों की अपेक्षा (२४×१२=२८८) दो सौ अठासी भेद हो जाते हैं। ये सब अर्थावग्रह के भेद हैं। व्यक्त पदार्थ के ज्ञान को अर्थावग्रह कहते हैं। अव्यक्त पदार्थ के जानने को व्यंजनावग्रह कहते हैं। यह मन और नेत्रइन्द्रिय के बिना शेष चार इन्द्रियों से केवल अवग्रह रूप ही होता है और बहु आदि बारह पदार्थों की अपेक्षा उसके (४×१२=४८) अड़तालीस भेद होते हैं। इन्हें उपर्युक्त दो सौ अठासी भेदों में जोड़ देने पर (२८८+४८=३३६) तीन सौ छत्तीस भेद मतिज्ञान के हो जाते हैं।

**टीका**—स्थूलवर्तमानयोग्यदेशावस्थितोऽर्थः अभिमुखः। अस्येन्द्रियस्यायमेवार्थ इत्यवधारितो नियमितः। अभिमुखश्चासौ नियमितश्च अभिमुखनियमितः। तस्यार्थस्य बोधनं ज्ञानं आभिनिबोधिकं मतिज्ञानमित्यर्थः। स्पर्शनादीन्द्रियाणां स्थूलविषयेषु ज्ञानजननशक्तित्वात् सूक्ष्मार्थेषु परमाणुषु अन्तरितार्थेषु नरकस्वर्गपटलादिषु दूरार्थेषु मेर्वादिषु ज्ञानजननशक्तिर्न सम्भवतीत्यर्थः। अनेन मतिज्ञानस्वरूपं निवेदितम्। तत्कथम्भूतम् ? अनिन्द्रियेन्द्रियजम्-अनिन्द्रियं मनः, इन्द्रियाणि स्पर्शनादीनि पञ्च। एभ्यो जातं अनिन्द्रियेन्द्रियजम्। अनेन इन्द्रिय-मनसां मतिज्ञानोत्पत्तिकारणत्वं भणितमिति मतिज्ञानं षोढा कथितम्। पुनः प्रत्येकैकस्य मतिज्ञानस्य अवग्रहादयश्चत्वारो भेदा भवन्ति। तद्यथा-मानसोऽवग्रहः १ मानसीहा २ मानसोऽवायः ३ मानसी धारणा ४ इति चत्वारः। एवं स्पर्शनेन्द्रियजाः अवग्रहादयश्चत्वारः ४। रसनजाः अवग्रहादयश्चत्वारः ४। घ्राणजाः अवग्रहादयश्चत्वारः ४। चाक्षुषाः अवग्रहादयश्चत्वारः ४। श्रोत्रजाः अवग्रहादयश्चत्वारः ४। एवं मतिज्ञानभेदाश्चतुर्विंशतिः २४ भवन्ति। बहुः १ अबहुः २ बहुविधः ३ अबहुविधः ४ क्षिप्रः ५ अक्षिप्रः ६ अनिस्सृतः ७ निस्सृतः ८ अनुक्तः ९ उक्तः १० ध्रुवः ११ अध्रुवः १२ एतैर्द्वादशभिर्गुणिताश्चतुर्विंशतिः २४ मतिज्ञानस्य भेदाः अष्टाशीत्युत्तरद्विशतं २८८ भवन्ति। एते अष्टाशीत्यधिकद्विशतभेदाः २८८ अर्थस्य स्थिरस्थूलरूपस्य पदार्थस्य भवन्ति। व्यञ्जनस्य अव्यक्तवस्तुनः एकोऽवग्रहो भवति। स तु व्यञ्जनावग्रहः बह्वादिभिर्द्वादशभिः १२ गुणितः द्वादशप्रकारो भवति। स तु द्वादशात्मकः चक्षुरनिन्द्रियाभ्यां विना स्पर्शनरसनघ्राणश्रोत्रैश्चतुर्भिः ४ गुणितोऽष्टचत्वारिंशत्

४८ भेदा भवन्ति। एवं एकत्रीकृताः षट्त्रिंशदधिकत्रिशतभेदाः ३३६ मतिज्ञानस्य भवन्ति। मतिज्ञान-मावृणोतीति [८५]आव्रियतेऽनेन वेति मतिज्ञानावरणीयम् ॥३७॥

**अथ श्रुतज्ञानस्वरूपमाह—**

**अत्थादो अत्थंतरमुवलंभं तं भणंति सुदणाणं।**
**आभिणिबोहियपुव्वं णियमेणिह [८६]सद्दजप्पमुहं[८७]॥३८॥**

**श्रुतज्ञान का स्वरूप—**आभिनिबोधिक ज्ञान के विषयभूत पदार्थ से भिन्न पदार्थ के जानने को श्रुतज्ञान कहते हैं। यह ज्ञान नियम से आभिनिबोधिक ज्ञानपूर्वक होता है। इसके अक्षरात्मक और अनक्षरात्मक अथवा शब्दजन्य और लिंगजन्य ये दो भेद हैं। इनमें शब्दजन्य और अक्षरात्मक श्रुतज्ञान मुख्य है।

**विशेषार्थ—**वर्ण, पद और वाक्य के द्वारा होने वाले ज्ञान को शब्द-जनित अक्षरात्मक श्रुतज्ञान कहते हैं और शब्द के बिना ही इन्द्रियों के संकेत आदि से उत्पन्न होने वाले ज्ञान को लिंगज या अनक्षरात्मक श्रुतज्ञान कहते हैं। ११ अंग और १४ पूर्वरूप भेद अक्षरात्मक श्रुतज्ञान के हैं।

**टीका—**अर्थात् मतिज्ञानेन निश्चितार्थात् अर्थान्तरं तत्सम्बद्धं अन्यार्थं उपलभ्यमानं ज्ञायमानं श्रुतज्ञाना-वरणवीर्यान्तरायक्षयोपशमजातं जीवस्य ज्ञानपर्यायं श्रुतज्ञानम्, इति मुनिश्वरा भणन्ति। तत्कथं भवेत् ? आभिनिबोधिकपूर्वं नियमेन आभिनिबोधिकं मतिज्ञानं पूर्वं कारणं यस्य तदाभिनिबोधिकपूर्वं मतिज्ञानावरणक्षयोपशमेन मतिज्ञानं पूर्वमुत्पद्यते। पश्चात्तद्-गृहीतार्थमवलम्ब्य तद्बलाधानेनार्थान्तरविषयं श्रुतज्ञानमुत्पद्यते। इहास्मिन् श्रुतज्ञानप्रकरणे अक्षरानक्षरात्मकयोः शब्दज-लिङ्गजयोः श्रुतज्ञानभेदयोर्मध्ये शब्दजं वर्णपदवाक्यात्मकशब्दजनितं श्रुतजातं[८८] ज्ञानं प्रमुखं प्रधानं दत्तग्रहणशास्त्राध्ययनादि सकल-व्यवहाराणां तन्मूलत्वात्। अनक्षरात्मकं तु लिङ्गजं श्रुतज्ञानमेकेन्द्रियादि-पञ्चेन्द्रियपर्यन्तेषु जीवेषु विद्यमानमपि व्यवहारानुपयोगित्वादप्रधानं भवति। श्रूयते श्रोत्रेन्द्रियेण गृह्यते इति श्रुतः शब्दः, तस्मादुत्पन्नमर्थज्ञानमिति व्युत्पत्तेरक्षरात्मकप्राधान्याश्रयणात्प्रधान [मक्षरात्मकं श्रुतज्ञानम्।] श्रुतज्ञान-मावृणोति, [८९]आव्रियतेऽनेनेति वा श्रुतज्ञानावरणीयम् ॥३८॥

**अवधिज्ञानस्वरूपमाह—**

**अवधीयदि त्ति ओही सीमाणाणेत्ति वण्णियं समये।**
**भव-गुणपच्चयविहियं जमोहिणाणेत्ति णं विंति[९०]॥३९॥**

**अवधिज्ञान का स्वरूप—**द्रव्य, क्षेत्र, काल और भाव की अपेक्षा से जिसके विषय की सीमा निश्चित है ऐसे भूत, भविष्यत् और वर्तमानकालवर्ती सीमित पदार्थों के जानने वाले ज्ञान को

---

८५. ब पाठोऽयं नास्ति। ८६. आ 'सत्थजं' इति पाठः। ८७. पञ्चसं० १, १२२। गोम्मटसार जीवकाण्ड ३१४। ८८. ब श्रुतज्ञातज्ञानं। ८९. ब पाठोऽयं नास्ति। ९०. पञ्चसं० १, १२३, गोम्मटसार जीवकाण्ड ३६९।

अवधिज्ञान कहते हैं। सीमित जानने की अपेक्षा परमागम में इसे सीमाज्ञान कहा गया है। जिनेन्द्रदेव ने इसके दो भेद कहे हैं—एक भवप्रत्यय अवधि और दूसरा गुणप्रत्यय अवधि।

**विशेषार्थ—**नारक और देवभव की अपेक्षा से अवधिज्ञानावरण कर्म का क्षयोपशम होकर जो अवधिज्ञान उत्पन्न होता है उसे भवप्रत्यय अवधिज्ञान कहते हैं। यह देव, नारकी और तीर्थंकरों के होता है। जो अवधिज्ञान सम्यग्दर्शनादि गुणों की अपेक्षा से अवधिज्ञानावरण कर्म का क्षयोपशम होकर उत्पन्न होता है, उसे गुणप्रत्यय अवधिज्ञान कहते हैं। यह मनुष्य और तिर्यंचों के होता है।

**टीका—**अवधीयते द्रव्यक्षेत्रकालभावैः परिमीयते मर्यादीक्रियत इत्यवधिः। मतिश्रुतकेवलवद् द्रव्यादिभिरपरिमितविषयत्वाभावात् यत्तृतीयं सीमाविषयं ज्ञानं समये परमागमे जिनेन कथितं तदिदमवधिज्ञानमित्यर्हदादयो ब्रुवन्ति। तत्कतिप्रकारम्? भव-गुणप्रत्ययविहितम्। भवो नारकादिपर्यायः। गुणः सम्यग्दर्शनविशुद्ध्यादिः। भवगुणौ नारकादिपर्यायसम्यग्दर्शनविशुद्ध्याद्यौ प्रत्ययौ कारणे निमित्तौ ताभ्यां विहितं उक्तभवगुणप्रत्ययविहितम्। भवप्रत्ययत्वेन गुणप्रत्ययत्वेन च अवधिज्ञानं द्विविधं कथितमित्यर्थः। भवप्रत्ययावधिज्ञानं सुराणां नारकाणां चरमभवतीर्थङ्कराणां च सम्भवति। गुणप्रत्ययम-वधिज्ञानं पर्याप्तानां नराणां संज्ञिपञ्चेन्द्रियपर्याप्ततिरश्चां च सम्भवति। तदुक्तं श्रीगोम्मटसारे—

**भवपच्चयगो सुर-णिरयाणं तित्थेवि सव्वअंगुत्थो।**
**गुणपच्चयगो णर-तिरियाणं संखादिचिण्हभवो**[९१]॥५॥

तेषां देव-नारक-तीर्थकराणां सर्वात्मप्रदेशस्थावधिज्ञानावरणवीर्यान्तरायकर्मद्वयक्षयोपशमोत्थं अवधिज्ञानं भवति। तिरश्चां पञ्चेन्द्रियसंज्ञिपर्याप्तानां नाभेरुपरि शङ्ख-पद्म-स्वस्तिकादिशुभचिह्न-प्रदेशस्थावधिज्ञानं भवति। अवधिज्ञानमावृणोत्याव्रियतेऽनेनेति वा अवधिज्ञानावरणीयम् ॥३९॥

**अथ मनःपयर्ययज्ञानस्वरूपमाह—**

**चिंतियमचिंतियं वा अद्धं चिंतियमणेयभेयगयं।**
**मणपज्जवं ति वुच्चइ जं जाणइ तं खु णरलोए**[९२]॥४०॥

**मनःपर्ययज्ञान का स्वरूप—**जो चिन्तित, अचिन्तित अथवा अर्धचिन्तित आदि अनेक भेदरूप से दूसरे के मन में स्थित पदार्थ को जाने उसे मनःपर्ययज्ञान कहते हैं। यह ज्ञान तपस्वी मनुष्यों के मनुष्यलोक में ही होता है, बाहर नहीं।

**टीका—**चिन्तितं चिन्ताविषयीकृतम्, अचिन्तितं चिन्तयिष्यमाणम्, अर्धचिन्तितं असम्पूर्णचिन्तितं वा इत्यनेकभेदगतमर्थं परमनसि स्थितं यज्ज्ञानं जानाति तत् खु स्फुटं मनःपर्ययज्ञानमित्युच्यते। तस्योत्पत्ति प्रवृत्ती नरलोके मनुष्यक्षेत्रे एव; न तु तद्बहिः तन्मनःपर्ययज्ञानं द्विविधम्-ऋजुमतिविपुलमतिभेदात्। मनःपर्ययज्ञानमावृणोत्याव्रियतेऽनेनेति वा मनःपर्ययज्ञानावरणीयम् ॥४०॥

---

९१. गोम्मटसार जीवकाण्ड ३७०। ९२. पञ्चसं० १, १२५। गोम्मटसार जीवकाण्ड ४३७।

**केवलज्ञानस्वरूपमाह—**

**संपुण्णं तु समग्गं केवलमसवत्त सव्वभावगयं।**
**लोयालोयवितिमिरं केवलणाणं मुणेयव्वं[९३]॥४१॥**

**केवलज्ञान का स्वरूप**—जो ज्ञान सम्पूर्ण, समग्र, केवल (असहाय), असपत्न (प्रतिपक्षरहित), सर्वपदार्थगत और लोक-अलोक में अन्धकाररहित होता है, उसे केवलज्ञान कहते हैं।

**विशेषार्थ**—त्रिलोक और त्रिकालवर्ती समस्त चराचर वस्तुओं के युगपत् जानने वाले ज्ञान को केवलज्ञान कहते हैं। यह सम्पूर्ण ज्ञानावरणकर्म के क्षय से उत्पन्न होता है और समस्त पदार्थों का जानने वाला है इसलिए यह सम्पूर्ण है। मोहनीय और अन्तराय कर्म के क्षय के साथ उत्पन्न होता है अतएव अप्रतिहत शक्तियुक्त होने से उसे समग्र कहते हैं। इन्द्रिय, मन, प्रकाश आदि बाहरी पदार्थों की सहायता न रखने से इसे केवल या असहाय कहते हैं। समस्त पदार्थों के जानने में उसका कोई बाधक नहीं है अतएव उसे असपत्न या प्रतिपक्षरहित कहते हैं। कोई भी ज्ञेय पदार्थ इस ज्ञान के विषय से बाहर नहीं है।

**टीका**—जीवद्रव्यस्य शक्तिगतसर्वज्ञानाविभागप्रतिच्छेदानां व्यक्तिगतत्वात्सम्पूर्णम्। मोहनीय-वीर्यान्तराय-निरवशेषक्षयात् अप्रतिहतशक्तियुक्तत्वाच्च समग्रम्। द्वितीय [९४]सहायकनिरपेक्षत्वात्केवलम्। घातिचतुष्टय-प्रक्षयादसपत्नम्। क्रमकरणव्यवधानरहितत्वेन सकलपदार्थगतत्वात्सर्वभावगतम्। लोकालोकयोर्विगततिमिरं प्रकाशकमेवम्भूतं इदं केवलज्ञानं मन्तव्यं ज्ञातव्यम्। केवलज्ञान-मावृणोत्याव्रियतेऽनेनेति वा केवलज्ञानावरणीयम् ॥४१॥

**ज्ञानावरणस्य पञ्चप्रकृतिनामान्याह—**

**मदि - सुद - ओही - मणपज्जव - केवलणाण - आवरणमेवं।**
**पंचवियप्पं णाणावरणीयं जाण [९५]जिणभणियं ॥४२॥**

उपर्युक्त मति, श्रुत, अवधि, मनःपर्यय और केवलज्ञान के आवरण करने से ज्ञानावरणीय कर्म पाँच विकल्परूप जिनभगवान् ने कहा है, ऐसा हे शिष्य! तू जान।

**टीका**—मतिज्ञानावरणं श्रुतज्ञानावरणं अवधिज्ञानावरणं मनःपर्ययज्ञानावरणं केवलज्ञानावरणं एवममुना प्रकारेण पञ्चविकल्पं पञ्चप्रकारं ज्ञानावरणीयं जिनैर्भणितं हे शिष्य! त्वं जानीहि ॥४२॥

**अथ दर्शनस्वरूपमाह**

**जं सामण्णं गहणं भावाणं णेव कट्टुमायारं।**
**अविसेसिदूण अट्ठे दंसणमिदि भण्णए समये[९६]॥४३॥**

---

९३. पञ्चसं० १, १२६। गोम्मटसार जीवकाण्ड ४५९। ९४. ब इन्द्रिय। ९५. त जाणिदं वोहु। ९६. पञ्चसं० १, १३८। गोम्मटसार जीवकाण्ड ४८१।

**अब ग्रन्थकार दर्शन का स्वरूप कहते हैं**—पदार्थों के आकार रूप-विशेष अंश का ग्रहण न करके जो केवल सामान्य अंश का निर्विकल्परूप से ग्रहण होता है, उसे परमागम में दर्शन कहते हैं।

**विशेषार्थ**—प्रत्येक पदार्थ में सामान्य और विशेष रूप दो धर्म रहते हैं उनमें से केवल सामान्य धर्म की अपेक्षा जो स्व-पर पदार्थों की सत्ता का प्रतिभास होता है, उसे दर्शन कहते हैं। इसका विषय वचनों के अगोचर है इसलिए इसे निर्विकल्प कहा गया है। परमागम में इसके चार भेद कहे गये हैं—१. चक्षुदर्शन, २. अचक्षुदर्शन, ३. अवधिदर्शन और ४. केवलदर्शन।

**टीका**—भावानां पदार्थानां सामान्य[९७] विशेषात्मकबाह्यवस्तूनां[९८] आकारं भेदग्रहणं अकृत्वा यत्सामान्यग्रहणं स्वरूपमात्रावभासनं तद्दर्शनमिति परमागमे भण्यते। वस्तुस्वरूपमात्रग्रहणं कथम् ? अर्थान् बाह्यपदार्थान् अविशेष्य जातिक्रियागुणप्रकारैरविकल्प्य [९९]स्वरूपसत्तावभासनं [१००]दर्शनमित्यर्थः। दर्शनमावृणोत्या-व्रियतेऽनेनेति वा दर्शनावरणीयम्[१०१]॥४३॥

**चक्षुरचक्षुर्दर्शनद्वयस्वरूपमाह—**

**चक्खूण जं पयासइ दीसइ[१०२] तं चक्खुदंसणं विंति।**
**सेसिंदियप्पयासो णायव्वो सो अचक्खु त्ति[१०३]॥४४॥**

**अब ग्रन्थकार क्रमशः उनका स्वरूप कहते हुए पहले चक्षुदर्शन और अचक्षुदर्शन का स्वरूप निरूपण करते हैं**—चक्षु इन्द्रिय के द्वारा जो पदार्थ का सामान्य प्रकाश होता है या वस्तु का सामान्य रूप दिखाई देता है, उसे चक्षुदर्शन कहते हैं। चक्षुरिन्द्रिय के सिवाय शेष इन्द्रियों और मन के द्वारा होने वाले अपने-अपने विषयभूत सामान्य प्रकाश या प्रतिभास को अचक्षुदर्शन जानना चाहिए।

**टीका**—चक्षुषोः नयनयोः सम्बन्धि यद्रूपादि वस्तुसामान्यग्रहणं प्रकाशते पश्यति वा तत् नेत्रसम्बन्धिवस्तु दृश्यते जीवेन अनेनेति कृत्वा चक्षुर्विषयप्रकाशनमेव [१०४]तच्चक्षुर्दर्शनमिति जिना ब्रुवन्ति कथयन्ति। शेषेन्द्रियाणां स्पर्शनरसनघ्राणश्रोत्राणां सम्बन्धिवस्तुनो योऽसौ प्रकाशः दर्शनं स ज्ञातव्योऽचक्षुर्दर्शनमिति। चक्षुर्दर्शनमावृणोत्याव्रियतेऽनेनेति वा चक्षुर्दर्शनावरणीयम्। अचक्षुर्दर्शन-मावृणोत्याव्रियतेऽनेनेति वा अचक्षुर्दर्शनावरणीयम् ॥४४॥

**अथावधिदर्शनस्वरूपमाह—**

**परमाणुआदिआइं[१०५] अंतिमखंधं ति मुत्तिदव्वाइं।**
**तं ओहिदंसणं पुण जं पस्सइ ताइं पच्चक्खं[१०६]॥४५॥**

---

९७. ब सदृशपरिणामः सामान्यं विसदृशपरिणामो विशेषः। ९८. ब पदार्थानाम्। ९९. ब स्वपरसत्ता। १००. ब पश्यति दृश्यतेऽनेन दर्शनमात्रं वा दर्शनम्। १०१. ब पाठोऽयं नास्ति। १०२. त दिस्सइ। १०३. पञ्चसं० १, १३९। गोम्मटसार जीवकाण्ड ४८३। १०४. ब यच्चक्षुषा दृश्यते तच्चक्षुर्दर्शनम्। १०५. ब-'दव्वं' इति पाठः। १०६. पञ्चसं० १, १४०। गोम्मटसार जीवकाण्ड ४८४।

**अवधिदर्शन का स्वरूप**—अवधिज्ञान होने के पूर्व उसके विषयभूत परमाणु से लेकर महास्कन्धपर्यन्त मूर्तद्रव्य को जो सामान्यरूप से देखता है, उसे अवधिदर्शन कहते हैं। इस अवधिदर्शन के अनन्तर अवधिज्ञान उत्पन्न होता है, जो अपने विषयभूत परमाणु आदि को स्पष्टरूप से प्रत्यक्ष जानता है।

**टीका**—परमाणोरारभ्य महास्कन्धपर्यन्तं मूर्तिद्रव्याणि, तानि यद्दर्शनं प्रत्यक्षं पश्यति; तत्पुनः अवधिदर्शनं भवति। अवधिदर्शनमावृणोत्याव्रियतेऽनेनेति वा अवधिदर्शनावरणीयम् ॥४५॥

**केवलदर्शनस्वरूपमाह—**

**बहुविह-बहुप्पयारा उज्जोवा परिमियम्मि खेत्तम्मि।**
**लोयालोयवितिमिरो जो केवलदंसणुज्जोवो[१०७]॥४६॥**

**केवलदर्शन का स्वरूप**—तीव्र, मन्द, मध्यम आदि अनेक अवस्थाओं की अपेक्षा तथा चन्द्र-सूर्य आदि पदार्थों की अपेक्षा अनेक प्रकार के प्रकाश लोक के परिमित क्षेत्र में ही रहते हैं, किन्तु जो केवलदर्शन रूप उद्योत (प्रकाश) है वह लोक और अलोक को अन्धकाररहित स्पष्ट रूप से प्रकाशित करता है।

**टीका**—बहुविधाः तीव्रमन्दमध्यमादिभेदेनानेकविधाः बहुप्रकाराश्चोद्योताः चन्द्रसूर्यरत्नादि-भेदेनानेकप्रकारा उद्योताः प्रकाशविशेषाः लोके परिमितक्षेत्रे एव प्रकाशन्ते। यः केवलदर्शनाख्य उद्योतः स लोकालोकयोः सर्वसामान्याकारे वितिमिरः करणक्रमव्यवधानरहितत्वेन सदाऽवभासमानः स केवलदर्शनाख्य उद्योतो भवति। केवलदर्शनमावृणोत्याव्रियतेऽनेनेति वा केवलदर्शनावरणीयम् ॥४६॥



**दर्शनावरणप्रकृतिनामनवकमाह—**

**चक्खु - अचक्खू - ओही - केवलआलोयणाणमावरणं।**
**[१०८]एत्तो पभणिस्साणो पण णिद्दा दंसणावरणं॥४७॥**

**दर्शनावरण कर्म के भेद**—उक्त चक्षु, अचक्षु, अवधि और केवलदर्शन के आवरण करने वाले कर्म को दर्शनावरण कहते हैं। इस कर्म के नौ भेद हैं जिनमें से चार भेदों का स्वरूप कह दिया। अब पाँच निद्राओं का स्वरूप आगे कहते हैं।

**टीका**—चक्षुर्दर्शनावरणं अचक्षुर्दर्शनावरणं अवधिदर्शनावरणं केवलदर्शनावरणम् । अतः परं पञ्चप्रकारं निद्रादर्शनावरणं वयं नेमिचन्द्राचार्याः[१०९] प्रभणिष्यामः ॥४७॥

**पञ्चधा निद्रा का इति चेदाह—**

**अह थीणगिद्धि णिद्दाणिद्दा य तहेव पयलपयला य।**
**णिद्दा पयला एवं णवभेयं दंसणावरणं॥४८॥**

---

१०७. पञ्चसं० १, १४१। गोम्मटसार जीवकाण्ड ४८५। १०८. ज ब तत्तो। १०९. ब नास्त्ययं पाठः।

**पाँच प्रकार की निद्रा का कथन**—चक्षुदर्शनावरण आदि चार भेदों के साथ स्त्यानगृद्धि, निद्रानिद्रा, प्रचलाप्रचला तथा निद्रा और प्रचला इन पाँच निद्राओं के मिला देने पर दर्शनावरणकर्म के नौ भेद हो जाते हैं।

**टीका**—अथेत्यनन्तरं स्त्यानगृद्धिः निद्रानिद्रा च तथैव प्रचलाप्रचला निद्रा प्रचला एवं समुदितं दर्शनावरणं नवभेदं भवति। स्त्यानगृद्ध्यादिनिद्राणां लक्षणमाह–[स्त्याने] स्वप्ने यया वीर्यविशेषप्रादुर्भावः सा स्त्यानगृद्धिः। अथवा स्त्याने स्वप्ने गृद्ध्यते दीप्यते यदुदयात् आर्त्तं रौद्रं बहु च कर्मकरणं सा स्त्यानगृद्धिः। इति स्त्यानगृद्धिदर्शनावरणम्। यदुदयात् निद्राया उपरि उपरि प्रवृत्तिस्तन्निद्रानिद्रादर्शनावरणम्। यदुदयात् आत्मा पुनः पुनः प्रचलयति तत्प्रचलाप्रचला दर्शनावरणम्। शोकश्रममदादिप्रभवा उपविष्टस्य पुंसः नेत्रगात्र-विक्रियासूचिका [प्रचला] सैव पुनः पुनरावर्तमाना प्रचलाप्रचलेत्यर्थः। यदुदयात् मदखेदक्लम-विनाशार्थं शयनं तन्निद्रादर्शनावरणम्। यदुदयात् या क्रिया आत्मानं प्रचलयति तत्प्रचलादर्शनावरणमिति[११०]॥४८॥

**पुनः स्त्यानगृद्ध्यादिलक्षणं गाथात्रयेणाऽऽह—**

**थीणुदएणुट्ठविदे सोवदि कम्मं करेदि [१११]जंपदि वा।**
**णिद्दाणिद्दुदएण य ण दिट्ठिमुग्घाडिदुं सक्को[११२]॥४९॥**

**स्त्यानगृद्धि और निद्रानिद्रा का स्वरूप**—स्त्यानगृद्धिकर्म के उदय से जीव उठाये जाने पर भी सोता ही रहता है, सोते हुए ही नींद में अनेक कार्य करता है और बोलता भी रहता है पर संज्ञाहीन रहता है। निद्रानिद्रा कर्म के उदय से जगाये जाने पर भी आँखें नहीं उघाड़ सकता है।

**टीका**—स्त्यानगृद्धिदर्शनावरणोदयेन उत्थापितेऽपि स्वपिति निद्रायां कर्म करोति जल्पति च। निद्रानिद्रा–[दर्शना] वरणोदयेन[११३] बहुधा सावधानीक्रियमाणोऽपि दृष्टिमुद्घाटयितुं न शक्नोति ॥४९॥

**पयलापयलुदएण य वहेदि लाला चलंति अंगाइं।**
**णिद्दुदए गच्छंतो ठाइ पुणो वइसदि पडेदि[११४]॥५०॥**

**प्रचलाप्रचला और निद्रा का स्वरूप**—प्रचलाप्रचला कर्म के उदय से मुख से लार बहती है और अंग-उपांग चलते रहते हैं। निद्राकर्म के उदय से जीव गमन करता हुआ भी खड़ा हो जाता है, बैठ जाता है, गिर पड़ता है इत्यादि नाना क्रियाएँ करता है।

**टीका**—प्रचलाप्रचलोदयेन मुखात् लाला वहति अङ्गानि चलन्ति। निद्रोदयेन गच्छन् तिष्ठति स्थितः पुनरुपविशति पतति च ॥५०॥

---

११०. एष सन्दर्भः सर्वार्थसिद्धि ८ सू॰ ७ व्याख्यया प्रायः समानः। १११. ज ब जप्पदि। ११२. गोम्मटसार कर्मकाण्ड २३। ११३. ब निद्रानिद्रोदयेन। ११४. गोम्मटसार कर्मकाण्ड २४।

**पयलुदएण य जीवो ईसुम्मीलिय सुवेदि सुत्तो वि।**
**ईसं ईसं जाणदि मुहुं मुहुं सोवदे मंदं[११५]॥५१॥**

**प्रचला का स्वरूप**—प्रचला कर्म के उदय से यह जीव कुछ-कुछ आँखों को उघाड़कर सोता है और सोता हुआ भी थोड़ा-थोड़ा जानता है और जानते हुए बार-बार मन्द-मन्द नींद लेता रहता है।

**टीका**—प्रचलोदयेन जीवः ईषदुन्मील्य स्वपिति, सुप्तोऽपि ईषदीषज्जानाति, मुहुर्मुहुः मन्दं स्वपिति ॥५१॥

**द्विविधं वेदनीयं द्विविधं मोहनीयं चाह—**

**दुविहं खु वेयणीयं सादमसादं च वेयणीयमिदि।**
**पुण दुवियप्पं मोहं दंसण-चारित्तमोहमिदि॥५२॥**

वेदनीयकर्म के दो भेद हैं—१. सातावेदनीय, २. असातावेदनीय। मोहनीयकर्म दो प्रकार का है—१. दर्शनमोहनीय, २.चारित्रमोहनीय। जो आत्मा के सम्यग्दर्शन गुण का घात करे, उसे दर्शन मोहनीय कहते हैं और सम्यक् चारित्र गुण का घात करने वाले कर्म को चारित्रमोहनीय कहते हैं।

**टीका**—खु स्फुटं वेदनीयं द्विविधम्-सातवेदनीयं असातवेदनीयं चेति। तत्र यद् रतिमोहनीयोदयबलेन जीवस्य सुखकारणेन्द्रियविषयानुभवनं कारयति तत् सातवेदनीयम्। यद् दुःखकारणेन्द्रियविषयानुभवनं कारयति अरतिमोहनीयोदयबलेन तदसातवेदनीयम्। पुनः मोहनीयं द्विविकल्पं द्विप्रकारम्-दर्शनमोहनीयं चारित्रमोहनीयं चेति। तत्र दर्शनमोहनीयं त्रिधा-मिथ्यात्व सम्यग्मिथ्यात्व सम्यक्त्वप्रकृति भेदात्। चारित्रमोहनीयं पञ्चविंशतिविधम्कषायनोकषायभेदात् ॥५२॥

**तत्र त्रिप्रकारं दर्शनमोहनीयं दर्शयन्नाह—**

**बंधादेगं मिच्छं उदयं सत्तं पडुच्च तिविहं खु।**
**दंसणमोहं मिच्छं मिस्सं सम्मत्तमिदि जाणे[११६]॥५३॥**

**दर्शनमोहनीय कर्म के भेद**—दर्शनमोहनीय कर्म बन्ध की अपेक्षा एक मिथ्यात्व रूप ही है किन्तु उदय और सत्त्व की अपेक्षा तीन प्रकार का जानना चाहिए—१. मिथ्यात्व, २. मिश्र (सम्यग्मिथ्यात्व) और ३. सम्यक्त्वप्रकृति।

**विशेषार्थ**—जिस कर्म के उदय से जीव सर्वज्ञ-प्रणीत मार्ग से प्रतिकूल उन्मार्ग पर चलता है, सन्मार्ग से पराङ्मुख रहता है, जीव-अजीवादिक तत्त्वों के ऊपर श्रद्धान नहीं करता है और अपने हित-अहित के विचार करने में असमर्थ रहता है, उसे मिथ्यात्वकर्म कहते हैं। जिस कर्म के उदय से जीव की तत्त्व के साथ अतत्त्व की, सन्मार्ग के साथ उन्मार्ग की और हित के साथ अहित की मिश्रित

११५. गोम्मटसार कर्मकाण्ड २५। ११६. त जाणि।

श्रद्धा होती है उसे सम्यग्मिथ्यात्व कहते हैं। जिस कर्म के उदय से सम्यग्दर्शन तो बना रहे, किन्तु उसमें चल-मलिन आदि दोष उत्पन्न हों उसे सम्यक्त्वप्रकृति कहते हैं। यहाँ इतना विशेष ज्ञातव्य है कि सम्यक्त्व प्रकृति का उदय चौथे गुणस्थान से लेकर सातवें गुणस्थान तक होता है। और यदि कोई जीव लगातार ६६ सागर तक मनुष्य और देवयोनियों में आता-जाता रहे तो तब तक उसके सम्यक्त्व प्रकृति का उदय बना रह सकता है। सम्यग्मिथ्यात्व का उदय यतः केवल तीसरे गुणस्थान में ही होता है, अतः उसका उदय एक अन्तर्मुहूर्त से अधिक नहीं रहता। मिथ्यात्वकर्म का उदय पहले ही गुणस्थान में होता है अतः उसका उदय अभव्य जीवों की अपेक्षा अनादिकाल से चला आ रहा है और अनन्तकाल तक चला जायेगा। जो भव्य अनादि मिथ्यादृष्टि हैं, उनके मिथ्यात्व का उदय यद्यपि अनादिकाल से आ रहा है, तथापि यतः एक-न-एक दिन उसका नियम से अन्त होगा, अतः वह अनादिसान्त कहलाता है, किन्तु जो सादि मिथ्यादृष्टि भव्य हैं अर्थात् एकादि बार जिनके सम्यक्त्व उत्पन्न हो चुका है, उसका मिथ्यात्व सादि-सान्त कहलाता है और इसलिए उसके उसका उदय कम से कम एक अन्तर्मुहूर्त और अधिक से अधिक कुछ कम अर्धपुद्गल परिवर्तन काल तक बना रह सकता है। अनादिकाल से सभी जीवों के दर्शनमोहनीय की केवल एक मिथ्यात्व प्रकृति ही बन्ध, उदय और सत्ता में रहती है, किन्तु प्रथम बार सम्यक्त्व की उत्पत्ति के कारणभूत अधःकरण, अपूर्वकरण और अनिवृत्तिकरण परिणामों के निमित्त से उस अनादिकालीन मिथ्यात्व के तीन टुकड़े हो जाते हैं। अतः उदय और सत्त्व की अपेक्षा दर्शनमोह के उक्त तीन भेद जानना चाहिए, किन्तु बन्ध की अपेक्षा वह एक मिथ्यात्व रूप से ही बँधता है।

**टीका**—बन्धात् बन्धापेक्षया दर्शनमोहनीयं मिथ्यात्वरूपमेकं भवति। तदेव दर्शनमोहनीयं उदयं सत्त्वं च प्रतीत्य आश्रित्य त्रिविधं खु स्फुटं भवति-मिथ्यात्वं मिश्रं सम्यक्त्वं चेति त्रिप्रकारं उदयसत्त्वापेक्षया जानीहि। तद्यथा-यस्योदयात्सर्वज्ञप्रणीतमार्गपराङ्मुखो जीवादितत्त्वार्थश्रद्धाननिरुत्सुको हिताहितविचारा-समर्थो मिथ्यादृष्टिर्भवति तन्मिथ्यात्वम्। तदेव मिथ्यात्वं प्रक्षालनविशेषात् क्षीणाक्षीणमदशक्तिकोद्रववत् समीषत् शुद्धरसं स्वशक्तियुतं तदुभयं मिश्रं च कथ्यते सम्यग्मिथ्यात्वमिति यावत्। यस्योदयादात्मनोऽर्धशुद्धमदनकोद्रवौदनोपयोगापादितमिश्रपरिणामः तदुभयात्मको भवति। तदेव मिथ्यात्वं सम्यक्त्वं भवति यदा शुभपरिणामनिरुद्धस्वरसं औदासीन्येनावस्थितमात्मनः श्रद्धानं न निरुणद्धि, तद्वेदयमानः सन् पुरुषः सम्यग्दृष्टिरभिधीयते[११७], सा सम्यक्त्वप्रकृतिः ॥५३॥

तस्य दर्शनमोहनीयस्य त्रिप्रकारस्य दृष्टान्तमाह[११८]—

**जंतेण कोद्दवं वा पढमुवसमसम्मभावजंतेण।**
**[११९]मिच्छादव्वं तु तिधा[१२०] असंखगुणहीणदव्वकमा[१२१]॥५४॥**

---

११७. सन्दर्भोऽयं सर्वार्थसिद्धि ८ सू० ९ व्याख्यया शब्दशः समानः। ११८. ब स्वरूपमाह। ११९. त मिच्छं दव्वं। १२०. ब तिहा। १२१. गोम्मटसार कर्मकाण्ड २६।

**दर्शनमोह के तीन भेद होने का दृष्टान्तपूर्वक वर्णन**—यन्त्र (जाँता या चक्की) से दले हुए कोदों के समान प्रथमोपशम सम्यक्त्व परिणामरूप यन्त्र से मिथ्यात्व रूप कर्म द्रव्य तीन प्रकार का हो जाता है और वह द्रव्य प्रमाण में क्रम से असंख्यात गुणित-असंख्यातगुणित हीन होता है।

**विशेषार्थ**—जिस प्रकार कोदों को चक्की से दलने पर उसके तन्दुल (चावल), कण और भूसी ये तीन रूप हो जाते हैं उसी प्रकार प्रथमोपशम सम्यक्त्वरूप परिणामों के निमित्त से अनादिकालीन एक मिथ्यात्व कर्म के तीन टुकड़े हो जाते हैं, जिनके नाम क्रमशः मिथ्यात्व, सम्यग्मिथ्यात्व और सम्यक्प्रकृति हैं। इनमें अनादिकालीन मिथ्यात्व द्रव्य के कर्म परमाणु क्रमशः असंख्यातगुणित रूप से कम-कम होते हैं। इसीलिए पूर्व गाथा में यह कहा गया है कि दर्शनमोहनीय कर्म बन्ध की अपेक्षा एक मिथ्यात्वरूप है और उदय तथा सत्त्व की अपेक्षा तीन भेदरूप हैं।

**टीका**—यन्त्रेण घरट्टेण कोद्रवो दलितो यथा तुष-तन्दुल-कणिकारूपेण त्रिधा भवति, तथा प्रथमोपशमसम्यक्त्वभावयन्त्रेण मिथ्यात्वद्रव्यं दलितं सत् मिथ्यात्व-सम्यग्मिथ्यात्व-सम्यक्त्वप्रकृति-स्वरूपेणासङ्ख्यातगुणहीनद्रव्यक्रमेण त्रिधा भवति ॥५४॥

**पुनः द्विविध-[चारित्र-] मोहनीयस्वरूपं गाथाष्टकेनाऽऽह—**

**दुविहं चरित्तमोहं कसायवेयणीयं णोकसायमिदि।**
**पढमं सोलवियप्पं विदियं णवभेयमुद्दिट्ठं ॥५५॥**

**चारित्र मोहकर्म के भेद**—मोहनीयकर्म का दूसरा भेद जो चारित्रमोहनीय कर्म है वह दो प्रकार का है—कषायवेदनीय और नोकषायवेदनीय। उनमें प्रथम कषायवेदनीय सोलह और द्वितीय नोकषाय वेदनीय नौ प्रकार का कहा गया है।

**टीका**—चरित चर्यतेऽनेन चरणमात्रं वा चारित्रम्। तच्चारित्रं मोहयति मुह्यतेऽनेनेति वा चारित्रमोहनीयम्। तच्चारित्रमोहनीयं द्विविधम्-कषायवेदनीयं [१२२]नोकषायवेदनीयं चेति। तत्र प्रथमं कषायवेदनीयं षोडशप्रकारम्। द्वितीयं नोकषायवेदनीयं नवभेदं नवप्रकारं जिनैरुद्दिष्टं कथितम् ॥५५॥

**अणमप्पच्चक्खाणं पच्चक्खाणं तहेव संजलणं।**
**कोहो माणो माया लोहो सोलस कसायेदे ॥५६॥**

**कषाय वेदनीय के भेद**—कषाय वेदनीय के सोलह भेद इस प्रकार हैं—अनन्तानुबन्धी क्रोध, मान, माया, लोभ, अप्रत्याख्यानावरण क्रोध, मान, माया, लोभ, प्रत्याख्यानावरण क्रोध, मान, माया, लोभ और संज्वलन क्रोध, मान, माया, लोभ ॥५६॥

**टीका**—अनन्तानुबन्धिनः क्रोधमानमायालोभाश्चत्वारः। अथाप्रत्याख्यानावरणाः क्रोधमानमाया-लोभाश्चत्वारः। प्रत्याख्यानावरणाः क्रोधमानमायालोभाश्चत्वारः। तथैव संज्वलनाः क्रोधमानमायालोभा-

---

१२२. ब ईषत्कषाया नोकषायाः।

श्चत्वारः। इत्येते एकत्रीकृताः षोडश कषाया भवन्ति ॥५६॥

**सिल-पुढविभेद-धूली-जलराइसमाणओ हवे कोहो।**
**णारयतिरियणरामरगईसु उप्पायओ कमसो[१२३]॥५७॥**

**चारों प्रकार की क्रोध कषाय के उपमान और फल**—उनमें से अनन्तानुबन्धी क्रोध पत्थर की रेखा के समान, अप्रत्याख्यानावरण क्रोध पृथ्वी की रेखा के समान, प्रत्याख्यानावरण क्रोध धूलि की रेखा के समान और संज्वलन क्रोध जल की रेखा के समान परिणाम वाला कहा गया है। ये चारों प्रकार के क्रोध क्रमशः नरक, तिर्यंच, मनुष्य और देवगति में उत्पन्न करने वाले हैं।

**टीका**—शिलाभेद-पृथ्वीभेद-धूलिरेखाजलरेखासमानः उत्कृष्टानुत्कृष्टाजघन्यजघन्यशक्तिविशिष्टः क्रोध-कषायः। स नारकतिर्यङ्नरामरगतिषु क्रमशो यथाक्रममुत्पादको भवति जीवस्य। तद्यथा-शिलाभेदसदृशोत्कृष्टशक्तिविशिष्टानन्तानुबन्धिक्रोधकषायः जीवं नरकगत्यामुत्पादयति । पृथ्वीभेद-समानानुत्कृष्टशक्तिकोऽप्रत्याख्यानावरणक्रोधकषायः तिर्यग्गतौ जीवमुत्पादयति । धूलिरेखातुल्याजघन्य-शक्तियुक्तः प्रत्याख्यानावरणक्रोधो जीवं मनुष्यगत्यामुत्पादयति। जलरेखासदृशजघन्यशक्ति-धृत्संज्वलन-क्रोधो जीवं देवगतौ नयति । तत्तच्छक्तियुक्तक्रोधकषायपरिणतजीवस्तद्गत्युत्पत्तिकारणतत्तदायुर्गत्यानु-पूर्व्यादिप्रकृतीः बध्नातीत्यर्थः। अत्र राजिशब्दो रेखार्थवाची। यथा शिलाभेदादीनां चिरतर-चिर-शीघ्र-शीघ्रतर कालैर्विनाऽनुसन्धानं न घटते, तथा उत्कृष्टादिशक्तियुक्तक्रोधपरिणतो जीवस्तथा-विधकालैर्विना क्षमालक्षणसन्धानयोग्यो न भवेत् इत्युपमानोपमेययोः सादृश्यं सम्भवतीति तात्पर्यार्थः ॥५७॥

**[१२४]सिल-अट्ठि-कट्ठ-वेत्ते णियभेएणणुहरंतओ माणो।**
**णारयतिरियणरामरगईसु उप्पायओ कमसो[१२५]॥५८॥**

**चारों प्रकार की मानकषाय के उपमान और फल**—अनन्तानुबन्धी मान पत्थर के समान, अप्रत्याख्यानावरण मान हड्डी के समान, प्रत्याख्यानावरण मान काठ के समान और संज्वलन मान बेंत के समान कठोर परिणाम वाला कहा गया है। ये चारों प्रकार के मान क्रमशः नरक, तिर्यंच, मनुष्य और देवगति में उत्पन्न करने वाले हैं।

**टीका**—शैलास्थिकाष्ठवेत्रसमानस्वोत्कृष्टादिशक्तिभेदैरनुहरन्[१२६] उपमीयमानः मानकषायः क्रमशो नारकतिर्यङ्नरामरगतिषु जीवमुत्पादयति। तद्यथा-शिलास्तम्भसमानोत्कृष्टशक्तियुक्तानन्तानुबन्धिमान-कषायः जीवं नारकगतावुत्पादयति। अस्थिसमानानुत्कृष्टशक्तियुक्ताप्रत्याख्यानावरणमानकषायो जीवं तिर्यग्गत्यामुत्पादयति। काष्ठसमानाजघन्यशक्तिसहितप्रत्याख्यानावरणमानकषायो जीवं मनुष्य-गतावुत्पादयति। वेत्रसमानजघन्यशक्तियुक्तसंज्वलनमानकषायो जीवं देवगतावुत्पादयति। यथा

१२३. गोम्मटसार जीवकाण्ड २८३। १२४. त ब सेलट्ठि। १२५. गोम्मटसार जीवकाण्ड २८४। १२६. ब तुल्यो भवन्।

चिरतरादिकालैर्विना शैलास्थिकाष्ठवेत्राः नामयितुं न शक्यन्ते, तथा उत्कृष्टादिशक्तियुक्तमानपरिणतो जीवोऽपि तथाविधकालैर्विना मानं परिहृत्य विनयरूपनमनं कर्तुं न शक्नोतीति सादृश्यसम्भवोऽत्र ज्ञातव्यः। तत्तच्छक्तियुक्तमानकषायपरिणतो जीवस्तत्तद्गत्युत्पत्तिहेतुतत्तदायुर्गत्यानुपूर्वीनामादिकर्म बध्नातीति तात्पर्यम् ॥५८॥

**वेणुवमूलोरब्भयसिंगे गोमुत्तए य खोरुप्पे।**
**सरिसी माया णारयतिरियणरामरगईसु खिवदि जियं[१२७]॥५९॥**

**चारों प्रकार की मायाकषाय के उपमान और फल**—अनन्तानुबन्धी माया बाँस की जड़ के समान, अप्रत्याख्यानावरण माया मेंढ़े के सींग के समान, प्रत्याख्यानावरण माया गोमूत्र के समान और संज्वलन माया खुरपा के समान कुटिल परिणाम वाली कही गयी है। ये चारों प्रकार की माया क्रमशः जीव को नरक, तिर्यंच, मनुष्य और देवगति में ले जाती हैं।

**टीका**—वेणूपमूलोरभ्रकशृङ्गगोमूत्रक्षुरप्रसदृशोत्कृष्टादिशक्तियुक्ता माया वञ्चना यथाक्रमं नारकतिर्यङ्-नरामरगतिषु जीवं निक्षिपति। तद्यथा-वेणूपमूलं वंशमूलग्रन्थिः, तेन समानोत्कृष्ट-शक्तियुक्तानन्तानुबन्धिमायाकषायः जीवं नरकगतौ निक्षिपति। उरभ्रको मेषः, तच्छृंगसदृशानुत्कृष्ट-शक्तियुक्ताप्रत्याख्यानावरणमाया कषायः जीवं तिर्यग्गतौ प्रक्षिपति। गोमूत्रसमानाजघन्यशक्तियुक्त-प्रत्याख्यानावरणमायाकषायः आत्मानं मनुष्यगतौ निक्षिपति। क्षुरप्रसमानजघन्यशक्तियुक्तसंज्वलन-मायाकषायः जीवं देवगतौ निक्षिपति। यथा वेणूपमूलादयश्चिरतरादिकालं विना स्वस्ववक्रतां परिहृत्य ऋजुत्वं न प्राप्नोति, तथा जीवोऽप्युत्कृष्टादिशक्तियुक्तमायाकषायपरिणतस्तथाविधकालैर्विना स्वस्ववक्रतां परिहृत्य ऋजुपरिणामो न स्यात् [इति] सादृश्यं युक्तम्। तत्तदुत्कृष्टादिशक्तियुक्तमायाकषायपरिणत-जीवस्तत्तद्गतिक्षेपकारणं तत्तदायुर्गत्यानुपूर्व्यादि कर्म बध्नातीत्यर्थः ॥५९॥

**किमिराय-चक्क -तणुमल-हरिद्दराएण सरिसओ लोहो।**
**णारयतिरिक्खमाणुसदेवेसुप्पायओ कमसो[१२८]॥६०॥**

**चारों प्रकार की लोभ कषाय के उपमान और फल**—अनन्तानुबन्धी लोभ कृमिराग के समान, अप्रत्याख्यानावरण लोभ चक्रमल (ओंगन) के समान, प्रत्याख्यानावरण लोभ शरीर के मल के समान और संज्वलन लोभ हल्दी के रंग के समान सचिक्कण परिणाम वाला कहा गया है। ये चारों प्रकार के लोभ क्रमशः नरक, तिर्यंच, मनुष्य और देवगति के उत्पादक होते हैं।

**टीका**—कृमिराग-चक्रमल-तनुमल-हरिद्रारागबन्धसमानोत्कृष्टादिशक्तियुक्तो लोभकषायो विषयाभिलाषरूपः क्रमशो यथासंख्यं नारकतिर्यङ्मनुष्यदेवगतिषु जीवमुत्पादयति। तद्यथा-कृमिरागेण

---

१२७. गोम्मटसार जीवकाण्ड २८५। १२८. गोम्मटसार जीवकाण्ड २८६।

कम्बलादिरञ्जनेन समानोत्कृष्टशक्तियुक्तानन्तानुबन्धिलोभकषायो जीवं नारकगतावुत्पादयति। चक्रमलो रथाङ्गमलस्तेन समानानुत्कृष्टशक्तियुक्ताप्रत्याख्यानावरणलोभकषायः जीवं तिर्यग्गत्यामुत्पादयति। तनुमलः शरीरमलः बहिर्गतो जल्लमलः, तद्बन्धसदृशाजघन्यशक्तिसहित-प्रत्याख्यानावरणलोभकषायः जीवं मनुष्य-गतावुत्पादयति । हरिद्रारागः अङ्गवस्त्रादिरञ्जनद्रव्यरागः, तद्बन्धसदृशजघन्यशक्तियुक्तसंज्वलन-लोभकषायः जीवं देवगतौ उत्पादयति। कृमिरागादिसदृश-तत्तदुत्कृष्टादिशक्तियुक्तलोभपरिणामेन जीवस्तत्तन्नारकादिभवोत्पत्तिकारणत्तदायुर्गत्यानुपूर्व्यादिकर्म बध्नातीति भावार्थः॥६०॥

**निरुक्तिपूर्वकं कषायशब्दस्यार्थं निरूपयति-**

**सम्मत्त - देस - सयलचरित्त - जहखादचरणपरिणामे।**
**घादंति वा कसाया चउ-सोल-असंखलोगमिदा[१२९]॥६१॥**

**अनन्तानुबन्धी आदि चारों प्रकार की कषायों के कार्य**—जो सम्यक्त्व, देशचारित्र, सकलचारित्र और यथाख्यात चारित्ररूप परिणामों को कसे या घात करे, उसे कषाय कहते हैं। इसके अनन्तानुबन्धी, अप्रत्याख्यानावरण आदि की अपेक्षा चार भेद हैं। इन्हीं चारों के क्रोध, मान, माया और लोभ की अपेक्षा सोलह भेद हैं और कषाय के उदयस्थानों की अपेक्षा असंख्यात लोकप्रमाण भेद कहे गये हैं। अनन्तानुबन्धी कषाय सम्यक्त्व की घातक, अप्रत्याख्यानावरण कषाय देशचारित्र (श्रावकव्रत) की घातक, प्रत्याख्यानावरण कषाय सकलचारित्र (मुनिव्रत) की घातक और संज्वलन कषाय यथाख्यातचारित्र की घातक है।

**टीका**—वा अथवा सम्यक्त्वं तत्त्वार्थश्रद्धानं देशचारित्रं अणुव्रतं सकलचारित्रं महाव्रतं यथाख्यातचरणं यथाख्यातचारित्रं एवंविधात्मविशुद्धिपरिणामान् कषन्ति हिंसन्ति घ्नन्तीति कषायाः इति निर्वचनीयम्। तद्यथा-अनन्तानुबन्धिक्रोधमानमायालोभकषायः आत्मनः सम्यक्त्वपरिणामं कषन्ति हिंसन्ति घ्नन्ति; अनन्तसंसारकारणत्वात् मिथ्यात्वमनन्तं अनन्तभवसंस्कारकालं वाऽनुबध्नन्ति सुघटयन्ति इत्यनन्तानुबन्धिनः इति निरुक्तिसामर्थ्यात् अनन्तानुबन्धिकषायाः। अप्रत्याख्यानावरणाः क्रोधमानमाया-लोभकषायाः जीवस्याणुव्रतपरिणामं कषन्ति। अप्रत्याख्यानमीषत्प्रत्याख्यानमणु-व्रतामावृण्वन्ति घ्नन्तीति निरुक्तिसिद्धत्वात् अप्रत्याख्यानावरणकषायाः। प्रत्याख्यानावरणाः क्रोधमानमायालोभकषाया आत्मनः सकलचारित्रं महाव्रतपरिणामं कषन्ति। प्रत्याख्यानं सकलसंयमं महाव्रतमावृण्वन्ति घ्नन्तीति निरुक्तिसिद्धत्वात् प्रत्याख्यानकषायाः। संज्वलनाः क्रोधादिकषायाः आत्मनो यथाख्यातचारित्रपरिणामं कषन्ति, सं समीचीनं विशुद्धं संयमं यथाख्यातचारित्रनामधेयं ज्वलन्ति दहन्तीति संज्वलना इति निरुक्तिबलेन। तदुदये सत्यपि सामायिकादिसंयमाविरोधः सिद्धः। एवंविधकषायः सामान्येन एकः। विशेषविवक्षायां तु अनन्तानुबन्ध्यप्रत्याख्यानावरणप्रत्याख्यानावरणसंज्वलन-भेदाच्चत्वारः। पुनस्ते

१२९. गोम्मटसार जीवकाण्ड २८२।

अनन्तानुबन्ध्यादयश्चत्वारोऽपि प्रत्येकं क्रोधमानमायालोभा इति षोडश। तद्यथा–अनन्तानुबन्धि-क्रोधमानमायालोभाः अप्रत्याख्यानावरणक्रोधमानमायालोभाः प्रत्याख्यानावरणक्रोधमानमायालोभाः संज्वलनक्रोधमानमायालोभा इति। पुनः सर्वेऽप्युदयस्थानविशेषापेक्षया असंख्यातलोकप्रमिता भवन्ति। कुतः ? तत्कारणचारित्रमोहनीयोत्तरोत्तरप्रकृतिविकल्पानामसंख्यातलोकमात्रत्वात् ॥६१॥

**नोकषायवेदनीयनवविधमाह–**

**हस्स रदि अरदि सोयं भयं जुगुंछा य इत्थि-पुंवेयं।**
**संढं वेयं च तहा णव एदे णोकसाया य॥६२॥**

**नोकषाय वेदनीय के नौ भेदों का प्रतिपादन करते हैं–**हास्य, रति, अरति, शोक, भय, जुगुप्सा, स्त्रीवेद, पुंवेद और नपुंसक वेद ये नौ नोकषाय हैं। इनका स्वरूप इनके नामों के अनुसार जानना चाहिए।

**टीका–**हास्यरत्यरतिशोकभयजुगुप्साश्च स्त्री-पुंवेदौ तथा षण्ढवेदश्च इत्येते नव नोकषाया भवन्ति। तन्निरुक्तिमाह–ईषत्कषाया नोकषायास्तान् वेदयन्ति वेद्यन्ते एभिरिति नोकषायवेदनीयानि नवधा। यस्योदयाद् हास्याविर्भावस्तद्धास्यम्। यदुदयाद्देशादिषु औत्सुक्यं सा रतिः। तद्विपरीता अरतिः। यद्विपाकात् शोचनं स शोकः। यदुदयादुद्वेगस्तद् भयम्। यदुदयादात्मीयदोषस्य संवरणं परदोषस्य धारणं सा जुगुप्सा। यदुदयात् स्त्रैणान् भावान् प्रतिपद्यते स स्त्रीवेदः। यस्योदयात् पौंस्नान् भावान् आस्कन्दति प्राप्नोति स पुंवेदः। यदुदयान्नपुंसकान् भावान् उपव्रजति गच्छति स नपुंसकवेदः ॥६२॥

**अथ वेदत्रयं विशेषतः गाथात्रयेणाऽऽह–**

**छादयदि सयं दोसे णयदो[130] छाददि परं पि दोसेण।**
**छादणसीला जम्हा तम्हा सा वण्णिदा इत्थी[131]॥६३॥**

**स्त्रीवेद का स्वरूप–**यतः जो मिथ्यादर्शन, अज्ञान, असंयम आदि दोषों से अपने को आच्छादित करती है और मृदु-भाषण, तिरछी-चितवन आदि व्यापारों से दूसरे पुरुषों को भी हिंसा, कुशीलादि दोषों से आच्छादित करती है, अतः उसे आच्छादन स्वभाव युक्त होने से स्त्री कहा गया है।

**टीका–**यस्मात्कारणात् स्वयमात्मानं दोषैः मिथ्यादर्शनाज्ञानासंयमक्रोधमानमायालोभैः छादयति संवृणोति नयतः[132] मृदुभाषितस्निग्ध-विलोकनानुकूलवर्तनादिकुशलव्यापारैः परमपि अन्यपुरुषमपि स्ववशं कृत्वा दोषेण हिंसाऽनृतस्तेयाब्रह्मपरिग्रहादिपातकेन छादयति आवृणोति तस्मात्कारणाच्छादनशीला द्रव्य-भावाभ्यां सा अङ्गना स्त्रीति वर्णिता परमागमे प्रतिपादिता। स्तृणाति स्वयमन्यं च दोषैराच्छादयतीति निरुक्तेः स्त्री सामान्यतः स्त्रीणां लक्षणमुक्तम् ॥६३॥

---

१३०. आ ज ब णियदो। निजतः इति पाठः। १३१. पञ्चसं॰ १, १०५। गो॰ जी॰ का॰ २७३। १३२. ब न्यायात् नीतेः।

**पुरुगुणभोगे सेदे करेदि लोयम्हि पुरुगुणं कम्मं।**
**पुरु उत्तमो य जम्हा तम्हा सो वण्णिदो पुरिसो[१३३]॥६४॥**

**पुरुषवेद का स्वरूप**—यतः जो उत्कृष्ट गुण अथवा उत्कृष्ट भोगों का स्वामी है अथवा जो लोक में उत्कृष्ट गुणयुक्त कर्म को करता है अथवा जो स्वयं उत्तम है, उसे पुरुष कहा गया है।

**टीका**—यस्मात् कारणाल्लोके यो जीवः पुरुगुणे [१३४]सम्यग्दर्शनज्ञानचारित्राद्यधिकगुणसमूहे शेते स्वामित्वेन प्रवर्तते पुरुभोगे नरेन्द्र-नागेन्द्र-देवेन्द्राद्यधिकभोगसमूहे भोक्तृत्वेन प्रवर्त्तते पुरुगुणं कर्म धर्मार्थकाममोक्ष-लक्षणं पुरुषार्थसाधनरूपादिदिव्यानुष्ठानं शेते करोति च पुरुषोत्तमे[१३५] परमे पदे सति तिष्ठति पुरुषोत्तमः सन् तिष्ठतीत्यर्थः। तस्मात् कारणात् स द्रव्यभावद्वयसम्पन्नो जीवः पुरुष इति वर्णितः ॥६४॥

**णेवित्थी णेव पुमं णउंसवो उहयलिंगवदिरित्तो।**
**इट्ठावग्गिसमाणयवेयणगरुओ कलुसचित्तो[१३६]॥६५॥**

**नपुंसक वेद का स्वरूप**—जो न स्त्रीरूप है और न पुरुषरूप है ऐसे दोनों ही लिंगों से रहित जीव को नपुंसक कहते हैं। इसकी विषय-सेवन की लालसा भट्टे में पकती हुई ईंटों की अग्नि के समान तीव्र कही गयी है अतएव इसका निरन्तर कलुषित चित्त रहता है।

**टीका**—यो जीवो नैव पुमान् पूर्वोक्तपुरुषलक्षणाभावात् पुरुषो न भवति। नैव स्त्री, उक्तस्त्री-लक्षणाभावात् स्त्री अपि न भवति, ततः कारणादुभयलिङ्गव्यतिरिक्तः श्मश्रुमेहनस्तनभागादि-पुंस्त्रीद्रव्यलिङ्गरहितः नपुंसकः। यतः स्त्रियमात्मानं मन्यमानः पुरुषे वेदयति रन्तुमिच्छति स स्त्रीवेदः, य वेः (?) पुमांसमात्मानं................नपुंसकवेदः इष्टिकापाकाग्नि-समानतीव्रकामवेदनागुरुकः कलुषचित्तः सर्वदा तद्वेदनया कलङ्कितहृदयः स जीवो नपुंसकः नपुंसकवेद इति परमागमे वर्णितः कथितः। स्त्री-पुरुषाभिलाषरूपतीव्रकामवेदनालक्षणभावनपुंसकवेदोस्तीत्यर्थः। त्रिवेदानां लक्षणं तथा चोक्तम्—

**श्रोणिमार्दव - भीरुत्व - मुग्धत्व - क्लीबता - स्तनाः।**
**पुंस्कामेन समं सप्त लिङ्गानि स्त्रैणसूचने॥६॥**
**खरत्व - मेहन -स्ताब्ध्य-शौण्डीर्य-श्मश्रु-धृष्टता।**
**स्त्रीकामेन समं सप्त लिङ्गानि नरवेदने॥७॥**
**यानि स्त्री-पुरुषलिङ्गानि पूर्वोक्तानि चतुर्दश।**
**सूक्तानि तानि मिश्राणि षण्ढभावनिवेदने[१३७]॥८॥**

---

१३३. पञ्चसं० १, १०६। गोम्मटसार जीवकाण्ड २७२। १३४. ब सम्यग्ज्ञानाद्यधिकगुणसमूहे। १३५. ब पुरूत्तमे परमेष्ठिपदे। १३६. पञ्चसं० १, १०७। गोम्मटसार जीवकाण्ड २७४। १३७. सं० पञ्चसं० १, १९६-१९८।

**अथ गाथापूर्वार्धे आयुश्चतुष्कं गाथाया उत्तरार्ध प्रारभ्य नामकर्मप्रकृतीश्चाह—**

**णारयतिरियणरामर आउगमिदि चउविहो हवे आऊ।**
**णामं वादालीसं पिंडापिंडप्पभेएण॥६६॥**

**आयुकर्म का निरूपण करते हैं**—नारक, तिर्यंच, मनुष्य और देवायुष्य के भेद से आयुकर्म चार प्रकार का होता है अर्थात् आयुकर्म के चार भेद हैं—नारकायु, तिर्यगायु, मनुष्यायु और देवायु। पिण्ड प्रकृति और अपिण्ड प्रकृतियों के भेद से नामकर्म बयालीस प्रकार का है।

**टीका**—नारकतिर्यङ्नरामरायुष्यमिति आयुश्चतुर्विधं भवेत्। नारकादिभवधारणाय एत्यायुः। तत्र नरकादिषु भवसम्बन्धेनाऽऽयुषो व्यपदेशः क्रियते। वा नरकेषु भवं नारकमायुः। तिर्यग्योनिषु भवं तैर्यग्योनमायुः। मनुष्ययोनिषु भवं मानुष्यमायुः। देवेषु भवं दैवमायुः इति। नरकेषु तीव्रशीतोष्णादिवेदनेषु दीर्घजीवनं नारकायुः। इत्येवं शेषेष्वपि। पिण्डापिण्डप्रभेदेन नामकर्म द्विचत्वारिंशद्विधं ४२ भवति ॥६६॥

**णेरइय-तिरिय-माणुस-देवगइ त्ति य हवे गई चदुधा।**
**इगि-वि-ति-चउ-पंचक्खा जाई पंचप्पयारेदे॥६७॥**

**गति और जाति नामकर्म के भेद**—उनमें से गति नामकर्म चार प्रकार का है—नरकगति, तिर्यग्गति, मनुष्यगति और देवगति। जाति नामकर्म पाँच प्रकार का है—एकेन्द्रियजाति, द्वीन्द्रियजाति, त्रीन्द्रियजाति, चतुरिन्द्रियजाति और पंचेन्द्रियजाति।

**विशेषार्थ**—जिस कर्म के उदय से यह जीव एक पर्याय से दूसरी पर्याय को जाता है, उसे गति नामकर्म कहते हैं। जिस कर्म के उदय से जीव एकेन्द्रिय आदि जातियों में उत्पन्न हो, उसे जाति नामकर्म कहते हैं।

**टीका**—नारकतिर्यङ्मनुष्यदेवगतिरिति गतिश्चतुर्धा[१३८] चतुःप्रकारा भवेत्। तत्र यदुदयाज्जीवः भवान्तरं गच्छति सा गतिः। सा चतुर्धा। यन्निमित्तमात्मनो नारकपर्यायस्तन्नारकगतिनाम। यन्निमित्तमात्मनस्तिर्यग्भवस्तत्तिर्यग्गतिनाम । यन्निमित्तं जीवस्य मनुष्यपर्यायस्तन्मनुष्यगतिनाम। यदुदयाज्जीवस्य देवपर्यायस्तद्देव-गतिनाम।१ ।२ ।[१३९]एक-द्वि-त्रि-चतुः-पञ्चाक्षभेदाज्जातिः पञ्चप्रकारेति। यदुदयादात्मा एकेन्द्रिय इति शब्द्यते तदेकेन्द्रियजातिनाम। यस्योदयात् प्राणी द्वीन्द्रिय इत्युच्यते तद्द्वीन्द्रियजातिनाम। यदुदयाज्जन्तुस्त्रीन्द्रिय इति भण्यते तत्त्रीन्द्रियजातिनाम। यस्योदयाज्जीवश्चतुरिन्द्रिय इति वर्ण्यते तच्चतुरिन्द्रियजातिनाम। यदुदयादात्मा पञ्चेन्द्रिय इति निगद्यते तत्पञ्चेन्द्रियजातिनाम। २। ९ ॥६७॥

**ओरालिय - वेगुव्विय - आहारय - तेज - कम्मणसरीरं।**
**इदि पंचसरीरा खलु ताण वियप्पं वियाणाहि ॥६८॥**

---

१३८. ब बहुधा। १३९. ब पिण्डत्वेन १, व्यक्तित्वेन ४।

**शरीर नामकर्म के भेद—**शरीर नामकर्म के पाँच भेद जानना चाहिए-औदारिक शरीर, वैक्रियिक शरीर, आहारक शरीर, तैजस शरीर और कार्मण शरीर।

**विशेषार्थ—**स्थूल शरीर को औदारिक शरीर कहते हैं, यह मनुष्य और तिर्यंचों के होता है। अणिमा, महिमा आदि की शक्ति से युक्त शरीर को वैक्रियिक शरीर कहते हैं, यह देव और नारकियों के होता है। उत्कृष्ट संयम वाले तपस्वी साधुओं के चित्त में सूक्ष्म तत्त्व सम्बन्धी सन्देह के उत्पन्न होने पर और उसके निवास वाले क्षेत्र में केवली-श्रुतकेवली का अभाव होने पर सन्देह के निवारणार्थ उनके पादमूल में जाने के लिए जो मस्तक से एक हाथ का पुतला निकलता है, उसे आहारक शरीर कहते हैं। शरीर के भीतर भुक्त अन्नादि के जीर्ण करने वाले तेज को तैजस शरीर कहते हैं। सर्वकर्मों के उत्पन्न करने वाले एवं उनके आधारभूत शरीर को कार्मण शरीर कहते हैं।

**टीका—**औदारिकशरीरवैक्रियिकशरीराऽऽहारकशरीरतैजसशरीरकार्मणशरीरभेदात् इति शरीराणि पञ्च खलु स्फुटं भवन्ति। तेषां शरीराणां विकल्पान् दशप्रकारान् वक्ष्यमाणगाथायां जानीहि। तद्यथा-यदुदयादात्मनः औदारिकशरीरनिर्वृत्तिस्तदौदारिकशरीरनाम। यदुदयाद् वैक्रियिकशरीरनिष्पत्तिस्त-द्वैक्रियिकशरीरनाम। यस्योदयादाहारकशरीरनिर्वृत्तिस्तदाहारकशरीरनाम। यदुदयात्तैजसशरीरनिर्वृत्ति-स्तत्तैजस-शरीरनाम। यदुदयाज्जीवस्य कार्मणशरीरनिष्पत्तिस्तत्कार्मणशरीरनाम। ३। १४[१४०]॥६८॥

**एषां पञ्चशरीराणां भङ्गानाह—**

**तेजाकम्मेहिं तिए तेजाकम्मेण कम्मणा कम्मं।**
**कयसंजोगे चदुचदुचदुदुगएक्कं च पयडीओ[१४१]॥६९॥**

**अब इन पाँचों शरीरों के संयोग से उत्पन्न होने वाले भेदों का निरूपण करते हैं—**तैजस और कार्मण शरीर के साथ औदारिक, वैक्रियिक और आहारक शरीर का आपस में संयोग करने पर चार-चार भेद होते हैं, इस प्रकार तीनों के मिलकर बारह भेद हो जाते हैं तथा कार्मण शरीर के साथ तैजस शरीर के मिलाने से दो भेद और कार्मण शरीर के साथ कार्मण शरीर को मिलाने से एक भेद और होता है, इस प्रकार सब मिलाकर पन्द्रह भेद हो जाते हैं।

**विशेषार्थ—**शरीर नामकर्म के वे पन्द्रह भेद इस प्रकार हैं-१. औदारिक-औदारिक, २. औदारिक तैजस, ३. औदारिक कार्मण, ४. औदारिक तैजस कार्मण, ५. वैक्रियिक-वैक्रियिक, ६. वैक्रियिक तैजस, ७. वैक्रियिक कार्मण, ८. वैक्रियिक तैजसकार्मण, ९. आहारक आहारक, १०. आहारक तैजस, ११. आहारक कार्मण, १२. आहारक तैजस कार्मण, १३. तैजस-तैजस, १४. तैजस कार्मण, १५ कार्मण-कार्मण।

---

१४०. ब एतासु १४ वक्ष्यमाणा १० युक्ताः २४ प्रकृतयः ३। १४१. गोम्मटसार कर्मकाण्ड २७।

**टीका**—तिये इति औदारिकवैक्रियिकाहारकत्रयेण तैजस-कार्मणाभ्यां संयोगे कृते चतस्रश्चतस्रश्चतस्रः प्रकृतयः। तद्यथा–औदारिकौदारिक औदारिकतैजस औदारिककार्मण औदारिक-तैजसकार्मणाः। वैक्रियिकवैक्रियिक वैक्रियिकतैजस वैक्रियिककार्मण वैक्रियिकतैजसकार्मणाः। आहारकाहारक आहारकतैजस आहारककार्मण आहारकतैजसकार्मणाः। पुनस्तैजसे कार्मणेन संयोगे कृते तैजसतैजस तैजसकार्मण इति द्वे प्रकृती। पुनः कार्मणं कार्मणेन संयोगे तदा कार्मणकार्मण इत्येका प्रकृतिः। एवमेकत्रीकृताः पञ्चदश भवन्ति। एतासु औदारिकौदारिकादयः कार्मणकार्मणान्ताः सदृशद्विसंयोगाः पञ्च[142] पुनरुक्ता इति त्यक्त्वा शेषदशसु त्रिनवत्यां निक्षिप्तासु त्र्युत्तरं शतं नाम-कर्मोत्तरप्रकृतयो भवन्ति ॥६९॥

**ओरालिय वेउव्विय आहारय तेजणामकम्मुदए।**
**चउ णोकम्मसरीरा कम्मेव य होई कम्मइयं[143]॥१॥**

**पंच य सरीरबंधणणामं ओराल तह य वेउव्वं।**
**आहार तेज कम्मण सरीरबंधण सुणाममिदि॥७०॥**

**बन्धन नामकर्म के भेद**—बन्धन नामकर्म के पाँच भेद हैं–१. औदारिक शरीर-बन्धन, २. वैक्रियिक शरीर-बन्धन, ३. आहारक शरीर-बन्धन, ४. तैजस शरीर-बन्धन और ५. कार्मणशरीर-बन्धन।

**विशेषार्थ**—शरीर नामकर्म के उदय से जीव ने जो आहार वर्गणारूप पुद्गल के स्कन्ध ग्रहण किये हैं, उनका जिस कर्म के उदय से आपस में सम्बन्ध होता है, उसे बन्धन नामकर्म कहते हैं।

**टीका**—शरीरबन्धननाम पञ्चप्रकारं भवति। बन्धनशब्दः प्रत्येकं सम्बध्यते–औदारिकशरीरबन्धनं नाम। तथा च वैक्रियिकशरीरबन्धनं नाम आहारकशरीरबन्धनं नाम तैजसशरीरबन्धनं नाम कार्मणशरीरबन्धनं नाम। किमिदं नाम बन्धनत्वमिति चेदौदारिकादिशरीरनामकर्मोदयवशादुपात्ता-नामाहारवर्गणायातपुद्गलस्कन्धानामन्योन्यप्रदेशसंश्लेषणं यतो भवति तद्बन्धननाम। १२। २९ ॥७०॥

**पंच संघादणामं ओरालिय तह य जाण वेउव्वं।**
**आहार तेज कम्मण सरीरसंघादणाममिदि॥७१॥**

**संघात नामकर्म के भेद**—संघात नामकर्म पाँच प्रकार का है–१. औदारिक शरीर-संघात, २. वैक्रियिक शरीर-संघात, ३. आहारक शरीर-संघात, ४. तैजस शरीर-संघात और ५. कार्मण शरीर-संघात।

**विशेषार्थ**—जिस कर्म के उदय से औदारिक आदि शरीर के परमाणु आपस में मिलकर

---

१४२. ब औदारिकौदारिक १ वैक्रियिकवैक्रियिक २ आहारकाहारक ३ तैजसतैजस ४ कार्मणकार्मण ५ इति सदृशद्विसंयोगा पञ्च प्रकृतीः परिहृत्य उद्वरितं दशसु त्रिनवत्यां निक्षिप्तासु सतीसु। १४३. ब गाथेयं नास्ति।

छिद्ररहित बन्धन को प्राप्त होकर एक रूप हो जाते हैं, उसे संघात नामकर्म कहते हैं।

**टीका**—शरीरसंघातनाम पञ्चविधम्-औदारिकशरीरसंघातनाम तथा वैक्रियिकशरीरसंघातनाम आहारशरीरसंघातनाम तैजसशरीरसंघातनाम कार्मणशरीरसंघातनामेति जानीहि।५।२४।३४। किमिदं नाम संघात इति चेत् यदुदयादौदारिकादिशरीराणां विवरविरहितानां परस्परप्रदेशानुप्रवेशेन एकत्वापादनं भवति तत्संघातनाम ॥७१॥

**समचउरस णिग्गोहं सादी कुज्जं च वामणं हुंडं।**
**संठाणं छब्भेयं इदि णिद्दिट्ठं जिणागमे जाण॥७२॥**

**संस्थान नामकर्म के भेद—**

**गाथार्थ**—संस्थान नामकर्म के छह भेद जिनागम में कहे गये हैं जो इस प्रकार जानना चाहिए—१. समचतुरस्रसंस्थान, २. न्यग्रोधसंस्थान, ३. स्वातिसंस्थान, ४. कुब्जक-संस्थान, ५. वामन-संस्थान और ६. हुण्डकसंस्थान ॥७२॥

**विशेषार्थ**—जिस कर्म के उदय से शरीर का आकार ऊपर नीचे तथा बीच में समान हो अर्थात् शरीर के अंगोपांगों की लम्बाई-चौड़ाई आदि सामुद्रिकशास्त्रानुसार यथास्थान ठीक-ठीक बने, उसे समचतुरस्रसंस्थान कहते हैं। जिस कर्म के उदय से शरीर का आकार न्यग्रोध (वट) वृक्ष के समान नाभि के ऊपर मोटा और नाभि के नीचे पतला हो, उसे न्यग्रोध परिमण्डलसंस्थान कहते हैं। जिस कर्म के उदय से शरीर का आकार साँप की वामी के सदृश ऊपर पतला और नीचे मोटा हो, उसे स्वातिसंस्थान कहते हैं। जिस कर्म के उदय से शरीर कुबड़ा हो, उसे कुब्जकसंस्थान कहते हैं। जिस कर्म के उदय से शरीर बौना हो, उसे वामनसंस्थान कहते हैं। जिस कर्म के उदय से शरीर के अंगोपांग यथायोग्य न होकर हीनाधिक परिमाण को लिये हुए भयानक आकार वाले हों, उसे हुण्डकसंस्थान कहते हैं।

**टीका**—संस्थानं षड्भेदं परमागमे निर्दिष्टं जानीहि। समचतुरस्रशरीरसंस्थाननाम न्यग्रोधपरिमण्डल-संस्थाननाम स्वातिसंस्थाननाम कुब्जकसंस्थाननाम वामनसंस्थाननाम हुण्डक-संस्थाननाम ३०।४०। किमिदं नाम संस्थानम् ? यदुदयादौदारिकादिशरीराकारो[१४४]भवति तत्संस्थानमिति। [तत्रोर्ध्वाधोमध्येषु समप्रविभागेन शरीरावयवसन्निवेशव्यवस्थापनं कुशलशिल्पिनिर्वर्तितसम-स्थितिचक्रवदवस्थानकरं] तत्सम-चतुरस्रसंस्थानम्। यत उपरि विस्तीर्णो अधःसङ्कुचित-शरीराकारो भवति तन्न्यग्रोधपरिमण्डल-संस्थाननाम। यतोऽधोविस्तीर्ण उपरि संकुचितशरीराकारो भवति तत्स्वातिसंस्थाननाम। स्वातिवाल्मीकं तत्सादृश्यात्। यतो ह्रस्वसर्वशरीराकारो भवति तत्कुब्जक-

१४४. ब शरीराकृतिनिष्पत्तिः।

संस्थाननाम। यतो दीर्घहस्तपादा ह्रस्वक-बन्धश्चैवं शरीराकारो भवति तद् वामनसंस्थानम्। यतः पाषाणैः पूर्णगौणीवद् ग्रन्थ्यादिविषमशरीराकारो भवति, तत् हुण्डक संस्थाननाम ॥७२॥

**ओरालिय वेगुव्विय आहारय अंगुवंगमिदि भणिदं।**
**अंगोवंगं तिविहं परमागमकुसलसाहूहिं॥७३॥**

**अंगोपांग नामकर्म के भेद**—परमागम में कुशल साधुओं ने अंगोपांग नामकर्म के तीन भेद कहे हैं—१. औदारिक शरीर अंगोपांग, २. वैक्रियिक शरीर अंगोपांग, ३. आहारक शरीर अंगोपांग ॥७३॥

**भावार्थ**—अंगोपांग नामकर्म के उदय से शरीर के अंग और उपांगों की रचना होती है।

**टीका**—औदारिकशरीराङ्गोपाङ्गनाम वैक्रियिकशरीराङ्गोपाङ्गनाम आहारकशरीराङ्गोपाङ्गनाम इति शरीराङ्गोपाङ्गं त्रिविधं परमागमकुशलसाधुभिर्गणधरदेवैर्भणितम् ३३।४३। यदुदयादङ्गोपाङ्गं प्रकटीभवति तदाङ्गोपाङ्गनाम। औदारिकशरीरस्य चरणद्वय-बाहुद्वय-नितम्ब-पृष्ठ-वक्षः शीर्षभेदा-दष्टाङ्गानि, अङ्गुलीकर्णनासिकाद्युपाङ्गनि करोति यत्तदौदारिकशरीराङ्गोपाङ्गनाम। एवं वैक्रियिकाऽऽहारक-शरीरयोरपि यदङ्गोपाङ्गकारकं तद्वैक्रियिकाहारकशरीराङ्गोपाङ्गनामद्वयम् ॥७३॥

**अङ्गोपाङ्गानि दर्शनार्थं गाथामाह**—

**णलया बाहू य तहा णियंब पुट्ठी उरो य सीसो य।**
**अट्ठेव दु अंगाइं देहे सेसा उवंगाइं[१४५]॥७४॥**

**शरीर के आठ अंग**—शरीर में ये आठ अंग होते हैं—दो पैर, दो हाथ, नितम्ब (कमर के पीछे का भाग), पीठ, हृदय और मस्तक। नाक, कान आदि उपांग कहलाते हैं।

**टीका**—नलकौ पादौ तथा बाहू हस्तौ एको नितम्बः एका पृष्ठिः उरोभागः शीर्षं चेत्यष्टौ अङ्गानि, शेषाणि अङ्गलीकर्णनासिकादीनि उपाङ्गानि देहे शरीरे भवन्ति ॥७४॥

**दुविहं विहायणामं पसत्थ-अपसत्थगमणमिदि णियमा।**
**वज्जरिसहणारायं वज्जंणाराय णारायं॥७५॥**

विहायोगति नामकर्म के नियम से दो भेद हैं—१. प्रशस्तविहायोगति, २. अप्रशस्तविहायोगति।

**विशेषार्थ**—जिस कर्म के उदय से जीव की चाल हाथी, बैल आदि के समान उत्तम हो, उसे प्रशस्तविहायोगति नामकर्म कहते हैं। जिस कर्म के उदय से जीव की चाल ऊँट, गधे आदि के समान बुरी हो, उसे अप्रशस्तविहायोगति नामकर्म कहते हैं।

**टीका**—विहायोगतिनाम द्विविधं द्विप्रकारं नियमात् निश्चयतः भवति। प्रशस्तविहायोगतिनाम अप्रशस्त-विहायोगतिनाम चेति। यत्कर्म विहायसि आकाशे अवकाशस्थाने गमनं करोति सा विहायोगतिः।

---

१४५. गोम्मटसार कर्मकाण्ड २८।

गजवृषभहंसादिवत् प्रशस्तं मनोज्ञं गमनं करोति सा प्रशस्तविहायोगतिनाम। खरोष्ट्रमार्जारादिवद-प्रशस्तममनोज्ञं गमनं करोति साऽप्रशस्तविहायोगतिनाम। ८। ४६ ॥७५॥

**अपरार्धगाथां वक्ष्यमाणगाथाग्रे भणिष्यामः—**

**तह अद्धं णारायं कीलिय संपत्तपुव्व सेवट्टं।**
**इति संहडणं छव्विहमणाइणिहणारिसे भणिदं॥७६॥**

**अब संहनन नामकर्म के भेद कहते हैं—**अनादिनिधन आर्ष में संहनन नामकर्म छह प्रकार का कहा गया है—१. वज्रवृषभ-नाराचसंहनन, २. वज्रनाराचसंहनन, ३. नाराचसंहनन, ४. अर्धनाराचसंहनन, ५. कीलकसंहनन और ६. असम्प्राप्ता-सृपाटिकासंहनन।

**टीका—**पूर्वोक्तगाथापरार्धे वज्जरिसहेत्यादि "वज्जरिसहणारायं वज्जणारायं णारायं" इति; वज्रवृषभनाराच-शरीरसंहनननाम वज्रनाराचशरीरसंहनननाम नाराचशरीरसंहनननाम अर्धनाराचशरीर-संहनननाम कीलितशरीरसंहनननाम असम्प्राप्तासृपाटिकाशरीरसंहनननाम इति संहननं षड्विधं अनादिनिधनेन ऋषिणा[१४६] भणितं आद्यन्तरहितेन ऋद्धिप्राप्तेन वृषभदेवेन कथितम्। ९। ४२। ५२ तेषां षट्संहनननानां विचारमाह-यस्योदयादस्थिबन्धनविशेषो भवति तत्संहनननाम। संहननमस्थिसंचयः, ऋषभो वेष्टनम्। वज्रवदभेद्यत्वाद् वज्रऋषभः। वज्रवन्नाराचो वज्रनाराचः। तौ द्वौ वज्रनाराचौ अपि यस्मिन् वज्रशरीरे संहनने [तद्] वज्रऋषभनाराचशरीरसंहननं नाम। एष एव वज्रास्थिबन्धो वज्रऋषभवर्जितः सामान्यवृषभ-वेष्टितो यस्योदयेन भवति तद् वज्रनाराचशरीरसंहनननाम। यस्य कर्मण उदयेन वज्रवृषभविशेषेण रहिता नाराचकीलिता अस्थिसन्धयो भवन्ति तन्नाराचशरीरसंहनननाम। यस्य कर्मण श्चोदयेनास्थिसन्धयो नाराचेनार्धं कीलिता भवन्ति तदर्धनाराचशरीरसंहनननाम। यस्योदयाद्वज्रास्थीनि कीलितानि भवन्ति तत्कीलितशरीरसंहनननाम। यस्योदयेनान्योन्यासम्प्राप्तानि सरीसृपसंहननवच्छिरा-बन्धनानि अस्थीनि भवन्ति तदसम्प्राप्तासृपाटिकाशरीरसंहनननाम ६[१४७]॥७६॥

**प्रत्येकसंहननस्वरूपकथनार्थं गाथाषट्कं प्राह—**

**जस्स [१४८]कम्मस्स उदए वज्जमयं अट्ठि रिसह णारायं।**
**तं संहडणं भणियं [१४९]वज्जरिसहणारायणाममिदि॥७७॥**

**वज्रवृषभनाराच संहनन का स्वरूप—**जिस कर्म के उदय से वज्रमय हड्डी ऋषभ (वेष्ठन) और नाराच (कील) हों, उसे वज्रवृषभनाराचसंहनन कहते हैं।

**टीका—**यस्य कर्मण उदये सति वज्रमयं वज्रवदभेद्यं अस्थिवृषभनाराचं तत्संहननं वज्रवृषभ-नाराचनामेति भणितम् ॥७७॥

---

१४६. विचिन्त्योऽयमर्थः। १४७. टीका प्रति में इस स्थल पर संहननों के चित्र दिये गये हैं, उन्हें परिशिष्ट में देखिए। १४८. त कम्मस्स जस्स। १४९. त णामेण य वज्जरिसहणारायं।

**जस्सुदए वज्जमयं अट्ठी णारायमेव सामण्णं।**
**रिसहो तस्संहडणं णामेण य वज्जणारायं॥७८॥**

**वज्रनाराचसंहनन का स्वरूप**—जिस कर्म के उदय से वज्रमय हड्डी और कीलें हों किन्तु वेष्ठन सामान्य हो अर्थात् वज्रमय न हो, उसे वज्रनाराचसंहनन कहते हैं।

**टीका**—यस्य कर्मण उदयेन वज्रमयं अस्थि नाराचमेव द्वयं भवति सामान्यवृषभः। कोऽर्थः ? वज्रवद्दृढतररहितऋषभः सामान्यवेष्टनमित्यर्थः। तत्संहननं नाम्ना च वज्रनाराचं भणितम् ॥७८॥

**जस्सुदए वज्जमया हड्डा वो[१५०] वज्जरहिदणारायं।**
**रिसहो तं भणियव्वं णारायसरीरसंहडणं॥७९॥**

**नाराचसंहनन का स्वरूप**—जिस कर्म के उदय से हड्डियाँ तो वज्रमय हों किन्तु वेष्ठन और कीलें वज्रमय न हों, उसे नाराचशरीरसंहनन कहना चाहिए।

**टीका**—यस्य कर्मण उदयेन वज्रमयानि हड्डानि। वा पादपूरणे, उ अहो। नाराचो वज्ररहितः, पुनः वृषभः वज्ररहितः तन्नाराचसंहननं भणितव्यम् ॥७९॥

**वज्जविसेसणरहिदा अट्ठीओ अद्धविद्धणारायं।**
**जस्सुदए तं भणियं णामेण य अद्धणारायं॥८०॥**

**अर्धनाराचसंहनन का स्वरूप**—जिस कर्म के उदय से हड्डियाँ वज्रविशेषण से रहित हों और शरीर के अर्धभाग में कीलें लगी हों, उसे अर्धनाराचसंहनन कहते हैं।

**टीका**—यस्य कर्मण उदयेन वज्रविशेषणरहिताः अस्थिसन्धयः नाराचेन अर्धविद्धाः। कोऽर्थः? नाराचेनार्धं कीलिता इत्यर्थः। तन्नाम्ना अर्धनाराचसंहननं भणितम् ॥८०॥

**[१५१]जस्स कम्मस्स उदए अवज्जहड्डाइं खीलियाइं व।**
**दिढबंधाणि हवंति हु तं कीलियणामसंहडणं॥८१॥**

**कीलिकसंहनन का स्वरूप**—जिस कर्म के उदय से हड्डियाँ और कीलें वज्रमय न हों किन्तु हड्डियों में कीलें दृढ़ बन्धन वाली लगी हों, उसे कीलकसंहनन कहते हैं।

**टीका**—यस्य कर्मण उदयेन अवज्रास्थीनि कीलितानीव दृढबन्धनानि भवन्ति, हु स्फुटं तत्कीलिकनाम संहननं भवति ॥८१॥

**जस्स कम्मस्स उदए अण्णोण्णमसंपत्तहड्डसंधीओ।**
**णरसिर-बंधाणि हवे तं खु असंपत्तसेवट्टं॥८२॥**

**सृपाटिकासंहनन का स्वरूप**—जिस कर्म के उदय से हड्डियों की सन्धियाँ परस्पर में भिन्न हों

१५०. आ ओ। १५१. त कम्मस्स जस्स।

और नसों से बँधी हुई हों, उसे असम्प्राप्तासृपाटिकासंहनन कहते हैं।

**टीका**—यस्य कर्मण उदयेन अन्योन्यासम्प्राप्तास्थिसन्धयः सरीसृपवत् नरशिराबद्धाः खु स्फुटं तदसम्प्राप्तासृपाटिकं भवेत् ॥८२॥

**तेषां [संहननानां] कार्यमाह—**

**सेवट्टेण य गम्मइ आदीदो चदुसु कप्पजुगलो त्ति।**
**तत्तो दुजुगलजुगले कीलियणारायणद्धोत्ति[152]॥८३॥**

**अब उक्त संहनन वाले जीव स्वर्ग में कहाँ तक उत्पन्न हो सकते हैं यह बतलाते हैं**—सृपाटिका संहनन वाले जीव यदि स्वर्गों में उत्पन्न हों तो आदि स्वर्ग-युगल (सौधर्म-ऐशान) से लगाकर चौथे कल्पयुगल (लान्तव-कापिष्ठ) तक चार युगलों में अर्थात् आठवें स्वर्ग तक उत्पन्न हो सकते हैं। पुनः दो-दो युगलों में कीलक और अर्धनाराच संहनन वाले जीव जन्म धारण करते हैं अर्थात् पाँचवें छठे स्वर्ग युगल में कीलक संहनन वाले और सातवें तथा आठवें स्वर्गयुगल में अर्धनाराच संहनन वाले जन्म ले सकते हैं।

**टीका**—सृपाटिकासंहननेन सौधर्मद्वयाल्लान्तवद्वयपर्यन्तं चतुर्षु युगलेषु समुत्पद्यते। तत उपरि युग्मद्वये क्रमेण कीलिकार्धनाराचसंहननाभ्यामुत्पद्यते। तद्यथा-असंप्राप्तासृपाटिकासंहननेन षष्ठेन जीवेन सौधर्मस्वर्गमारभ्य कापिष्ठस्वर्गपर्यन्तं ८ गम्यते। कीलिकासंहननेन पञ्चमेन जीवेन सहस्रारस्वर्गपर्यन्तं १२ गम्यते। चतुर्थेन अर्धनाराचसंहननेन अच्युतस्वर्गपर्यन्तं १६ गम्यते ॥८३॥

**[153]गेविज्जाणुदिसाणुत्तरवासीसु जंति ते[154] णियमा।**
**तिदुगेगे संहडणे णारायणमादिगे कमसो[155]॥८४॥**

नाराच आदि तीन संहनन वाले वज्रनाराच आदि दो संहनन वाले तथा वज्रऋषभनाराचसंहनन वाले जीव क्रमशः नौ ग्रैवेयकों में नौ अनुदिशों में और अनुत्तर विमानवासी देवों में उत्पन्न हो सकते हैं अर्थात् आदि के तीन संहनन वाले नौ ग्रैवेयकों तक, आदि के दो संहनन वाले नौ अनुदिशों तक और प्रथम संहनन वाले जीव पंच अनुत्तर विमानों तक जन्म ले सकते हैं।

**टीका**—नाराचादिना संहननेन त्रयेण वज्रनाराचद्वयेन वज्रवृषभनाराचैकेन चोपलक्षिताः ते जीवाः क्रमशः अनुक्रमेण नवग्रैवेयक-नवानुदिशपञ्चानुत्तरविमानेषु मोक्षे चोत्पद्यन्ते ॥८४॥

**सण्णी छस्संहडणो वच्चइ मेघं तदो परं चावि।**
**सेवट्टादीरहिदो पण-पण-चदुरेगसंहडणो[156]॥८५॥**

**अब किस संहनन वाले जीव किस नरक तक उत्पन्न हो सकते हैं, यह बतलाते हैं**—छहों

१५२. गोम्मटसार कर्मकाण्ड २९। १५३. त णवगेवेज्जाणुद्दिसपंचाणुत्तरविमाण ते जांति। १५४. ज मे।
१५५. गोम्मटसार कर्मकाण्ड ३०। १५६. गोम्मटसार कर्मकाण्ड ३१।

संहनन वाले संज्ञी जीव यदि नरक में जन्म लेवें तो मेघा नामक तीसरे नरक तक जा सकते हैं। सृपाटिका संहनन रहित पाँच संहनन वाले अरिष्टा नामक पाँचवें नरक तक उत्पन्न हो सकते हैं। आदि के चार संहनन वाले जीव छटवें मघवी नामक नरक तक और वज्रवृषभनाराच संहनन वाले सातवें माघवी नामक नरक तक उत्पन्न हो सकते हैं।

**टीका**—संज्ञी जीवः षट्संहननः मेघां व्रजति, तृतीयपृथ्वीपर्यन्तमुत्पद्यत इत्यर्थः। ततः परं चापि सृपाटिकारहितः कीलिकान्तः पञ्चसंहननः अरिष्टान्तपञ्चपृथिवीषु उत्पद्यते। अर्धनाराचान्तचतुःसंहननः मघव्यन्तषट्पृथ्वीषु समुत्पद्यते। वज्रवृषभनाराचसंहननो माघव्यन्तसप्तपृथ्वीषु उत्पद्यते ॥८५॥

**घम्मा वंसा मेघा अंजण रिट्ठा तहेव अणिवज्झा।**
**छट्ठी मघवी पुढवी सत्तमिया माघवी णाम॥८६॥**

**अब सातों नरकों की पृथ्वियों के नाम बतलाते हैं**—पहली घम्मा, दूसरी वंशा, तीसरी मेघा, चौथी अंजना, पाँचवीं अरिष्टा, छट्ठी मघवी और सातवीं पृथ्वी का नाम माघवी है। ये सभी नाम अनादि-निधन एवं अनवद्य हैं।

**टीका**—घम्मा वंशा मेघा अञ्जना अरिष्टा तथैव [१५७]अनियोध्या यादृच्छिकनामानः षष्ठी मघवी पृथ्वी सप्तमिका माघवी नाम, इति सप्त नारकनामानि ॥८६॥

**अथ गुणस्थानके संहननं कथयति—**

**मिच्छापुव्वदुगादिसु सगचदुपणठाणगेसु णियमेण।**
**पढमादियाइ छत्तिगि [१५८]ओघादेसे विसेसदो णेया[१५९]॥८७॥**

**अब गुणस्थानों में संहननों का निरूपण करते हैं**—ओघ की अपेक्षा मिथ्यात्व आदि सात गुणस्थानों में छहों संहनन वाले जीव, अपूर्वकरण आदि उपशम श्रेणी के चार गुणस्थानों में आदि के तीन संहनन वाले जीव और अपूर्वकरण आदि क्षपक श्रेणी के पाँच गुणस्थानों में प्रथम संहनन वाले जीव पाये जाते हैं। आदेश अर्थात् मार्गणा स्थानों में विशेष रूप से (आगमानुसार) जानना चाहिए।

**टीका**—मिथ्यादृष्ट्यादिसप्तगुणस्थानेषु षट् संहननानि भवन्ति। द्वि-अपूर्वकरणादिषु चतुर्षूपशमक-स्थानेषु[१६०] प्रथमत्रिकं भवति। पञ्चक्षपकस्थानेषु[१६१] प्रथमसंहननम् । इति गुणस्थानेषु सामान्यनिर्देश-लक्षणौघेन। विशेषतश्च [आदेशे] ज्ञेयानि ॥८७॥

**विलयचउक्के छट्ठं षढमं तु असंखआउजीवेसु।**
**चउत्थे पंचम छट्ठे कमसो विय छत्तिगेक्क संहडणी॥८८॥**

---

१५७. ब अनियोध्या यादृच्छिकनामान आचार्याभिप्रायेण नामानः। १५८. अ ओघेण। १५९. त णेयो।
१६०. ब अपूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायोपशान्तकषायेषु उपशमश्रेणिसम्बन्धिषु वज्रवृषभादित्रयम्।
१६१. अपूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायक्षीणकषायसयोगिकेवलिषु प्रथमसंहननम्।

**जीवसमासों में संहनन का निरूपण**—विकल चतुष्क अर्थात् द्वीन्द्रिय से लेकर असंज्ञी पंचेन्द्रिय तक चार जाति के जीवों में छठा असम्प्राप्तासृपाटिका संहनन होता है। असंख्यात वर्ष की आयु वाले भोगभूमियाँ जीवों में पहला वज्रऋषभनाराचसंहनन होता है। अवसर्पिणी के चौथे काल में छहों संहनन वाले, पंचम काल में अन्तिम तीन संहनन वाले और छठे काल में अन्तिम एक सृपाटिका संहनन वाले जीव होते हैं।

**टीका**—द्वि-त्रि-चतुरिन्द्रियासंज्ञिजीवेषु षष्ठमसंप्राप्तासृपाटिकासंहननं भवति। तु पुनः प्रथमं संहननं वज्रवृषभनाराचं नागेन्द्रपर्वतात् स्वयंप्रभद्वितीयाभिधानादर्वाक् मानुषोत्तरपर्वतात्तु अर्वाक् असंख्यातजीविषु कुभोगभूमि-भोगभूमिमनुष्यतिर्यक्षु वज्रवृषभनाराचसंहननं प्रथममेव भवति। तथा [अवसर्पिण्याः] कर्मभूमौ चतुर्थकाले पञ्चमकाले षष्टकाले च क्रमेण षट् त्रीणि अन्त्यानि एकं च सृपाटिकाषष्ठं संहननानि भवन्ति ॥८८॥

**सव्वविदेहेसु तहा विज्जाहर-मिलिच्छमणुय-तिरिएसु[१६२]।**
**छस्संहडणा भणिया णगिंदपरदो य तिरिएसु॥८९॥**

सम्पूर्ण विदेह क्षेत्रों में तथा विद्याधर म्लेच्छ मनुष्यों में और तिर्यंचों में छहों संहनन वाले जीव कहे गये हैं। नागेन्द्र पर्वत से परवर्ती तिर्यंचों में भी छहों संहनन कहे गये हैं।

**टीका**—भरतैरावतास्थिरकालभावादुक्तम्। सर्वविदेहेषु विद्याधरश्रेणि-म्लेच्छखण्डमनुष्य-तिर्यक्षु मानुषोत्तर-पर्वतवत् स्वयंप्रभद्वीपमध्यं मर्यादीकृत्य नागेन्द्रनामा पर्वतोऽस्ति। तस्मात् नागेन्द्रपर्वतात्परतः स्वयंभूरमण-समुद्रपर्यन्तं तिर्यक्षु च वज्रवृषभनाराचाद्यानि सृपाटिकापर्यन्तानि षट् संहननानि भवन्ति ॥८९॥

**अंतिमतिगसंहडणस्सुदओ पुण कम्मभूमिमहिलाणं।**
**आदिमतियसंहडणं णत्थि त्ति जिणेहिं णिद्दिट्ठं[१६३]॥९०॥**

**कर्मभूमिज स्त्रियों के संहनन का वर्णन**—कर्मभूमि की महिलाओं के अन्तिम तीन संहननों का उदय होता है, उनके आदि के तीन संहनन नहीं होते ऐसे जिनेन्द्र देवों ने कहा है।

**टीका**—कर्मभूमिद्रव्यस्त्रीणां अन्तिमत्रिकसंहनननानामुदयो भवति। अर्धनाराच कीलिका सृपाटिका संहननत्रिकं कर्मभूमिद्रव्यस्त्रीणां भवतीत्यर्थः। पुनस्तासां आदिमत्रिकसंहननोदयो नास्तीति जिनैर्निर्दिष्टम्। वज्रवृषभनाराच वज्रनाराच नाराच संहननत्रिकं कर्मभूद्रव्यस्त्रीणां न भवतीत्यर्थः। तत्रार्धनाराचसंहननेन तासां षष्ठनरके[१६४] उत्पादः, अच्युतस्वर्गपर्यन्ते च तासामुत्पादो भवति। न तु नवग्रैवेयकादिषु मोक्षे चोत्पादः। संहनननानामधिकारं प्राप्यान्यग्रन्थोक्तसंहननादि[१६५] विशेषमाह—

---

१६२. त सव्वविदेहे विज्जाहरे मिलिच्छे य मणुसतिरिएसु। १६३. गोम्मटसार कर्मकाण्ड ३२। १६४. ब षष्ठभूमौ। १६५. ब संहननविशेष।

**सण्णी छस्संहडणी उववादिगवज्जिया हु जायंति।**
**उड्ढाधतिरियलोए दव्वादिसु जोगमासेज्ज ॥१०॥**

**टीका—**संज्ञिनो जीवा औपपादिकदेवनारकवर्जिताः षट्संहनना भवन्ति-वज्रवृषभनाराचं वज्रनाराचं [नाराचं] अर्धनाराचं अर्धमस्थि भित्वा स्थितमर्धनाराचम् कीलिकाऽस्थिरहिता मांसमध्ये स्थिता असृक्पाटिका अंबिलिका[१६६] बहिस्त्वगावृतं संहननम् इति षट् संहननाः सन्तः द्रव्यादियोगमाश्रित्य ऊर्ध्वाधस्तिर्यग्लोकेषूत्पद्यन्ते।

**लद्धियपज्जत्ताणं चरिमं सव्वाण होदि हु तसाणं।**
**परिहारसंजमम्मि हु पढमतियं जिणवरुद्दिट्ठं ॥११॥**

लब्धिविषयेऽपर्याप्ता येषां पर्याप्तिलब्धिर्न भविष्यतीत्यर्थः। तेषां लब्ध्यपर्याप्तानां सर्वत्रसानां च असृपाटिकाभिधानं चरमसंहननं भवति। परिहारविशुद्धिसंयतेषु प्रथमसंहननत्रिकं जिनोक्तम्।

अथ च संहननरहिताः के भवन्तीत्याह—

**अणाहारऽलेसकम्मे वेउव्वाहारऽजोग एयक्खे।**
**संघडणाणमभावो आदेसपरूवणे जाण ॥१२॥**

अनाहारकेषु संहननानामभावः। के अनाहारका इति चेदाह—

**विग्गहगइमावण्णा समुग्घया हु केवली अयोगी य।**
**एदे हु अणाहारा सेसा आहारया जीवा[१६७]॥१३॥**

अलेश्येषु सिद्धेषु कार्मण-वैक्रियकाऽऽहारकशरीरेषु अयोगिकेवलिषु एकाक्षेषु च संहननाभावः आदेशप्ररूपणे गुणजीवेत्यादिविंशतिप्ररूपणायां जानीहि।

**पंच य वण्णा सेदं पीदं हरिदरुणकिण्णवण्णमिदि।**
**गंधं दुविहं लोए सुगंध-दुग्गंधमिदि जाणे॥९१॥**

**अब नामकर्म के शेष भेदों का प्रतिपादन करते हैं—**जिस कर्म के उदय से शरीर में श्वेत आदि वर्ण उत्पन्न हों, उसे वर्ण नामकर्म कहते हैं। वर्ण नामकर्म के पाँच भेद हैं—श्वेत, पीत, हरित, अरुण (लाल) और कृष्णवर्ण नामकर्म। जिस कर्म के उदय से शरीर में गन्ध उत्पन्न होती है, उसे गन्धनामकर्म कहते हैं। गन्ध नामकर्म लोक में सुगन्ध और दुर्गन्ध ये दो प्रकार का जानना चाहिए।

**टीका—**श्वेत-पीत-हरितारुण-कृष्णवर्णा इति पञ्च वर्णाः भवन्ति, यद्धेतुको वर्णविकार-स्तद्वर्णनाम।* वा स्वशरीराणां श्वेतादिवर्णान् यत्करोति तद्वर्णनाम*। १०। ४०। ५७ लोके गन्धनाम द्विविधम्-सुगन्धनाम १ दुर्गन्धनामेति २ जानीहि। यदुदयात्प्रभवो गन्धस्तद्गन्धनाम। *वा स्व-स्वशरीराणां स्व-स्वगन्धं करोति यत्तद्गन्धनाम* ११। ४९। ५९ ॥९१॥

---

१६६. ब चीचिंणी। १६७. गोम्मटसार जीवकाण्ड ६६५। * ब प्रतौ चिन्हान्तर्गतपाठो न विद्यते।

**तित्तं कडुय कसायं अंबिल महुरमिदि पंच रसणामं।**
**मउगं कक्कस गुरु लघु सीदुण्हं णिद्ध रुक्खमिदि॥९२॥**

जिस कर्म के उदय से शरीर में मधुर आदि रस उत्पन्न होते हैं, उसे रस नामकर्म कहते हैं। रस नामकर्म पाँच प्रकार का है—तिक्त (चरपरा), कटु, कषाय (कसैला), आम्ल (खट्टा) और मधुर (मीठा) रस नामकर्म। जिस कर्म के उदय से शरीर में कोमल कठोर आदि स्पर्श उत्पन्न होते हैं, उसे स्पर्श नामकर्म कहते हैं। स्पर्श नामकर्म के आठ भेद हैं—मृदु (कोमल), कर्कश (कठोर), गुरु (भारी), लघु (हल्का), शीत (ठण्डा), उष्ण (गर्म), स्निग्ध (चिकना) और रूक्ष (रूखा)।

**टीका—**यन्निमित्तो रसविकल्पस्तद्रसनाम।❋ वा स्वशरीराणां स्वस्वरसं करोति यत्तद्रसनाम।❋ तत्पञ्चविधम्-तिक्तनाम कटुकनाम कषायनाम आम्लनाम मधुरनाम।❋ लवणो नाम रसो लौकिकः षष्ठोऽस्ति, स, मधुररसभेद एवेति परमागमे पृथक् नोक्तः। लवणं विना इतररसानां स्वादुत्वाभावात्❋। १२। ५४। ६४। यस्योदयात्स्पर्शप्रादुर्भावः [तत्स्पर्शनाम]। ❋वा स्वशरीराणां स्व-स्वस्पर्शं करोति❋। तत्स्पर्शनामाष्ट-विकल्पम्-मृदुनाम कर्कशनाम लघुनाम गुरुनाम शीतनाम उष्णनाम स्निग्धनाम रूक्षनाम चेति स्पर्शनामाष्टविकल्पमिति पदमग्रगाथास्थम्। १३। ६२। ७२ ॥९२॥

**फासं अट्ठवियप्पं चत्तारि आणुपुव्वि अणुकमसो।**
**णिरयाणू तिरियाणू णराणु देवाणुपुव्वि त्ति ॥९३॥**

जिस कर्म के उदय से विग्रहगति में पूर्व शरीर का आकार बना रहता है, उसे आनुपूर्वी नामकर्म कहते हैं। आनुपूर्वी नामकर्म के अनुक्रम से ये चार भेद जानना चाहिए—नरकगत्यानुपूर्वी, तिर्यग्गत्यानुपूर्वी, मनुष्यगत्यानुपूर्वी और देवगत्यानुपूर्वी।

**टीका—**पूर्वशरीराकाराविनाशो यस्योदयाद् भवति तदानुपूर्व्यं नाम। चत्वारि आनुपूर्व्याणि अनुक्रमेण नरकगतिप्रायोग्यानुपूर्व्यनाम तिर्यग्गतिप्रायोग्यानुपूर्व्यनाम मनुष्यगतिप्रायोग्यानुपूर्व्यनाम देवगति-प्रायोग्यानुपूर्व्यनाम चेति। १४। ६६। ७६॥९३॥

**एदा चउदस[१६८] पिंडा [१६९]पयडीओ वण्णिदा समासेण।**
**एत्तो[१७०] अपिंडपयडी अडवीसं वण्णइस्सामि ॥९४॥**

इस प्रकार उपर्युक्त चौदह पिण्डप्रकृतियों का संक्षेप से वर्णन किया। अब इससे आगे अट्ठाईस अपिण्ड प्रकृतियों का वर्णन करेंगे।

**टीका—**एताश्चतुर्दश पिण्डप्रकृतयः १४ समासेन वर्णिताः। अतः परं अपिण्डप्रकृतिरष्टाविंशतिः ताः वयं वर्णयिष्यामः॥९४॥

---

१६८. त चोद्दस। १६९. पिंडप्पयडीओ। १७०. आ इत्तो, त एत्तोऽपिंडप्पयडी। ❋ ब प्रतौ चिन्हान्तर्गतपाठो न विद्यते।

**अगुरुलहुग उवघादं परघादं च जाण उस्सासं।**
**आदावं उज्जोवं छप्पयडी अगुरुछक्कमिदि॥९५॥**

**अगुरुलघुषट्क का स्वरूप**—अगुरुलघु, उपघात, परघात, उच्छ्वास, आतप और उद्योत। इन छह प्रकृतियों को अगुरुषट्क जानना चाहिए।

**विशेषार्थ**—जिस कर्म के उदय से जीव का शरीर लोहे के पिण्ड समान न तो इतना भारी हो जो नीचे गिर जाये और न अर्क-तूल (आकड़े की रुई) के समान इतना हलका हो कि आकाश में उड़ जाय, ऐसे अगुरुलघु अर्थात् गुरुता-लघुता से रहित शरीर की प्राप्ति जिस कर्म के उदय से होती है, उसे अगुरुलघु नामकर्म कहते हैं। जिस कर्म के उदय से अपना ही घात करने वाले शरीर के अवयव हों, उसे उपघातनामकर्म कहते हैं। जैसे बारह सिंगे के सींग होना, पेट की तोंद निकलना, भारी लम्बे स्तन होना आदि उपघातकर्म के उदय से ही उत्पन्न होते हैं। जिस कर्म के उदय से दूसरे के घात करने वाले अवयव होते हैं, उसे परघातनामकर्म कहते हैं। जैसे शेर-चीते आदि की विकराल दाढ़ें, पंजे के तीक्ष्य नख होना, साँप की दाढ़ और बिच्छू की पूँछ में विष होना आदि। जिस कर्म के उदय से जीव श्वास और उच्छ्वास लेता है, उसे उच्छ्वास नामकर्म कहते हैं। जिस कर्म के उदय से जीव का शरीर स्वयं उष्णता-रहित किन्तु प्रभा उष्णता-सहित प्रकाशमान होती है, उसे आतपनामकर्म कहते हैं। इस कर्म का उदय सूर्य मण्डल के पृथ्वीकायिक जीवों के होता है। जिस कर्म के उदय से स्वयं शीतल रहते हुए भी शरीर की प्रभा भी शीतल एवं प्रकाशमान होती है, वह उद्योतनामकर्म है। उद्योत नामकर्म का उदय चन्द्रबिम्ब के पृथ्वीकायिक जीवों में, जुगुनुओं में एवं अन्य भी तिर्यंचों में पाया जाता है। इन छह प्रकृतियों की आगम में 'अगुरुषट्क' संज्ञा है अर्थात् जहाँ पर अगुरुषट्क का उल्लेख आवे वहाँ पर उपर्युक्त छह प्रकृतियों को लेना चाहिए।

**टीका**—अगुरुलघुकं उपघातः परघातः उच्छ्वासः आतपः उद्योतः इति षट् प्रकृतयः। एतासां आगमे 'अगुरुषट्कसंज्ञा' [इति हे शिष्य त्वं] जानीहि। २०। ७२। ८२। यस्योदयात् अयःपिण्डवत् गुरुत्वात् न च पतति, न चार्कतूलवत् लघुत्वादूर्ध्वं गच्छति तदगुरुलघुनाम। उपेत्य घात इत्युपघातः, आत्मघात इत्यर्थः। यस्योदयादात्मघातावयवा महाशृङ्ग-लम्बस्तन-तुन्दोदरादयो भवन्ति, तदुपघातनाम। परेषां घातः परघातः। यदुदयात्तीक्ष्णशृङ्ग-नखविषसर्पदाढादयो भवन्ति अवयवास्तत्परघातनाम। यद्धेतुरुच्छ्वासस्त-दुच्छ्वासनाम। यदुदयात् निर्वृत्तमातपनं तदातपनाम। तदप्यादित्यबिम्बोत्पन्नबादर-पर्याप्तपृथ्वीकायिक-जीवेष्वेव वर्त्तते। यस्योदयात् उद्योतनं तदुद्योतनाम। तच्चन्द्रे खद्योतादिषु च वर्तते ॥९५॥

तदातपोद्योतस्थानगाथामाह—

**मूलुण्हपहा अग्गी आदावो होदि उण्हसहियपहा।**
**आइच्चे तेरिच्छे उण्हूणपहा हु उज्जोवो[१७१]॥९६॥**

**अब अग्नि, आतप और उद्योत प्रकृति में अन्तर बताते हैं—**अग्नि की मूल और प्रभा दोनों उष्ण होते हैं अतः अग्नि के उष्ण स्पर्शनामकर्म का उदय जानना चाहिए, किन्तु जिसके आतप नामकर्म का उदय होता है उसका मूल तो शीतल होता है पर प्रभा उष्णतासहित होती है। इस आतपनामकर्म का उदय सूर्य के बिम्ब में उत्पन्न हुए बादरपर्याप्त पृथ्वीकायिक तिर्यंच जीवों के होता है। जिसके उद्योतनामकर्म का उदय होता है उसका मूल और प्रभा ये दोनों ही उष्णतारहित अर्थात् शीतल होते हैं। इस नामकर्म का उदय चन्द्रबिम्ब में उत्पन्न होने वाले पृथ्वीकायिक जीवों में तथा खद्योत (जुगुनू) आदि विशेष तिर्यंचों में होता है।

**टीका—**मूले उष्णप्रभः अग्निः, उष्णसहितप्रभः आतपः। स चादित्यबिम्बोत्पन्नबादर-पर्याप्तपृथ्वीकायतिरश्चि भवति। उष्णरहितप्रभः शीतलप्रभ उद्योतः। स चन्द्रखद्योतादिषु भवति ॥९६॥

**तस थावरं च बादर सुहुमं पज्जत्त तह अपज्जत्तं।**
**पत्तेयसरीरं पुण साहारणसरीर थिरमथिरं ॥९७॥**
**सुह असुह सुहग दुब्भग सुस्सर दुस्सर तहेव णायव्वा।**
**आदिज्जमणादिज्जं[१७२] जस अजसकित्ति णिमिण तित्थयरं ॥९८॥**

**अपिण्ड प्रकृतियों का निरूपण—**त्रस-स्थावर, बादर-सूक्ष्म, पर्याप्त-अपर्याप्त, प्रत्येकशरीर-साधारणशरीर, स्थिर-अस्थिर शुभ-अशुभ, सुभग-दुर्भग, सुस्वर-दुःस्वर, आदेय-अनादेय, यशःकीर्ति-अयशःकीर्ति, निर्माण और तीर्थंकर ये शेष अपिण्ड प्रकृतियाँ जानना चाहिए।

**टीका—**त्रसप्रकृतिनाम स्थावरप्रकृतिनाम बादरप्रकृतिनाम। सूक्ष्मप्रकृतिनाम पर्याप्तप्रकृतिनाम तथा अपर्याप्तप्रकृतिनाम प्रत्येकशरीरनाम पुनः साधारणशरीरप्रकृतिनाम स्थिरप्रकृतिनाम अस्थिरप्रकृतिः शुभनाम अशुभनाम सुभगनाम दुर्भगनाम सुस्वरनाम दुःस्वरनाम तथैव आदेयनाम अनादेयनाम यशःकीर्त्तिनाम अयशःकीर्तिनामः निर्माणनाम तीर्थकरनाम इति ज्ञातव्याः ॥९७-९८॥

**तस बादर पज्जत्तं पत्तेयसरीर थिर सुहं सुभगं[१७३]।**
**सुस्सर आदिज्जं पुण जसकित्ति णिमिण तित्थयरं॥९९॥**
**[तसद्वादसयं]**

**त्रस द्वादशक का निरूपण—**त्रस, बादर, पर्याप्त, प्रत्येक शरीर, स्थिर, शुभ, सुभग, सुस्वर,

---

१७१. गोम्मटसार कर्मकाण्ड ३३। १७२. त आदेज्जमणादेज्जं। १७३. त सुहगं।

आदेय, यशःकीर्ति, निर्माण और तीर्थंकर इन बारह प्रकृतियों को त्रस-द्वादशक कहते हैं।

**विशेषार्थ**—जिस कर्म के उदय से द्वीन्द्रियादि विकलेन्द्रिय या सकलेन्द्रिय जीवों में जन्म हो, उसे त्रस नामकर्म कहते हैं। जिस कर्म के उदय से अन्य जीवों को आघात करने वाला शरीर हो, उसे बादर नामकर्म कहते हैं। जिस कर्म के उदय से आहार आदि पर्याप्तियों की पूर्णता हो, उसे पर्याप्त नामकर्म कहते हैं। पर्याप्तियों के छह भेद हैं—आहारपर्याप्ति, शरीरपर्याप्ति, इन्द्रियपर्याप्ति, उच्छ्वासपर्याप्ति, भाषापर्याप्ति और मनःपर्याप्ति। आहारवर्गणा के पुद्गलस्कन्धों का खल और रस रूप से परिणत होने की शक्ति पाना आहारपर्याप्ति है। खल भाग को हड्डी आदि कठिन अवयवों के रूप में और रस भाग को रक्त आदि के रूप में परिणमन की शक्ति पाना शरीर पर्याप्ति है। आहार वर्गणा के पुद्गलस्कन्धों का इन्द्रियों के आकार परिणमन करने की शक्ति पाना इन्द्रियपर्याप्ति है। आहार वर्गणा के पुद्गलों को श्वास-उच्छ्वास के रूप में परिणमन की शक्ति पाना श्वासोच्छ्वासपर्याप्ति है। भाषावर्गणा के पुद्गलस्कन्धों को वचन रूप से परिणमन की शक्ति पाना भाषापर्याप्ति है। मनोवर्गणा के पुद्गलस्कन्धों का विचार करने वाले मन के रूप में परिणमन की शक्ति पाना मनःपर्याप्ति है। इनमें से एकेन्द्रिय जीवों के ४, विकलेन्द्रियों के ५ और संज्ञी जीवों के ६ पर्याप्तियाँ होती हैं। जिस कर्म के उदय से एक शरीर का स्वामी एक ही जीव हो, उसे प्रत्येक शरीर नामकर्म कहते हैं। जिस कर्म के उदय से शरीर के धातु-उपधातु यथास्थान स्थिर रहें, वह स्थिर नामकर्म है। जिस कर्म के उदय से शरीर के अवयव सुन्दर हों, वह शुभ नामकर्म है। जिस कर्म के उदय से जीव दूसरों का प्रीतिभाजन हो, वह सुभग नामकर्म है। जिस कर्म के उदय से स्वर उत्तम हो, वह सुस्वर नामकर्म है। जिस कर्म के उदय से शरीर में प्रभा-कान्ति हो, वह आदेय नामकर्म है। जिस कर्म के उदय से यश फैले, वह यशः कीर्ति नामकर्म है। जिस कर्म के उदय से शरीर के अंग-उपांग यथास्थान और यथाप्रमाण उत्पन्न हों, वह निर्माण नामकर्म है। जिस कर्म के उदय से जीव त्रिलोकपूजित तीर्थंकर पद को पावे, वह तीर्थंकर नामकर्म है। आगम में उक्त १२ प्रकृतियों की संज्ञा त्रस-द्वादशक है।

**टीका**—त्रस बादर पर्याप्त प्रत्येकशरीर स्थिर शुभ सुभग सुस्वर आदेय यशःकीर्त्ति निर्माण तीर्थकरनामेति द्वादशप्रकृतयः त्रसद्वादशकमिति संज्ञा[१७४] परमागमे भण्यते। एतासां द्वादशप्रकृतीनां व्युत्पत्तिपूर्वकनामान्याहयदुदयाद् द्वीन्द्रियादिषु जन्म तत् त्रसनाम । यदुदयादन्यबाधाकरं शरीरं भवति तद् बादरनाम। यदुदयादाहारदिपर्याप्तिनिर्वृत्तिस्तत्पर्याप्तिनाम। तत् षड्विधम्—आहारशरीरेन्द्रियोच्छ्वास-निःश्वासभाषामनःसम्बन्धेन षोढा भवतीत्यर्थः। तत्र आहारवर्गणाऽऽयातपुद्गलस्कन्धानां खलरस-भागरूपेण परिणमने आत्मनः शक्तिनिष्पत्तिराहारपर्याप्तिः। खलभागमस्थ्यादिकठिनावयवरूपेण रसभागं च रसरुधिरादिद्रवावयवरूपेण परिणमयितुं जीवस्य शक्तिनिष्पत्तिः शरीरपर्याप्तिः। स्पर्शनादीन्द्रियाणां

१७४. ब सिद्धान्ते।

योग्यदेशावस्थितस्वस्वविषयग्रहणे जीवस्य शक्तिनिष्पत्तिः इन्द्रियपर्याप्तिः। आहारवर्गणाऽऽयात-पुद्गलस्कन्धान् उच्छ्वासनिःश्वासरूपेण परिणमयितुं जीवस्य शक्तिनिष्पत्तिरुच्छ्वास-निःश्वासपर्याप्तिः। भाषावर्गणाऽऽयातपुद्गलस्कन्धान् सत्यादिचतुर्विधवाक्स्वरूपेण परिणमयितुं जीवशक्तिनिष्पत्तिः भाषापर्याप्तिः। दृष्टश्रुतानुमितार्थानां गुणदोषविचारणादिरूपभावमनःपरिणमने मनोवर्गणाऽऽयात-पुद्गलस्कन्धान् द्रव्यमनोरूपपरिणामेन परिणमयितुं जीवस्य शक्तिनिष्पत्तिर्मनःपर्याप्तिः। षट्मिलिता एका पर्याप्तिप्रकृतिः। शरीरनामकर्मोदयान्निर्वर्त्यमानशरीरमेकात्मोपभोगकारणं यतो भवति, तत्प्रत्येक-शरीरनाम । यस्योदयाद् रसादिधातू-पधातूनां स्वस्वस्थाने स्थिरभावनिर्वर्तनं भवति तत्स्थिरनाम।

तदुक्तञ्च—

**रसाद्रक्तं ततो मांसं मांसान्मेदः प्रवर्तते।**
**मेदतोऽस्थि ततो मज्जं मज्जाच्छुक्रं ततः प्रजाः[175]॥१४॥**
**वातः पित्तं तथा श्लेष्माशिरास्नायुश्च चर्म च।**
**जठराग्निरिति प्राज्ञैः प्रोक्ताः सप्तोपधातवः॥१५॥**

धातु प्रमाण ७ फल दिन ३० इच्छा धातु १ लब्ध दिन ४ २/७।

यदुदयाद्रमणीया मस्तकादिप्रशस्तावयवा भवन्ति, तच्छुभनाम। यदुदयादन्यप्रीति-प्रभवस्तत्सुभगनाम। यस्मान्निमित्ताज्जीवस्य मनोज्ञस्वरनिर्वर्तनं भवति तत्सुस्वरनाम। प्रभोपेतशरीर-कारणमादेयनाम। पुण्यगुणख्यापनकारणं यशस्कीर्तिनाम । यन्निमित्तात्परिनिष्पत्तिस्तन्निर्माणनाम। तद्विविधम्-स्थाननिर्माणं प्रमाणनिर्माणं चेति। तत्र जातिनामोदयापेक्षं चक्षुरादीनां स्थानं प्रमाणं च निर्वर्तयति, निर्मीयतेऽनेनेति वा निर्माणम्। आर्हन्त्यकारणं तीर्थकरत्वं नाम। इति त्रसद्वादशकं भवति। पिण्डप्रकृतयः। अपिण्डप्रकृतयः ॥९९॥

**थावर सुहुममपज्जत्तं साहारणसरीरमथिरं च।**
**असुहं दुब्भग दुस्सर णादिज्जं अजसकित्ति त्ति ॥१००॥**

**स्थावरदशक का वर्णन—**स्थावर, सूक्ष्म, अपर्याप्त, साधारण शरीर, अस्थिर, अशुभ, दुर्भग, दुःस्वर, अनादेय और अयशःकीर्ति ये दश प्रकृतियाँ स्थावरदशक कहलाती हैं।

**विशेषार्थ—**जिस कर्म के उदय से एकेन्द्रिय जीवों में जन्म हो, वह स्थावर नामकर्म है। जिस कर्म के उदय से अन्य को बाधा नहीं करने वाला और वज्रपटल के द्वारा भी नहीं रोके जाने वाला ऐसा सूक्ष्म शरीर उत्पन्न हो, वह सूक्ष्म नामकर्म है। जिस कर्म के उदय से जीव अपने योग्य पर्याप्तियों को पूर्ण न कर सके, वह अपर्याप्त नामकर्म है। जिस कर्म के उदय से अनेक जीवों के उपभोग योग्य शरीर की प्राप्ति हो अर्थात् अनन्त जीव एक शरीर के स्वामी हों, वह साधारण शरीर नामकर्म है। जिस

१७५. ब लोकाः जनाः।

कर्म के उदय से शरीर के धातु और उपधातु स्थिर न रह सकें, वह अस्थिर नामकर्म है। जिस कर्म के उदय से शरीर के अवयव सुन्दर न हों, वह अशुभ नामकर्म है। जिस कर्म के उदय से जीव रूपादि गुणों से युक्त होने पर भी अन्य का प्रीतिपात्र न हो सके, वह दुर्भग नामकर्म है। जिस कर्म के उदय से गधे, ऊँट, गीदड़ जैसा बुरा स्वर मिले, वह दु:स्वर नामकर्म है। जिस कर्म के उदय से शरीर प्रभा और कान्ति से हीन प्राप्त हो, वह अनादेय नामकर्म है। जिस कर्म के उदय से संसार में अपयश फैले, वह अयश:कीर्ति नामकर्म है। इन दश प्रकृतियों की आगम में स्थावरदशक संज्ञा है।

**टीका**—स्थावर सूक्ष्मा पर्याप्त साधारणशरीरास्थिराशुभदुर्भगदु:स्वरानादेयायश:कीर्तीति स्थावरदश-संज्ञं ज्ञातव्यम्। तन्निरुक्तिमाहयन्निमित्तादेकेन्द्रियेषु प्रादुर्भावस्तत्स्थावरनाम। सूक्ष्मशरीरनिर्वर्त्तकं सूक्ष्मनाम। षड्विधपर्याप्त्यभावहेतुरपर्याप्तनाम। बहूनामात्मनामुपभोगहेतुत्वेन साधारणं भवति शरीरं यतस्तत्साधारणशरीरनाम। तद्यथा—

**[१७६]साहारणमाहारो साहारणमाणपाणगहणं च।**
**साहारणजीवाणं साहारणलक्खणं भणियं[१७७]॥१६॥**
**गूढसिरसंधिपव्वं समभंगमहीरुहं च छिण्णरुहं।**
**साहारणं शरीरं तव्विवरीयं च पत्तेयं[१७८]॥१७॥**
**कंदे मूले छल्लीपवालसालदलकुसुमफलबीए।**
**समभंगे सदि णंता विसमे सदि होंति पत्तेया[१७९]॥१८॥**

धातूपधातूनां स्थिरभावेनानिर्वर्तनं यतस्तदस्थिरनाम। यदुदयेनारमणीय-मस्तकाद्यवयवनिर्वर्तनं भवति तदशुभनाम। यदुदयाद् रूपादिगुणोपेतोऽप्यप्रीतिं विदधाति जन: तद्दुर्भगनाम। यन्निमित्ताज्जीवस्य खरोष्ट्रश‍ृगालादिवदमनोज्ञस्वरनिर्वर्तनं भवति तद्दु:स्वरनाम। निष्प्रभशरीरकारणमनादेयनाम। पुण्ययश:प्रयत्नीकफलमयश:कीर्त्तिनाम। इति स्थावरदशकं सिद्धान्ते भणितम्। पिण्डप्रकृति: ४२। अपिण्डप्रकृति: ९३। अथवा १०३ ॥१००॥

**इदि णामप्पयडीओ तेणवदी, उच्चणीचमिदि दुविहं।**
**गोदं कम्मं भणिदं पंचविहं अंतरायं तु ॥१०१॥**

ये उपर्युक्त नामकर्म की सब मिलाकर तेरानवे प्रकृतियाँ जानना चाहिए। गोत्रकर्म दो प्रकार का कहा गया है—उच्चगोत्र और नीचगोत्र। जिस कर्म के उदय से लोक-पूजित कुल में जन्म हो, वह उच्चगोत्र और लोक-निन्द्य कुल में जन्म हो, वह नीच गोत्र है। अन्तराय कर्म पाँच प्रकार का है। जिनके नाम इस प्रकार हैं—

---

१७६. ब इमा: गाथा न सन्ति। १७७. पञ्चसं० १, ८२। गोम्मटसार जीवकाण्ड १९१। १७८. गोम्मटसार जीवकाण्ड १८६। १७९. गोम्मटसार जीवकाण्ड १८७।

**टीका**—इति नामकर्मणः पिण्डापिण्डप्रकृतयः ४२। पृथग्भेदेन प्रकृतिस्त्रिनवतिः ९३। औदारिक-तैजसं औदारिक-कार्मणं औदारिक-तैजस-कार्मणं वैक्रियिक-तैजसं वैक्रियिक-कार्मणं वैक्रियिक-तैजस-कार्मणं आहारक-तैजसं आहारक-कार्मणं आहारक-तैजस-कार्मणं तैजस-कार्मणं इति दशप्रकृतिमेलिताः नामकर्मण उत्तरप्रकृतयः १०३ त्र्यधिकं शतं भवति। गोत्रकर्म द्विविधं भणितम्-उच्चगोत्रं नीचगोत्रमिति। यस्योदयाल्लोकपूजितेषु कुलेषु जन्म भवति तदुच्चगोत्रम्। यदुदयेन तद्विपरीतेषु गर्हितेषु कुलेषु जन्म भवति तन्नीचैर्गोत्रम् । तु पुनरन्तरायकर्म पञ्चविधं भणितम् ॥१०१॥

**तद्गाथामाह—**

**तह दाण लाह भोगुवभोगा विरिय अंतरायमिदि णेयं।**
**इदि सव्वुत्तरपयडी अडदालसयप्पमा[180] होंति॥१०२॥**

**अन्तराय कर्म के भेद**—दानान्तराय, लाभान्तराय, भोगान्तराय, उपभोगान्तराय और वीर्यान्तराय ये पाँच अन्तराय कर्म के भेद जानना चाहिए। जिस कर्म के उदय से दान देने की इच्छा रखने पर भी दे न सके, वह दानान्तराय है। जिस कर्म के उदय होने पर लाभ न हो सके, वह लाभान्तराय है। जिस कर्म के उदय होने पर भोगने की इच्छा रखने पर भी भोग न सके, वह भोगान्तराय है। जिसके उदय होने पर स्त्री आदिक उपभोगों को न भोग सके, वह उपभोगान्तराय है। जिसके उदय होने पर शरीर में बल-वीर्य प्राप्त न हो सके, वह वीर्यान्तराय कर्म है। इस प्रकार आठों कर्मों की सभी उत्तर प्रकृतियाँ (५+९+२+२८+४+९३+२+५=१४८) एक सौ अड़तालीस होती हैं।

**टीका**—तथा दान-लाभ-भोगोपभोग-वीर्यान्तरायमिति पञ्चविधं ज्ञेयम्। यदुदयाद्दातुकामोऽपि न प्रयच्छति तद्दानान्तरायः। यदुदयाल्लब्धुकामोऽपि न लभते तल्लाभान्तरायः। तदुदयाद् भोक्तुमिच्छन्नपि न भुङ्क्ते [तद्भोगान्तरायः।] यदुदयादुपभोक्तुमभिवाञ्छन्नपि नोपभुङ्क्ते तदुपभोगान्तरायः। यदुदयादुत्सहितु-कामोऽपि नोत्सहते तद्वीर्यान्तरायः। अथवा दानस्य विघ्नहेतुर्दानान्तरायः। लाभस्य विघ्नहेतुर्लाभान्तरायः। भुक्त्वा परिहातव्यो भोगस्तस्य विघ्नहेतुर्भोगान्तरायः। भुक्त्वा पुनश्च भोक्तव्य उपभोगः, तस्य विघ्नहेतुरुपभोगान्तरायः। वीर्यं शक्तिः सामर्थ्यम्। तस्य विघ्नहेतुर्वीयान्तरायः। इति सर्वेषां कर्मणां उत्तरप्रकृतयः अष्टचत्वारिंशच्छतप्रमाः १४८ भवन्ति। उत्तरोत्तरप्रकृतिभेदा वाग्गोचरा न भवन्ति ॥१०२॥

**अथ नामोत्तरप्रकृतिष्वभेदविवक्षायामन्तर्भावं दर्शयति—**

**देहे अविणाभावी बंधण संघाद इति अबंधुदया।**
**वण्णचउक्केऽभिण्णे गहिदे चत्तारि बंधुदये[181]॥१०३॥**

**अब नामकर्म की उत्तर प्रकृतियों में अभेद-विवक्षा से कौन प्रकृति किसमें सम्मिलित हो सकती है, वह दिखलाते हैं**—शरीर नामकर्म के साथ अपना-अपना बन्धन और अपना-अपना

१८०. त अडदालुत्तरसयं। १८१. गोम्मटसार कर्मकाण्ड ३४।

संघात, ये दोनों कर्म अविनाभावी हैं अर्थात् ये दोनों शरीर के बिना नहीं हो सकते। इस कारण पाँच बन्धन और पाँच संघात ये दश प्रकृतियाँ बन्ध और उदय अवस्था में अभेद विवक्षा से पृथक् नहीं गिनी जातीं, किन्तु उनका शरीरनाम कर्म में ही अन्तर्भाव हो जाता है तथा सामान्य वर्ण, गन्ध, रस और स्पर्श इन चार में ही इनके उत्तर बीस भेद सम्मिलित हो जाते हैं अतएव अभेद की अपेक्षा इनके भी बन्ध और उदय अवस्था में चार ही भेद गिने जाते हैं।

**टीका—**देहे औदारिकादिपञ्चविधशरीरनामकर्मणि स्व-स्वबन्धनसंघातौ अविनाभाविनौ, इति कारणात् अबन्धोदयौ प्रकृती बन्धन-संघातौ न भवतः, तत्र त्र्युत्तरभेदभिन्ने नामकर्मणि एतौ बन्धन-संघातौ पृथक् प्रोक्तौ इत्यर्थः। वर्णचतुष्के वर्ण-गन्ध-रस-स्पर्शसामान्यचतुष्के अभिन्ने अभेदविवक्षायां एकैकस्मिन्नेव गृहीते सत्त्वादन्यत्र बन्धोदययोश्चतस्र एव प्रकृतयो भवन्ति। शेष षोडशानां पृथक् कथनं नास्तीत्यर्थः ॥१०३॥

**ताः का इति चेदाह—**

**वण्ण-रस-गंध-फासा चउ चउ इगि सत्त [१८२]सम्ममिच्छतं।**
**होंति अबंधा बंधण पण पण संघाद सम्मत्तं॥१०४॥**

**अब ग्रन्थकार अबन्ध प्रकृतियों को अर्थात् जिनका बन्ध नहीं होता, उन प्रकृतियों को गिनाते हैं—**चार वर्ण, चार रस, एक गन्ध, सात स्पर्श, सम्यग्मिथ्यात्व, सम्यक्त्वप्रकृति, पाँच बन्धन और पाँच संघात ये अट्ठाईस अबन्ध प्रकृतियाँ हैं अर्थात् इनके अतिरिक्त शेष एक सौ बीस प्रकृतियाँ बन्ध-योग्य होती हैं।

**विशेषार्थ—**इस गाथा में अट्ठाईस अबन्ध प्रकृतियों की संख्या गिना करके अगली १०५वीं गाथा में बन्ध-योग्य १२० प्रकृतियों को बतलाया गया है। सो यह कथन अभेद विवक्षा से जानना चाहिए; क्योंकि भेद की विवक्षा से आगे ग्रन्थकार स्वयं ही १०७वीं गाथा में बन्ध-योग्य प्रकृतियों की संख्या १४६ बतला रहे हैं। इसका अभिप्राय यह है कि यतः शरीर नामकर्म के बन्ध के साथ ही बन्धन और संघात नामकर्म इन दोनों प्रकृतियों का बन्ध अविनाभावी है अर्थात् नियम से होता है। अतः शरीर नामकर्म का बन्ध कह देने पर पाँचों बन्धन और पाँचों संघात स्वतः ही गृहीत हो जाते हैं। इस विवक्षा में उन्हें अबन्धप्रकृतियों में गिनाया गया है। ऐसा नहीं समझना चाहिए कि बन्धन और संघात बन्ध-योग्य ही नहीं हैं। भेद-विवक्षा से उनका बन्ध होता ही है और प्रतिसमय बँधने वाले समय प्रबद्ध में से उन्हें प्रदेश-विभाजन के नियमानुसार विभाग मिलता ही है। इसी प्रकार सामान्य वर्णचतुष्क के कहने पर उनके सभी उत्तर भेद भी स्वतः गृहीत हो जाते हैं। इस गाथा में जो यह कहा गया है कि चार वर्ण, चार रस, एक गन्ध और सात स्पर्श ये अबन्धप्रकृतियाँ हैं; उसका भी यह अभिप्राय नहीं

---

१८२. ब मिच्छत्तं।

समझना कि एक समय में पाँचों वर्णों में से किसी एक का ही बन्ध होता है, शेष चार का नहीं, पाँचों रसों में से किसी एक रस का बन्ध होता है, शेष चार का नहीं, दो गन्धों में से किसी एक का बन्ध होता है, दूसरी का नहीं तथा आठों स्पर्शों में से किसी एक का बन्ध होता है, शेष सात का नहीं। वस्तुतः वर्णचतुष्क की सभी उत्तर प्रकृतियों का प्रतिसमय बन्ध होता है और साथ ही सभी को प्रदेश-विभाग भी प्राप्त होता है। ग्रन्थकार ने एक सामान्य वर्ण, एक सामान्य रस, एक सामान्य गन्ध और एक सामान्य स्पर्श की विवक्षा से अर्थात् अभेद-दृष्टि से इन चारों को एक-एक मानकर शेष रही संख्या को अबन्धप्रकृतियों के रूप में निर्देश कर दिया है और इसलिए अभेद विवक्षा से आगे १०७वीं गाथा में बन्ध-योग्य प्रकृतियाँ १४६ बतायी गयी हैं। वास्तव में देखा जाये तो सम्यग्मिथ्यात्व और सम्यक्त्वप्रकृति ये दो ही प्रकृतियाँ ऐसी हैं कि जिनका बन्ध नहीं होता। यही कारण है कि भेद-विवक्षा करने पर भी बन्ध-योग्य प्रकृतियाँ १४६ ही बतलायी गयी है, १४८ नहीं। जो बात बन्ध-योग्य प्रकृतियों के विषय में कही गयी है, वही उदययोग्य प्रकृतियों के विषय में भी जानना चाहिए अर्थात् अभेद-विवक्षा से १२२ प्रकृतियाँ उदय-योग्य हैं और भेद-विवक्षा से सभी (१४८) प्रकृतियाँ उदय-योग्य बतलायी गयी हैं।

**टीका—**एताः अष्टाविंशतिप्रकृतयः अबन्धा बन्धरहिता भवन्ति, अतएव बन्धराशौ विंशत्यधिक-शत-प्रकृतयो भवन्ति। ताः काः अष्टाविंशतिः। वर्णचतुष्कं [रसचतुष्कम् ] एको गन्धः स्पर्शसप्तकं इति षोडश भवन्ति। मिच्छत्तं इति सम्म इति मीलित्वा एका सम्यग्मिथ्यात्वप्रकृतिः, मिश्रप्रकृतिरित्यर्थः। 'बंधण पण' इति, औदारिकबन्धनं वैक्रियिकबन्धनं आहारकबन्धनं तैजसबन्धनं कार्मणबन्धनं इति पञ्च बन्धनानि। 'पण संघाद' इति, औदारिकसंघातः वैक्रियिकसंघातः आहारकसंघातः तैजससंघातः कार्मणसंघातः इति पञ्च संघाताः। 'सम्मत्तं' इति सम्यक्त्वप्रकृतिः एवं समुदिताः अष्टाविंशतिप्रकृतयः अबन्धाः बन्धराशौ न भवन्तीत्यर्थः ॥१०४॥

तथा सति बन्धोदयसत्त्वप्रकृतयः कतीति चेच्चतुर्गाथाभिराह—

**पंच णव दोण्णि छव्वीसमवि य चउरो कमेण सत्तट्ठी।**
**दोण्णि य पंच य भणिया एदाओ बंधपयडीओ[१८३]॥१०५॥**

५। ९। २। २६। ४। ६७। २। ५=१२०

**इस प्रकार बन्ध-योग्य प्रकृतियों की संख्या का ग्रन्थकार निरूपण करते हैं—**ज्ञानावरण की पाँच, दर्शनावरण की नौ, वेदनीय की दो, मोहनीय की छब्बीस, आयुकर्म की चार, नामकर्म की सड़सठ, गोत्रकर्म की दो और अंतराय कर्म की पाँच ये सब बन्ध होने योग्य प्रकृतियाँ हैं ॥१०५॥

**भावार्थ—**आठों कर्मों की बन्ध योग्य प्रकृतियाँ (५+९+२+२६+४+६७+२+५=१२०) एक

१८३. गोम्मटसार कर्मकाण्ड ३५।

सौ बीस होती हैं।

**टीका**—पञ्च ज्ञानावरणानि नव दर्शनावरणानि द्वे वेदनीये षड्विंशतिर्मोहनीयानि। कुतः ? मिश्र-सम्यक्त्वप्रकृत्योरुदयसत्त्वयोरेव कथनात्। चत्वार्यायूंषि सप्तषष्टिर्नामानि। कुतः? तद्दशबन्धन-संघात-षोडशवर्णादीनामन्तर्भावात्। द्वे गोत्रे। पञ्चान्तरायाः। इत्येताः विंशत्युत्तरशतं बन्धयोग्याः प्रकृतयः क्रमेण सर्वज्ञैर्भणिताः ॥१०५॥

**उदयप्रकृतीराह**—

**पंच णव दोण्णि अट्ठावीसं चउरो कमेण सत्तट्ठी।**
**दोण्णि य पंच य भणिया एदाओ उदयपयडीओ[१८४]॥१०६॥**

५।९।२।२८।४।६७।२।५=१२२

**अब ग्रन्थकार उदय-योग्य प्रकृतियों को गिनाते हैं**—ज्ञानावरण की पाँच, दर्शनावरण की नौ, वेदनीय की दो, मोहनीय की अट्ठाईस, आयु की चार, नामकर्म की सड़सठ, गोत्र की दो और अन्तराय की पाँच ये सब उदय-प्रकृतियाँ कही गयी हैं।

**भावार्थ**—आठों कर्मों की उदय-योग्य प्रकृतियाँ (५+९+२+२८+४+६७+२+५=१२२) एक सौ बाईस होती हैं।

**१७. श्रुतज्ञानावरणीय का लक्षण**

मतिज्ञान द्वारा ग्रहण किये गये अर्थ से भिन्न अर्थ का ज्ञान श्रुतज्ञान है, उसे जो आवृत करता है वह श्रुतज्ञानावरणीय है।

**१८. अवधिज्ञानावरणीय का स्वरूप**

भिन्न देश तथा भिन्न काल में स्थित वर्ण, गन्ध, रस और स्पर्श युक्त सामान्य पुद्गल द्रव्य तथा पुद्गल द्रव्य के सम्बन्ध से युक्त संसारी जीव द्रव्यों को जो द्रव्य, क्षेत्र, काल, भव और भाव की मर्यादा लेकर प्रत्यक्ष जानता है, वह अवधिज्ञान कहलाता है, उसका आवरण करने वाला अवधिज्ञानावरणीय है।

**१९. मनःपर्ययज्ञानावरणीय का स्वरूप**

दूसरों के मन में स्थित अर्थ को जानता है, वह मनःपर्ययज्ञान है, उसे जो रोकता है, वह मनःपर्ययज्ञानावरणीय है।

**२०. केवलज्ञानावरणीय का स्वरूप**

इन्द्रिय, प्रकाश और मन की सहायता के बिना त्रिकाल गोचर लोक तथा अलोक के समस्त

तदावृणोतीति केवलज्ञानावरणीयम्।

## दर्शनावरणीयम्

**२१. दर्शनावरणीयस्य नव प्रकृतयः**

चक्षुर्दर्शनावरणीयमचक्षुर्दर्शनावरणीयमवधिदर्शनावरणीयं केवलदर्शनावरणीयं निद्रा निद्रानिद्रा प्रचला प्रचलाप्रचला स्त्यानगृद्धिरिति दर्शनावरणीयं नवधा।

**२२. चक्षुर्दर्शनावरणीयस्य स्वरूपम्**

तत्र चक्षुषा वस्तुसामान्यग्रहणं चक्षुर्दर्शनं तदावृणोतीति चक्षुर्दर्शनावरणीयम्।

**२३. अचक्षुर्दर्शनावरणीयस्य स्वरूपम्**

शेषैः स्पर्शनादीन्द्रियैर्मनसा च वस्तुसामान्यग्रहणमचक्षुर्दर्शनं तदावृणोतीत्यचक्षुर्दर्शनावरणीयम्।

**२४. अवधिदर्शनावरणीयस्य स्वरूपम्**

रूपिसामान्यग्रहणमवधिदर्शनं तदावृणोतीत्यवधिदर्शनावरणीयम्।

**२५. केवलदर्शनावरणीयस्य स्वरूपम्**

समस्तवस्तुसामान्यग्रहणं केवलदर्शनं तदावृणोतीति केवलदर्शनावरणीयम्।

**२६. निद्रायाः स्वरूपम्**

---

पदार्थों का एक साथ अवभास (ज्ञान) केवलज्ञान है, उसे जो आवृत करता है वह केवलज्ञानावरणीय है।

**२१. दर्शनावरणीय के नव भेद**

चक्षुदर्शनावरणीय, अचक्षुदर्शनावरणीय, अवधिदर्शनावरणीय, केवलदर्शनावरणीय, निद्रा, निद्रानिद्रा, प्रचला, प्रचलाप्रचला तथा स्त्यानगृद्धि ये नौ दर्शनावरणीय के भेद हैं।

**२२. चक्षुदर्शनावरणीय का स्वरूप**

चक्षु द्वारा वस्तु का सामान्य ग्रहण चक्षुदर्शन कहलाता है, उसका आवरण चक्षुदर्शनावरणीय है।

**२३. अचक्षुदर्शनावरणीय का स्वरूप**

चक्षु के अतिरिक्त शेष स्पर्शन आदि इन्द्रियों तथा मन के द्वारा वस्तु का सामान्यग्रहण अचक्षुदर्शन है, उसका आवरण अचक्षुदर्शनावरणीय है।

**२४. अवधिदर्शनावरणीय का स्वरूप**

रूपी पदार्थों का सामान्यग्रहण अवधिदर्शन है, उसका आवरण अवधिदर्शनावरणीय है।

**२५. केवलदर्शनावरणीय का स्वरूप**

समस्त वस्तुओं का सामान्यग्रहण केवलदर्शन है, उसका आवरण केवलदर्शनावरणीय है।

**२६. निद्रा का स्वरूप**

यतो गच्छतः स्थानं तिष्ठत उपवेशनमुपविशतश्शयनं च भवति सा निद्रा।

**२७. निद्रानिद्रायाः स्वरूपम्**

उत्थापितेऽपि लोचनमुद्घाटयितुं न शक्नोति यतस्सा निद्रानिद्रा।

**२८. प्रचलायाः स्वरूपम्**

यत ईषदुन्मील्य स्वपिति सुप्तोऽपीषदीषज्जानाति सा प्रचला।

**२९. प्रचलाप्रचलायाः स्वरूपम्**

यतो निद्रायमाणे लाला वहत्यङ्गानि चलन्ति सा प्रचलाप्रचला।

**३०. स्त्यानगृद्धेः स्वरूपम्**

यत उत्थापितेऽपि पुनः पुनः स्वपिति निद्रायमाणे चोत्थाय कर्माणि करोति स्वप्नायते जल्पति च सा स्त्यानगृद्धिः।

## वेदनीयम्

**३१. वेदनीयस्य द्वे प्रकृतयः**

सातावेदनीयमसातावेदनीयं चेति वेदनीयं द्विधा।

**३२. सातावेदनीयस्य स्वरूपम्**

---



जिसके कारण चलते, किसी स्थान पर ठहरते, बिस्तर पर बैठते नींद आती है, उसे निद्रा कहते हैं।

**२७. निद्रानिद्रा का स्वरूप**

जिसके कारण उठाये जाने (जगाये जाने) पर भी आँखें न खुल सकें, उसे निद्रानिद्रा कहते हैं।

**२८. प्रचला का स्वरूप**

जिसके कारण कुछ आँख खोलकर सोये तथा सोते हुए भी कुछ-कुछ जानता रहे, उसे प्रचला कहते हैं।

**२९. प्रचलाप्रचला का स्वरूप**

जिसके कारण सोते हुए लार बहे तथा अंग चलें, उसे प्रचला-प्रचला कहते हैं।

**३०. स्त्यानगृद्धि का स्वरूप**

जिसके कारण उठा देने पर भी फिर-फिर सो जाये, नींद में उठकर कार्य करे, स्वप्न देखे, बड़बड़ाये, उसे स्त्यानगृद्धि कहते हैं।

**३१. वेदनीय के दो भेद**

सातावेदनीय और असातावेदनीय ये दो वेदनीय के भेद हैं।

**३२. सातावेदनीय का स्वरूप**

तत्रेन्द्रियसुखकारणचन्दनकर्पूरसृग्वनितादिविषयप्राप्तिकारणं सातावेदनीयम्।

**३३. असातावेदनीयस्य स्वरूपम्**

इन्द्रियदु:खकारणविषशस्त्राग्निकण्टकादिद्रव्यप्राप्तिनिमित्तमसातावेदनीयम्।

## मोहनीयम्

**३४. मोहनीयस्य द्वौ भेदौ**

दर्शनमोहनीयं चारित्रमोहनीयं चेति मोहनीयं द्विधा।

**३५. दर्शनमोहनीयस्य त्रय: भेदा:**

तत्र मिथ्यात्वं सम्यग्मिथ्यात्वं सम्यक्त्वप्रकृतिश्चेति दर्शनमोहनीयं त्रिधा।

**३६. मिथ्यात्वस्य स्वरूपम्**

तत्रातत्त्वश्रद्धानकारणं मिथ्यात्वम्।

**३७. सम्यग्मिथ्यात्वस्य स्वरूपम्**

तत्त्वातत्त्वश्रद्धानकारणं सम्यग्मिथ्यात्वम्।

**३८. सम्यक्त्वप्रकृते: स्वरूपम्**

तत्त्वार्थश्रद्धानरूपं सम्यग्दर्शनं चलमलिनमगाढं करोति यत्सा सम्यक्त्वप्रकृति:।

---

इन्द्रिय-सुख के कारण चन्दन, कर्पूर, माला, वनिता आदि विषयों की प्राप्ति जिससे हो, वह सातावेदनीय है।

**३३. असातावेदनीय का स्वरूप**

इन्द्रिय-दु:ख के कारण विष, शस्त्र, अग्नि, कंटक आदि द्रव्यों की प्राप्ति जिसके द्वारा हो, वह असातावेदनीय है।

**३४. मोहनीय के दो भेद**

दर्शनमोहनीय और चारित्रमोहनीय ये दो मोहनीय के भेद हैं।

**३५. दर्शनमोहनीय के तीन भेद**

उनमें मिथ्यात्व, सम्यग्मिथ्यात्व तथा सम्यक्त्वप्रकृति ये तीन दर्शनमोहनीय के भेद हैं।

**३६. मिथ्यात्व का स्वरूप**

उक्त तीन भेदों में मिथ्यात्व वह है, जिससे तत्त्व की श्रद्धा न होकर विपरीत श्रद्धा हो।

**३७. सम्यग्मिथ्यात्व का स्वरूप**

जिससे तत्त्व तथा अतत्त्व दोनों का श्रद्धान हो, वह सम्यग्मिथ्यात्व है।

**३८. सम्यक्त्वप्रकृति का स्वरूप**

जो तत्त्वार्थ की श्रद्धारूप सम्यग्दर्शन में चल, मलिन तथा अगाढ़ दोष उत्पन्न करे वह सम्यक्त्वप्रकृति है।

**३९. चारित्रमोहनीयस्य द्वौ भेदौ**

कषायनोकषायभेदाच्चारित्रमोहनीयं द्विधा।

**४०. कषायाणां भेदा:**

तत्रानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पत: प्रत्येकं क्रोधमानमायालोभा इति कषाया: षोडश।

**४१. अनन्तानुबन्धिकषायाणां कार्यम्**

तत्रानन्तानुबन्धिक्रोधमानमायालोभा: सम्यग्दर्शनं विराधयन्ति।

**४२. अप्रत्याख्यानकषायाणां कार्यम्**

अप्रत्याख्यानक्रोधमानमायालोभा देशसंयमं प्रतिबध्नन्ति।

**४३. प्रत्याख्यानकषायाणां कार्यम्**

प्रत्याख्यानक्रोधमानमायालोभास्सकलसंयमं प्रतिबध्नन्ति।

**४४. संज्वलनकषायाणां कार्यम्**

संज्वलनक्रोधमानमायालोभा यथाख्यातचारित्रं निवारयन्ति।

---

**३९. चारित्रमोहनीय के भेद**

कषाय और नोकषाय के भेद से चारित्रमोहनीय दो प्रकार का है।

**४०. कषाय के भेद**

उनमें अनन्तानुबन्धि, अप्रत्याख्यानावरण, प्रत्याख्यानावरण तथा संज्वलन के विकल्प से कषाय चार प्रकार की है और प्रत्येक के क्रोध, मान, माया तथा लोभ ये चार-चार भेद हैं। इस प्रकार कषाय के सोलह भेद हैं।

**४१. अनन्तानुबन्धि कषायों का कार्य**

अनन्तानुबन्धि क्रोध, मान, माया और लोभ सम्यग्दर्शन का घात करते हैं, उसे वे प्रकट नहीं होने देते।

**४२. अप्रत्याख्यानावरण कषायों का कार्य**

अप्रख्यानावरण क्रोध, मान, माया और लोभ देशसंयम को रोकते हैं।

**४३. प्रत्याख्यानावरण कषायों का कार्य**

प्रत्याख्यानावरण क्रोध, मान, माया, लोभ सकलचारित्र को रोकते हैं।

**४४. संज्वलन कषायों का कार्य**

संज्वलन क्रोध, मान, माया, लोभ यथाख्यात चारित्र को नहीं होने देते हैं।

**४५. अनन्तानुबन्धिकषायाणां शक्तय:**

तत्रानन्तानुबन्धिनः क्रोधमानमायालोभा यथाक्रमं शिलाभेदशिलास्तम्भवेणुमूल-क्रिमिराग-कम्बलसदृशास्तीव्रतमशक्तयः।

**४६. अप्रत्याख्यानकषायाणां शक्तय:**

अप्रत्याख्यानक्रोधमानमायालोभा यथाक्रमं भूभेदास्थि-अविशृङ्गचक्रमलसदृशास्तीव्रतरशक्तयः।

**४७. प्रत्याख्यानकषायाणां शक्तय:**

प्रत्याख्यानक्रोधमानमायालोभा यथाक्रमं धूलिरेखाकाष्ठगोमूत्रतनुमल-सदृशास्तीव्रशक्तयः।

**४८. संज्वलनकषाणां शक्तय:**

संज्वलनक्रोधमानमायालोभा यथाक्रमं जलरेखावेत्रक्षुरप्रहरिद्रारागसदृशा मन्दशक्तयः।

**४९. हास्यप्रकृतेर्लक्षणम्**

यतो हासो भवति तद्धास्यम्।

**५०. रतिप्रकृतेर्लक्षणम्**

यतो रमयति सा रतिः।

---

**४५. अनन्तानुबन्धि कषायों की शक्ति**

अनन्तानुबन्धि क्रोध, मान, माया और लोभ कषाय क्रम से शिलाखण्ड, शिलास्तम्भ, वेणुमूल (बाँस की जड़) और क्रिमिराग कम्बल की तरह तीव्रतम शक्तिवाली होती है।

**४६. अप्रत्याख्यानावरण कषायों की शक्ति**

अप्रत्याख्यानावरण क्रोध, मान, माया और लोभ कषाय क्रम से पृथ्वीखण्ड, हड्डी, मेढे के सींग तथा चक्रमल (ओंगन) के सदृश तीव्रतर शक्तिवाली होती है।

**४७. प्रत्याख्यानावरण कषायों की शक्ति**

प्रत्याख्यान क्रोध, मान, माया और लोभ क्रम से धूलि-रेखा, काष्ठ, गोमूत्र तथा शरीर के मल के समान तीव्रतर शक्तिवाली होती हैं।

**४८. संज्वलन कषायों की शक्ति**

संज्वलन क्रोध, मान, माया तथा लोभ क्रम से जलरेखा बेंत, खुरपा तथा हल्दी के रंग के सदृश मन्द शक्तिवाली होती हैं।

**४९. हास्य प्रकृति का लक्षण**

जिससे हँसी आये, वह हास्य प्रकृति है।

**५०. रति का लक्षण**

जिसके कारण रमे (प्रसन्न हो), वह रति है।

**५१. अरतिप्रकृतेर्लक्षणम्**

यतो विषण्णो भवति सारतिः।

**५२. शोकप्रकृतेर्लक्षणम्**

यतः शोचयति रोदयति स शोकः।

**५३. भयप्रकृतेर्लक्षणम्**

यतो बिभेत्यनर्थात्तद्भयम्।

**५४. जुगुप्साप्रकृतेर्लक्षणम्**

यतो जुगुप्सा सा जुगुप्सा।

**५५. स्त्रीवेदस्य लक्षणम्**

यतः स्त्रियमात्मानं मन्यमानः पुरुषे वेदयति रन्तुमिच्छति सः स्त्रीवेदः।

**५६. पुंवेदस्य लक्षणम्**

यतः पुमांसमात्मानं मन्यमानः स्त्रियां वेदयति रन्तुमिच्छति सः पुंवेदः।

**५७. नपुंसकवेदस्य लक्षणम्**

यतो नपुंसकमात्मानं मन्यमानः स्त्रीपुंसोर्वेदयति रन्तुमिच्छति स नपुंसकवेदः।

---

**५१. अरति का लक्षण**

जिसके कारण विषण्ण (खिन्न) हो, वह अरति है।

**५२. शोक का लक्षण**

जिसके कारण शोक करे, वह शोक है।

**५३. भय का लक्षण**

जिसके कारण अनर्थ से डरे, वह भय है।

**५४. जुगुप्सा का लक्षण**

जिसके कारण घृणा आये, वह जुगुप्सा है।

**५५. स्त्रीवेद का लक्षण**

जिसके कारण अपने को स्त्री मानता हुआ पुरुष में रमण करने की इच्छा करता है, वह स्त्रीवेद है।

**५६. पुंवेद का लक्षण**

जिसके कारण अपने को पुरुष मानता हुआ स्त्री में रमण करने की इच्छा करता है, वह पुंवेद है।

**५७. नपुंसकवेद का लक्षण**

जिसके कारण अपने को नपुंसक मानता हुआ स्त्री और पुरुष दोनों में रमण करने की इच्छा करता है, वह नपुंसकवेद है।

## आयुः

**५८. आयुष्कर्मणः चत्वारः प्रकृतयः**

नारकायुष्यं तिर्यगायुष्यं मनुष्यायुष्यं देवायुष्यं चेत्यायुश्चतुर्विधम्।

**५९. नरकायुषो लक्षणम्**

तत्र यन्नारकशरीरे आत्मानं धारयति तन्नारकायुष्यम्।

**६०. तिर्यगायुषो लक्षणम्**

यत्तिर्यक्छरीरे जीवं धारयति तत्तिर्यगायुष्यम्।

**६१. मनुष्यायुषो लक्षणम्**

यन्मनुष्यशरीरे प्राणिनं धारयति तन्मनुष्यायुष्यम्।

**६२. देवायुषो लक्षणम्**

यद्देवशरीरे देहिनं धारयति तद्देवायुष्यम्।

## नाम

**६३. नामकर्मणः द्वाचत्वारिंशत्प्रकृतयः**

गतिजातिशरीरबन्धनसंघातसंस्थानाङ्गोपाङ्गसंहननवर्णगन्धरसस्पर्शानुपूर्व्यगुरुलघूपघात-परघाता-तपोद्योतोच्छ्वासविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तप्रत्येकशरीरसाधारणशरीरस्थिरास्थिर-

---

**५८. आयुकर्म के चार भेद**

नारकायुष्य, तिर्यगायुष्य, मनुष्यायुष्य और देवायुष्य इस प्रकार आयु के चार भेद हैं।

**५९. नरकायुष्य का लक्षण**

जो आत्मा को नारक शरीर में धारण कराता है, वह नरकायुष्य है।

**६०. तिर्यगायुष्य का लक्षण**

जो जीव को तिर्यंच-शरीर में धारण कराता है, वह तिर्यगायुष्य है।

**६१. मनुष्यायुष्य का लक्षण**

जो प्राणी को मनुष्य-शरीर में धारण कराता है, वह मनुष्यायुष्य है।

**६२. देवायुष्य का लक्षण**

जो प्राणी को देव-शरीर में धारण कराता है, वह देवायुष्य है।

**६३. नामकर्म की बयालीस प्रकृतियाँ**

गति, जाति, शरीर, बन्धन, संघात, संस्थान, अंगोपांग, संहनन, वर्ण, गन्ध, रस, स्पर्श, आनुपूर्वि, अगुरुलघु, उपघात, परघात, आतप, उद्योत, उच्छ्वास, त्रस, स्थावर, बादर, पर्याप्त, अपर्याप्त,

शुभाशुभसुभगदुर्भगसुस्वरदुःस्वरादेयानादेययशस्कीर्त्ययशस्कीर्तिनिर्माणतीर्थकरत्वानीतिपिण्डापिण्डरूपा नामकर्मप्रकृतयो द्वाचत्वारिंशत्।

**६४. नामकर्मणः पिण्डप्रकृतीनां त्रयोनवतिः भेदाः**

पिण्डप्रकृतीनां भेदे तु सर्वा नामप्रकृतयस्त्रयोनवतिः।

**६५. गतिनामकर्मणः चत्वारः भेदाः**

नारकतिर्यङ्मनुष्यदेवगतिभेदाद् गतिनाम चतुर्धा।

**६६. नरकगतेर्लक्षणम्**

यतो जीवस्य नारकपर्यायो भवति सा नरकगतिः।

**६७. तिर्यग्गतेर्लक्षणम्**

यतस्तिर्यक्पर्यायो भवति प्राणिनः सा तिर्यग्गतिः।

**६८. मनुष्यगतेर्लक्षणम्**

यतो मनुष्यपर्याय आत्मनो भवति सा मनुष्यगतिः।

**६९. देवगतेर्लक्षणम्**

यतो देवपर्यायो देहिनो भवति सा देवगतिः।

---

प्रत्येक शरीर, साधारण शरीर, स्थिर, अस्थिर, शुभ, अशुभ, सुभग, दुर्भग, सुस्वर, दुःस्वर, आदेय, अनादेय, यशस्कीर्ति, अयशस्कीर्ति निर्माण तथा तीर्थकरत्व ये नामकर्म की पिण्ड–अपिण्डरूप बयालीस प्रकृतियाँ हैं।

**६४. नामकर्म की तिरानवे प्रकृतियाँ**

पिण्डप्रकृतियों के भेद करने पर नामकर्म की सब प्रकृतियाँ तिरानवे होती हैं।

**६५. गति नामकर्म के चार भेद**

नरकगति, तिर्यग्गति, मनुष्यगति और देवगति के भेद से गति नामकर्म के चार भेद हैं।

**६६. नरकगति का लक्षण**

जिसके कारण जीव की नारकपर्याय होती है, वह नरकगति है।

**६७. तिर्यग्गति का लक्षण**

जिसके कारण जीव की तिर्यञ्चपर्याय होती है, वह तिर्यग्गति है।

**६८. मनुष्यगति का लक्षण**

जिसके कारण आत्मा की मनुष्यपर्याय होती है, वह मनुष्यगति है।

**६९. देवगति का लक्षण**

जिसके कारण प्राणी को देवपर्याय होती है, वह देवगति है।

**७०. गतेः सामान्यलक्षणम्**

नारकादिभवप्राप्तिर्गमनहेतुर्वा गतिनामा।

**७१. जातिनामकर्मणः पञ्च भेदाः**

एकद्वित्रिचतुःपञ्चेन्द्रियभेदाज्जातिनाम पञ्चधा।

**७२. एकेन्द्रियजातिनामकर्मणः लक्षणम्**

तत्र स्पर्शनेन्द्रियवन्तो जीवा भवन्ति यतः सा एकेन्द्रियजातिः।

**७३. द्वीन्द्रियजातिनामकर्मणः लक्षणम्**

यतः स्पर्शनरसनेन्द्रियवन्तो जीवा भवन्ति सा द्वीन्द्रियजातिः।

**७४. त्रीन्द्रियजातिनामकर्मणः लक्षणम्**

यतः स्पर्शनरसनघ्राणेन्द्रियवन्तो जीवा भवन्ति सा त्रीन्द्रियजातिः।

**७५. चतुरिन्द्रियजातिनामकर्मणः लक्षणम्**

यतः स्पर्शनरसनघ्राणचक्षुष्मन्तो जीवा भवन्ति सा चतुरिन्द्रियजातिः।

**७६. पञ्चेन्द्रियजातिनामकर्मणः लक्षणम्**

यतः स्पर्शनरसनघ्राणचक्षुःश्रोत्रेन्द्रियवन्तो जीवा भवन्ति सा पञ्चेन्द्रियजातिः।

---

**७०. गति नामकर्म का सामान्य लक्षण**

नारक आदि भवप्राप्ति के लिए गमन का कारण गति नामकर्म है।

**७१. जाति नामकर्म के पाँच भेद**

एकेन्द्रिय, द्वीन्द्रिय, त्रीन्द्रिय, चतुरिन्द्रिय तथा पंचेन्द्रिय के भेद से जाति नामकर्म के पाँच भेद है।

**७२. एकेन्द्रिय जाति नामकर्म का लक्षण**

जिसके कारण जीव केवल स्पर्शन इन्द्रियवान् होता है, वह एकेन्द्रिय जाति नामकर्म है।

**७३. द्वीन्द्रिय जाति नामकर्म का लक्षण**

जिसके कारण जीव केवल स्पर्शन और रसना इन्द्रिय युक्त होता है, वह द्वीन्द्रिय जाति नामकर्म है।

**७४. त्रीन्द्रिय जाति नामकर्म का लक्षण**

जिसके कारण जीव स्पर्शन, रसना तथा घ्राण इन्द्रिय युक्त होता है, वह त्रीन्द्रिय जाति नामकर्म है।

**७५. चतुरिन्द्रिय जाति नामकर्म का लक्षण**

जिसके कारण जीव स्पर्शन, रसना, घ्राण और चक्षु युक्त होता है, वह चतुरिन्द्रिय जाति नामकर्म है।

**७६. पंचेन्द्रियजाति नामकर्म का लक्षण**

जिसके कारण जीव स्पर्शन, रसना, घ्राण, चक्षु तथा श्रोत्रेन्द्रिय युक्त होता है, वह पंचेन्द्रिय जाति नामकर्म है।

**७७. शरीरनामकर्मण: पञ्च भेदा:**

औदारिकवैक्रियिकाहारकतैजसकार्मणानीति शरीरनाम पञ्चधा।

**७८. औदारिकशरीरनामकर्मण: लक्षणम्**

तत्र यत आहारवर्गणायाता: पुद्गलस्कन्धा औदारिकशरीरकरणे परिणमन्ति तदौदारिकशरीरनाम।

**७९. वैक्रियिकशरीरनामकर्मण: लक्षणम्**

यत आहारवर्गणायाता: पुद्गलस्कन्धा वैक्रियिकशरीररूपेण परिणमन्ति तद्वैक्रियकशरीरनाम।

**८०. आहारकशरीरनामकर्मण: लक्षणम्**

यत आहारवर्गणायाता: पुद्गलस्कन्धा आहारकशरीररूपेण परिणमन्ति तदाहारकशरीरनाम।

**८१. तैजसशरीरनामकर्मण: लक्षणम्**

यतस्तैजसवर्गणायाता: पुद्गलस्कन्धास्तैजसशरीररूपेण परिणमन्ति तत्तैजसशरीरनाम।

**८२. कार्मणशरीरनामकर्मण: लक्षणम्**

कार्मणवर्गणायाता: पुद्गलस्कन्धा: कार्मणशरीररूपेण परिणमन्ति यतस्तत्कार्मणशरीरनाम।

---

**७७. शरीर नामकर्म के पाँच भेद**

औदारिक, वैक्रियिक, आहारक, तैजस और कार्मण, ये शरीर नामकर्म के पाँच भेद हैं।

**७८. औदारिक शरीर नामकर्म का लक्षण**

जिसके कारण आहार वर्गणा द्वारा आये हुए पुद्गल स्कन्ध औदारिक शरीर के रूप में परिणत होते हैं, वह औदारिक शरीर नामकर्म है।

**७९. वैक्रियिक शरीर नामकर्म का लक्षण**

जिसके कारण आहार वर्गणा द्वारा आये हुए पुद्गल स्कन्ध वैक्रियिक शरीर के रूप में परिणत होते हैं, वह वैक्रियिक शरीर नामकर्म है।

**८०. आहारक शरीर नामकर्म का लक्षण**

जिसके कारण आहार वर्गणा द्वारा आये हुए पुद्गल स्कन्ध आहारक शरीर रूप से परिणत होते हैं, उसे आहारक शरीर नामकर्म कहते हैं।

**८१. तैजस शरीर नामकर्म का लक्षण**

जिसके कारण तैजस वर्गणा द्वारा आये हुए पुद्गल स्कन्ध तैजस शरीर रूप से परिणत होते हैं, वह तैजस शरीर नामकर्म है।

**८२. कार्मण शरीर नामकर्म का लक्षण**

जिसके कारण कार्मण वर्गणा द्वारा आये हुए पुद्गल स्कन्ध कार्मण शरीर रूप परिणत होते हैं, वह कार्मण शरीर नामकर्म है।

**८३. बन्धननामकर्मण: पञ्च भेदा:**

औदारिकादिशरीरपञ्चकाश्रितं बन्धननाम पञ्चधा।

**८४. औदारिकशरीरबन्धननामकर्मण: लक्षणम्**

तत्रौदारिकशरीराकारेण परिणतपुद्गलानां परस्परसंश्लेषरूपो बन्धो यतो भवति तदौदारिक-शरीरबन्धननाम।

**८५. वैक्रियिकादिशरीरबन्धननामकर्मणां लक्षणानि**

एवं वैक्रियिकाहारकतैजसकार्मणशरीराकारेण परिणतपुद्गलानां परस्परसंश्लेषरूपो बन्धो यतो भवति तानि वैक्रियिकाहारकतैजसकार्मणशरीरबन्धननामानि ज्ञातव्यानि।

**८६. संघातनामकर्मण: पञ्च भेदा:**

औदारिकादिशरीरपञ्चकाश्रितानि संघातनामानि पञ्च।

**८७. औदारिकशरीरसंघातनामकर्मण: लक्षणम्**

तत्रौदारिकशरीराकारेण परिणतपरस्परबद्धपुद्गलानां तदाकारवैषम्याभावकारणमौदारिक-शरीरसंघातनामकर्म।

**८८. वैक्रियिकादिशरीरसंघातनामकर्मण: लक्षणम्**

---

**८३. बन्धन नामकर्म के पाँच भेद**

औदारिक आदि पाँच शरीरों के आश्रित बन्धन नामकर्म पाँच प्रकार का है।

**८४. औदारिक शरीर बन्धन नामकर्म का लक्षण**

जिसके कारण औदारिक शरीर के आकार रूप से परिणत पुद्गलों का परस्पर संश्लेष रूप बन्ध होता है, वह औदारिक शरीर बन्धन नामकर्म है।

**८५. वैक्रियिक, आहारक, तैजस और कार्मण शरीर बन्धन नामकर्म**

इसी प्रकार जिस कारण वैक्रियिक, आहारक, तैजस और कार्मण शरीर के आकार रूप से परिणत पुद्गलों का परस्पर संश्लेष रूप बन्ध होता है, उन्हें क्रमश: वैक्रियिक, आहारक, तैजस और कार्मण शरीर बन्धन नामकर्म कहते हैं।

**८६. संघात नामकर्म के पाँच भेद**

औदारिक आदि पाँच शरीरों के आश्रित संघात नामकर्म पाँच प्रकार का होता है।

**८७. औदारिक शरीर संघात नामकर्म का लक्षण**

औदारिक शरीर के आकार रूप से परिणत परस्पर बद्ध पुद्गलों के तदाकार वैषम्य के अभाव का कारण औदारिक शरीर संघात नामकर्म है।

**८८. वैक्रियिक, आहारक, तैजस और कार्मण शरीर संघात नामकर्म का लक्षण**

एवं वैक्रियिकाहारकतैजसकार्मणशरीररूपेण परिणतपरस्परबद्ध-पुद्गलस्कन्धानां तत्तदाकार-वैषम्याभावकारणानि वैक्रियिकाहारकतैजसकार्मणशरीर-संघातनामानि ज्ञातव्यानि।

**८९. संस्थाननामकर्मणः षड्भेदाः**

समचतुरस्रन्यग्रोधस्वातिकुब्जवामनहुण्डभेदात्संस्थाननाम षोढा।

**९०. समचतुरस्रसंस्थानस्य लक्षणम्**

तत्र यतः सर्वत्र दशताललक्षणलक्षितप्रशस्तसंस्थानशरीराकारो भवति तत्समचतुरस्रसंस्थानं नाम।

**९१. न्यग्रोधसंस्थानस्य लक्षणम्**

यत उपरि विस्तीर्णोऽधः संकुचितशरीराकारो भवति तन्न्यग्रोधसंस्थानं नाम।

**९२. स्वातिसंस्थानस्य लक्षणम्**

यतोऽधो विस्तीर्ण उपरि संकुचितशरीराकारो भवति तत्स्वातिसंस्थान नाम। स्वातिर्वल्मीकं तत्सादृश्यात्।

**९३. कुब्जसंस्थानस्य लक्षणम्**

यतो ह्रस्वः शरीराकारो भवति तत्कुब्जसंस्थानं नाम।

---

इसी प्रकार वैक्रियिक, आहारक, तैजस और कार्मण शरीर रूप से परिणत, परस्पर बद्ध पुद्गल स्कन्धों के उस-उस आकार की विषमता के अभाव का कारण वैक्रियिक, आहारक, तैजस और कार्मण शरीर संघात नामकर्म है।

**८९. संस्थान नामकर्म के छह भेद**

समचतुरस्र, न्यग्रोध, स्वाति, कुब्ज, वामन और हुण्डक ये संस्थान नामकर्म के छह भेद हैं।

**९०. समचतुरस्र संस्थान का लक्षण**

जिससे सब जगह दशताल लक्षणयुक्त प्रशस्त संस्थान सहित शरीर का आकार होता है, वह समचतुरस्र संस्थान है।

**९१. न्यग्रोध संस्थान का लक्षण**

जिसके कारण ऊपर विस्तीर्ण तथा नीचे संकुचित शरीराकार होता है, वह न्यग्रोध संस्थान है।

**९२. स्वाति संस्थान का लक्षण**

जिसके कारण नीचे विस्तीर्ण तथा ऊपर संकुचित शरीर का आकार होता है, वह वल्मीक (वामी) सदृश होने के कारण स्वातिसंस्थान कहलाता है।

**९३. कुब्जक संस्थान का लक्षण**

जिसके कारण शरीर का आकार छोटा (कुबड़ा) होता है, वह कुब्जक संस्थान नामकर्म है।

**९४. वामनसंस्थानस्य लक्षणम्**

यतो दीर्घहस्तपादा ह्रस्वकबन्धश्च शरीराकारो भवति तद्वामनसंस्थानं नाम।

**९५. हुण्डकसंस्थानस्य लक्षणम्**

यतः पाषाणपूर्णगोणिवत् ग्रन्थ्यादिविषमशरीराकारो भवति तद् हुण्डकसंस्थानं नाम।

**९६. अङ्गोपाङ्गनामकर्मणस्त्रयो भेदाः**

औदारिकवैक्रियिकाहारकशरीरभेदादङ्गोपाङ्गनाम त्रिधा।

**९७. औदारिकशरीराङ्गोपाङ्गस्य लक्षणम्**

तत्रौदारिकशरीरस्य चरणद्वयबाहुद्वयनितम्बपृष्ठवक्षःशीर्षभेदादष्टाङ्गानि अङ्गुलीकर्ण-नासिकाद्युपाङ्गानि करोति यत्तदौदारिकशरीराङ्गोपाङ्गनाम।

**९८. वैक्रियिकाहारकशरीराङ्गोपाङ्गयोर्लक्षणे**

एवं वैक्रियिकाहारकशरीरयोरपि तदङ्गोपाङ्गकारकं वैक्रियिकाहारक-शरीराङ्गोपाङ्गनामद्वयं ज्ञातव्यम्।

**९९. संहनननामकर्मणः षड् भेदाः**

वज्रवृषभनाराचसंहननवज्रनाराचनाराचार्धनाराचकीलितासंप्राप्तसृपाटिकाभेदतः संहननं नाम षोढा।

---

**९४. वामन संस्थान का लक्षण**

जिसके कारण हाथ और पैर लम्बे तथा कबन्ध (धड़) छोटा होता है, उसे वामन संस्थान कहते हैं।

**९५. हुण्डक संस्थान का लक्षण**

जिसके कारण पत्थर भरी हुई गौन की तरह, ग्रन्थि आदि से युक्त विषम शरीराकार होता है, उसे हुण्डक संस्थान कहते हैं।

**९६. अंगोपांग नामकर्म के भेद**

औदारिक, वैक्रियिक और आहारक ये अंगोपांग नामकर्म के तीन भेद हैं।

**९७. औदारिक शरीर अंगोपांग का लक्षण**

औदारिक शरीर के दो पैर, दो हाथ, नितम्ब, पीठ, वक्षस्थल तथा शीर्ष ये आठ अंग और अंगुली, कर्ण, नासिका आदि उपांग जिसके कारण होते हैं, उसे औदारिक शरीर अंगोपांग कहते हैं।

**९८. वैक्रियिक तथा आहारक शरीर अंगोपांग का लक्षण**

इसी तरह जिनके कारण वैक्रियिक तथा आहारक शरीर के अंगोपांग होते हैं, उन्हें क्रमशः वैक्रियिक तथा आहारक शरीर अंगोपांग कहते हैं।

**९९. संहनन नामकर्म के छह भेद**

वज्रवृषभनाराचसंहनन, वज्रनाराचसंहनन, नाराचसंहनन, अर्धनाराचसंहनन, कीलितसंहनन तथा असंप्राप्तसृपाटिकासंहनन ये संहनन नामकर्म के छह भेद हैं।

**१००. वज्रवृषभनाराचसंहननस्य लक्षणम्**

तत्र वज्रवत् स्थिरास्थिऋषभो वेष्टनं वज्रवत् वेष्टनकीलकबन्धो यतो भवति तद्वज्रवृषभनाराच-संहननं नाम।

**१०१. वज्रनाराचसंहननस्य लक्षणम्**

यतो वज्रवत् स्थिरास्थिकीलकबन्धसामान्यवेष्टनं च भवति तद्वज्रनाराचसंहननम्।

**१०२. नाराचसंहननस्य लक्षणम्**

यतो वज्रवत् स्थिरास्थिबन्धसामान्यकीलिकावेष्टनमेतद्द्वयं भवति तन्नाराचसंहननं नाम।

**१०३. अर्धनाराचसंहननस्य लक्षणम्**

यतस्सामान्यास्थिबन्धार्धकीलिका भवति तदर्धनाराचसंहननं नाम।

**१०४. कीलितसंहननस्य लक्षणम्**

यतः कीलित इव सामान्यास्थिबन्धो भवति तत्कीलितसंहननं नाम।

**१०५. असंप्राप्तसृपाटिकासंहननस्य लक्षणम्**

यतः परस्परासंबद्धास्थिबन्धो भवति तदसंप्राप्तसृपाटिकासंहननं नाम।

---

**१००. वज्रवृषभनाराच संहनन का लक्षण**

जिसके कारण वज्र की तरह स्थिर अस्थि और वृषभ रूप वेष्टन तथा वज्र की तरह वेष्टन और कीलक बन्ध होता है, उसे वज्रवृषभनाराच संहनन कहते हैं।

**१०१. वज्रनाराच संहनन का लक्षण**

जिसके कारण वज्र की तरह स्थिर अस्थि तथा कीलक बन्ध होता है तथा वेष्टन सामान्य होता है, उसे वज्रनाराच संहनन कहते हैं।

**१०२. नाराच संहनन का लक्षण**

जिसके कारण वज्र की तरह स्थिर अस्थिबन्ध तथा सामान्य कीलक और वेष्टन होते हैं, उसे नाराच संहनन कहते हैं।

**१०३. अर्धनाराच संहनन का लक्षण**

जिसके कारण सामान्य अस्थिबन्ध अर्ध कीलित होता है, उसे अर्धनाराच संहनन कहते हैं।

**१०४. कीलित संहनन का लक्षण**

जिसके कारण कीलित की तरह सामान्य अस्थिबन्ध होता है, वह कीलित संहनन है।

**१०५. असंप्राप्तसृपाटिका संहनन का लक्षण**

जिसके कारण अस्थिबन्ध परस्पर असम्बद्ध होता है, उसे असम्प्राप्तसृपाटिका संहनन कहते हैं।

**१०६. वर्णनामकर्मण: पञ्च भेदा:**

श्वेतपीतहरितारुणकृष्णभेदाद् वर्णनाम पञ्चधा।

**१०७. वर्णनामकर्मण: सामान्यलक्षणम्**

तत्तत्स्वस्वशरीराणां श्वेतादिवर्णा न्यत्करोति तद्वर्णनाम।

**१०८. गन्धनामकर्मण: द्वौ भेदौ**

सुगन्धदुर्गन्धभेदाद् गन्धनाम द्वेधा।

**१०९. गन्धनामकर्मण: लक्षणम्**

स्वस्वशरीराणां स्वस्वगन्धं करोति यत्तद् गन्धनाम।

**११०. रसनामकर्मण: पञ्च भेदा:**

तिक्तकटुकषायाम्लमधुरभेदाद्रसनाम पञ्चधा।

**१११. रसनामकर्मण: लक्षणम्**

तत्तत्स्वस्वशरीराणां यत्स्वस्वरसं करोति तद्रसनाम।

**११२. लवणो नाम षष्ठो रस: न पृथक्**

लवणो नाम रसो लौकिकै: षष्ठोऽस्ति। स मधुररसभेद एवेति परमागमे पृथक्त्वेन नोक्त:, लवणं विना इतररसानां स्वादुत्वाभावात्।

---

**१०६. वर्ण नामकर्म के पाँच भेद**

श्वेत, पीत, हरित, अरुण तथा कृष्ण के भेद से वर्ण नामकर्म पाँच प्रकार का है।

**१०७. वर्ण नामकर्म का सामान्य लक्षण**

अपने-अपने शरीर का श्वेत आदि वर्ण जिसके कारण होता है, उसे वर्ण नाम कहते हैं।

**१०८. गन्ध नामकर्म के दो भेद**

सुगन्ध और दुर्गन्ध के भेद से गन्ध नाम दो प्रकार का है।

**१०९. गन्ध नामकर्म का सामान्य लक्षण**

अपने-अपने शरीर की गन्ध जिस कारण होती है, उसे गन्ध नामकर्म कहते हैं।

**११०. रस नामकर्म के पाँच भेद**

तिक्त, कटु, कषाय, आम्ल तथा मधुर के भेद से रस नामकर्म के पाँच भेद हैं।

**१११. रस नामकर्म का सामान्य लक्षण**

अपने-अपने शरीर का जो अपना-अपना रस करता है, उसे रस नामकर्म कहते हैं।

**११२. लवण नामक छठा रस**

लवण नामक छठा रस लोक में माना जाता है। यह मधुर रस का ही भेद है, इसलिए परमागम में अलग से नहीं कहा; क्योंकि नमक के बिना तो अन्य सभी रस फीके हैं।

**११३. स्पर्शनामकर्मण: अष्टभेदा:**

मृदुकर्कशगुरुलघुशीतोष्णस्निग्धरूक्षभेदात्स्पर्शननामाष्टकम्।

**११४. स्पर्शनामकर्मण: लक्षणम्**

तत्तत्स्वस्वशरीराणां स्वस्वस्पर्शं करोति।

**११५. आनुपूर्विनामकर्मण: चत्वारो भेदा:**

नारकतिर्यङ्‌मनुष्यदेवगत्यानुपूर्विभेदादानुपूर्विनाम चतुर्धा।

**११६. आनुपूर्विनामकर्मण: लक्षणम्**

स्वस्वगतिगमने विग्रहतो त्यक्तपूर्वशरीराकारं करोति।

**११७. अगुरुलघुनामकर्मण: लक्षणम्**

अगुरुलघुनाम स्वस्वशरीरं गुरुत्वलघुत्ववर्जितं करोति।

**११८. उपघातनामकर्मण: लक्षणम्**

उपघातनाम स्वबाधाकारकं तुन्दादिशरीरावयवं करोति।

**११९. परघातनामकर्मण: लक्षणम्**

---

**११३. स्पर्श नामकर्म के आठ भेद**

मृदु, कर्कश, गुरु, लघु, शीत, उष्ण, स्निग्ध तथा रूक्ष के भेद से स्पर्श नामकर्म आठ प्रकार का है।

**११४. स्पर्श नामकर्म का सामान्य लक्षण**

स्पर्श नामकर्म उस-उस अपने-अपने शरीर का अपना-अपना स्पर्श उत्पन्न करता है।

**११५. आनुपूर्वी नामकर्म के भेद**

नरकगत्यानुपूर्वी, तिर्यग्गत्यानुपूर्वी, मनुष्यगत्यानुपूर्वी के तथा देवगत्यानुपूर्वी के भेद से आनुपूर्वि के चार भेद हैं।

**११६. आनुपूर्वि का लक्षण**

इसके कारण अपनी-अपनी गति में जाने के लिए विग्रहगति में पहले छोड़े गये शरीर का आकार होता है।

**११७. अगुरुलघु नामकर्म का लक्षण**

अगुरुलघु नामकर्म अपने-अपने शरीर को गुरुत्व और लघुत्व से रहित करता है।

**११८. उपघात नामकर्म का लक्षण**

उपघात नामकर्म अपने को बाधाकारक तोंद आदि शरीरावयवों को करता है।

**११९. परघात नामकर्म का लक्षण**

परघातनाम परबाधाकारकं सर्पदंष्ट्रशृङ्गादिशरीरावयवं करोति।

**१२०. आतपनामकर्मण: लक्षणम्**

आतपनामोष्णप्रभां करोति तत् सूर्यबिम्बे बादरपर्याप्तपृथ्वीकायिके भवति।

**१२१. उद्योतनामकर्मण: लक्षणम्**

उद्योतनाम शीतलप्रभां करोति, तत् चन्द्रतारकादिबिम्बेषु तेजोवायुसाधारणवर्जितचन्द्रतारकादि-बिम्बजनितबादरपर्याप्ततिर्यग्जीवेषु भवति।

**१२२. उच्छ्वासनामकर्मण: लक्षणम्**

उच्छ्वासनाम उच्छ्वासनि:श्वासं करोति।

**१२३. विहायोगतिनामकर्मण: द्वौ भेदौ**

विहायोगतिनाम प्रशस्ताप्रशस्तभेदाद् द्विधा।

**१२४. प्रशस्तविहायोगते: लक्षणम्**

तत्र प्रशस्तविहायोगतिनाम मनोज्ञं गमनं करोति।

**१२५. अप्रशस्तविहायोगते: लक्षणम्**

अप्रशस्तविहायोगतिरप्रशस्तगमनं करोति।

---

परघात नामकर्म दूसरों को बाधा देने वाले सर्पदाढ़, सींग आदि शरीरावयव करता है।

**१२०. आतप नामकर्म का लक्षण**

आतप नामकर्म उष्ण प्रभा करता है। वह सूर्य बिम्ब में स्थित बादर पर्याप्त पृथ्वीकायिक जीवों में होता है।

**१२१. उद्योत नामकर्म का लक्षण**

उद्योत नामकर्म शीतल प्रभा करता है। वह चन्द्र, तारागण आदि के बिम्ब में तथा तेजकायिक, वायुकायिक, साधारणकायिक जीवों के सिवाय चन्द्रतारक आदि बिम्ब में होने वाले बादर पर्याप्त तिर्यंच जीवों में होता है।

**१२२. उच्छ्वास नामकर्म का लक्षण**

उच्छ्वास नामकर्म उच्छ्वास और नि:श्वास को करता है।

**१२३. विहायोगति नामकर्म के भेद**

विहायोगति नामकर्म प्रशस्त और अप्रशस्त के भेद से दो प्रकार का है।

**१२४. प्रशस्त विहायोगति का लक्षण**

प्रशस्त विहायोगति नामकर्म मनोज्ञ गमन करता है।

**१२५. अप्रशस्त विहायोगति का लक्षण**

अप्रशस्त विहायोगति अप्रशस्त-अमनोज्ञ गमन करता है।

**१२६. त्रसनामकर्मण: लक्षणम्**

त्रसनाम द्वीन्द्रियादीनां चलनोद्वेजनादियुक्तं त्रसकायं करोति।

**१२७. स्थावरनामकर्मण: लक्षणम्**

पृथिव्यप्तेजोवायुवनस्पतय: स्थावरनाम पृथिव्याद्येकेन्द्रियाणां चलनो-द्वेजनादिरहितस्थावरकायं करोति।

**१२८. बादरनामकर्मण: लक्षणम्**

बादरनाम परैर्बाध्यमानं स्थूलशरीरं करोति।

**१२९. सूक्ष्मनामकर्मण: लक्षणम्**

सूक्ष्मनाम परैरबाध्यमानं सूक्ष्मशरीरं करोति।

**१३०. पर्याप्तनामकर्मण: लक्षणम्**

पर्याप्तनाम स्वस्वपर्याप्तीनां पूर्णतां करोति।

**१३१. अपर्याप्तनामकर्मण: लक्षणम्**

अपर्याप्तनाम स्वस्वपर्याप्तीनामपूर्णतां करोति।

**१३२. पर्याप्तीनां षड् भेदा:**

पर्याप्तयश्चाहारशरीरेन्द्रियोच्छ्वासनि:श्वासभाषामन:सम्बन्धेन षोढा भवन्ति।

---

**१२६. त्रस नामकर्म का लक्षण**

त्रस नामकर्म चलन, उद्वेजन आदि युक्त द्वीन्द्रिय आदि रूप त्रसकाय को करता है।

**१२७. स्थावर नामकर्म का लक्षण**

पृथ्वी, जल, तेज, वायु और वनस्पति स्थावर नामकर्म पृथ्वी आदि एकेन्द्रियों के चलन, उद्वेजन आदि रहित स्थावरकाय को करता है।

**१२८. बादर नामकर्म का लक्षण**

बादर नामकर्म दूसरों के द्वारा बाधा दिये जाने योग्य स्थूल शरीर को करता है।

**१२९. सूक्ष्म नामकर्म का लक्षण**

सूक्ष्म नामकर्म दूसरों के द्वारा बाधा न दिये जाने योग्य सूक्ष्म शरीर करता है।

**१३०. पर्याप्त नामकर्म का लक्षण**

पर्याप्त नामकर्म स्व-स्व पर्याप्तियों की पूर्णता को करता है।

**१३१. अपर्याप्त नामकर्म का लक्षण**

अपर्याप्त नामकर्म अपनी-अपनी पर्याप्तियों की अपूर्णता करता है।

**१३२. पर्याप्तियों के छह भेद**

आहार, शरीर, इन्द्रिय, उच्छ्वास-निश्वास, भाषा और मन ये पर्याप्ति के छह भेद हैं।

**१३३. आहारपर्याप्तेर्लक्षणम्**

तत्राहारवर्गणायातपुद्गलस्कन्धानां खलरसभागरूपेण परिणमने आत्मनः शक्तिनिष्पत्तिराहारपर्याप्तिः।

**१३४. शरीरपर्याप्तेर्लक्षणम्**

खलभागमस्थ्यादिकठिनावयवरूपेण रसभागं रसरुधिरादिद्रवावयवरूपेण च परिणमयितुं जीवस्य शक्तिनिष्पत्तिः शरीरपर्याप्तिः।

**१३५. इन्द्रियपर्याप्तेर्लक्षणम्**

स्पर्शनादीन्द्रियाणां योग्यदेशावस्थितस्वस्वविषयग्रहणे शक्तिनिष्पत्ति-रिन्द्रियपर्याप्तिः।

**१३६. उच्छ्वासनिःश्वासपर्याप्तेर्लक्षणम्**

आहारवर्गणायातपुद्गलस्कन्धानुच्छ्वासनिःश्वासरूपेण परिणमयितुं जीवस्य शक्तिनिष्पत्ति-रुच्छ्वासनिःश्वासपर्याप्तिः।

**१३७. भाषापर्याप्तेर्लक्षणम्**

भाषावर्गणायातपुद्गलस्कन्धान्सत्यादिचतुर्विधवाक्स्वरूपेण परिणमयितुं जीवस्य शक्ति-निष्पत्तिर्भाषापर्याप्तिः।

---

**१३३. आहार पर्याप्ति का लक्षण**

आहार वर्गणा द्वारा प्राप्त पुद्गल स्कन्धों का खल और रस भाग रूप परिणमन में जीव की शक्ति उत्पन्न होना आहार पर्याप्ति है।

**१३४. शरीर पर्याप्ति का लक्षण**

खल भाग को अस्थि आदि कठिन अवयव रूप से तथा रस भाग को रस, रुधिर आदि द्रव अवयव रूप से परिणत करने में जीव की शक्ति उत्पन्न होना शरीर पर्याप्ति है।

**१३५. इन्द्रिय पर्याप्ति का लक्षण**

स्पर्शन आदि इन्द्रियों के योग्य देश में अवस्थित अपना-अपना विषय ग्रहण करने में शक्ति उत्पन्न होना इन्द्रिय पर्याप्ति है।

**१३६. उच्छ्वास-निःश्वास पर्याप्ति का लक्षण**

आहार वर्गणा द्वारा प्राप्त पुद्गल स्कन्धों को उच्छ्वास-निःश्वास रूप से परिणत करने के लिए जीव की शक्ति उत्पन्न होना उच्छ्वास-निःश्वास पर्याप्ति है।

**१३७. भाषा पर्याप्ति का लक्षण**

भाषा वर्गणा द्वारा प्राप्त पुद्गल स्कन्धों को सत्य आदि चार प्रकार की वाक् रूप से परिणत करने के लिए जीव की शक्ति उत्पन्न होना भाषा पर्याप्ति है।

**१३८. मनःपर्याप्तेर्लक्षणम्**

दृष्टश्रुतानुमितार्थानां गुणदोषविचारणादिरूपभावमनःपरिणमने मनोवर्गणायातपुद्गलस्कन्धानां द्रव्यमनोरूपपरिणामेन परिणमयितुं जीवस्य शक्तिनिष्पत्तिर्मनःपर्याप्तिः।

**१३९. प्रत्येकशरीस्य लक्षणम्**

प्रत्येकशरीरनामैकस्य जीवस्यैकशरीरस्वामित्वं करोति।

**१४०. साधारणशरीरस्य लक्षणम्**

साधारणशरीरनामानन्तजीवानामेकशरीरस्वामित्वं करोति।

**१४१. स्थिरनामकर्मणः लक्षणम्**

स्थिरनाम रसरुधिरमांसमेदोऽस्थिमज्जाशुक्राणां सप्तधातूनामचलितत्वं करोति।

**१४२. अस्थिरनामकर्मणः लक्षणम्**

अस्थिरनाम तेषां चलितत्वं करोति।

**१४३. शुभनामकर्मणः लक्षणम्**

शुभनाम मस्तकादिप्रशस्तावयवं करोति।

---



**१३८. मनःपर्याप्ति का लक्षण**

देखे, सुने तथा अनुमित (अनुमान से जाने गये) अर्थों के गुण-दोष विचारणादि रूप भाव मन के परिणमन में, मनोवर्गणा रूप से प्राप्त पुद्गल स्कन्धों के द्रव्य मनरूप परिणाम द्वारा परिणत करने के लिए जीव की शक्ति उत्पन्न होना मनःपर्याप्ति है।

**१३९. प्रत्येक शरीर का लक्षण**

प्रत्येक शरीर नामकर्म एक जीव को एक शरीर का स्वामी करता है।

**१४०. साधारण शरीर का लक्षण**

साधारण शरीर नामकर्म अनन्त जीवों को एक शरीर का स्वामी करता है।

**१४१. स्थिर नामकर्म का लक्षण**

स्थिर नामकर्म रस, रुधिर, मांस, मेदा, अस्थि, मज्जा और शुक्र इन सात धातुओं की स्थिरता को करता है।

**१४२. अस्थिर नामकर्म का लक्षण**

अस्थिर नामकर्म उपर्युक्त सप्त धातुओं की अस्थिरता करता है।

**१४३. शुभ नामकर्म का लक्षण**

शुभ नामकर्म मस्तक आदि प्रशस्त अवयव करता है।

**१४४. अशुभनामकर्मणः लक्षणम्**

अशुभनामापानाद्यप्रशस्तावयवं करोति।

**१४५. सुभगनामकर्मणः लक्षणम्**

सुभगनाम परेषां रुचिरत्वं करोति।

**१४६. दुर्भगनामकर्मणः लक्षणम्**

दुर्भगनामारुचिरत्वं करोति।

**१४७. सुस्वरनामकर्मणः लक्षणम्**

सुस्वरनाम श्रवणरमणीयस्वरं करोति।

**१४८. दुस्स्वरनामकर्मणः लक्षणम्**

दुस्स्वरं नाम श्रवणदुस्सहं स्वरं करोति।

**१४९. आदेयनामकर्मणः लक्षणम्**

आदेयनाम परेर्मान्यतां करोति।

**१५०. अनादेयनामकर्मणः लक्षणम्**

अनादेयनामामान्यतां करोति।

---

**१४४. अशुभ नामकर्म का लक्षण**

अशुभ नामकर्म अपान आदि अप्रशस्त अवयवों को करता है।

**१४५. सुभग नामकर्म का लक्षण**

सुभग नामकर्म दूसरों की रुचिरता करता है।

**१४६. दुर्भग नामकर्म का लक्षण**

दुर्भग नामकर्म दूसरों की अरुचि करता है।

**१४७. सुस्वर नामकर्म का लक्षण**

सुस्वर नामकर्म कर्णप्रिय स्वर करता है।

**१४८. दुःस्वर नामकर्म का लक्षण**

दुःस्वर नामकर्म कानों को दुःसह स्वर करता है।

**१४९. आदेय नामकर्म का लक्षण**

आदेय नामकर्म दूसरों के द्वारा मान्यता करता है।

**१५०. अनादेय नामकर्म का लक्षण**

अनादेय नामकर्म अमान्यता करता है।

**१५१. यशस्कीर्तिनामकर्मणः लक्षणम्**

यशस्कीर्तिनाम गुणकीर्तनं करोति।

**१५२. अयशस्कीर्तिनामकर्मणः लक्षणम्**

अयशस्कीर्तिनाम दोषकीर्तनं करोति।

**१५३. निर्माणनामकर्मणः लक्षणम्**

निर्माणनाम शरीरवत् स्वस्वस्थानेषु स्वस्थितानुप्राञ्जलित्वं करोति।

**१५४. तीर्थकरत्वनामकर्मणः लक्षणम्**

तीर्थकरत्वं नाम पञ्चकल्याणचतुस्त्रिंशदतिशयाष्टमहाप्रातिहार्यसमवशरणादिबहुविधौ-चित्यविभूतिसंयुक्तार्हन्त्यलक्ष्मीं करोति।

## गोत्रम्

**१५५. गोत्रकर्मणः द्वौ भेदौ**

उच्चनीचभेदाद् गोत्रकर्म द्विधा।

**१५६. उच्चगोत्रस्य लक्षणम्**

तत्र महाव्रताचरणयोग्योत्तमकुलकारणमुच्चैर्गोत्रम्।

**१५७. नीचगोत्रस्य लक्षणम्**

---

**१५१. यशस्कीर्ति नामकर्म का लक्षण**

यशस्कीर्ति नामकर्म गुणकीर्तन करता है।

**१५२. अयशस्कीर्ति नामकर्म का लक्षण**

अयशस्कीर्ति दोषकीर्तन (बदनामी) करता है।

**१५३. निर्माण नामकर्म का लक्षण**

निर्माण नामकर्म शरीर के अनुसार स्व-स्व स्थानों में शरीरावयवों का उचित निर्माण करता है।

**१५४. तीर्थंकर नामकर्म**

तीर्थंकर नामकर्म पंचकल्याणक, चौंतीस अतिशय, आठ प्रातिहार्य तथा समवसरण आदि अनेक प्रकार की उचित विभूति से युक्त आर्हन्त्य लक्ष्मी को करता है।

**१५५. गोत्रकर्म के भेद**

उच्च और नीच के भेद से गोत्रकर्म दो प्रकार का है।

**१५६. उच्च गोत्रकर्म का लक्षण**

महाव्रतों के आचरण योग्य उत्तम कुल का कारण उच्च गोत्रकर्म कहलाता है।

**१५७. नीच गोत्रकर्म का लक्षण**

तद्विपरीताचरणयोग्यनीचकुलकारणं नीचैर्गोत्रम्।

## अन्तरायम्

**१५८. अन्तरायकर्मण: पञ्च भेदा:**

दानलाभभोगोपभोगवीर्याश्रयभेदादन्तरायकर्म पञ्चधा।

**१५९. दानान्तरायस्य लक्षणम्**

तत्र दानस्य विघ्नहेतुर्दानान्तरायम्।

**१६०. लाभान्तरायस्य लक्षणम्**

लाभस्य विघ्नहेतुर्लाभान्तरायम्।

**१६१. भोगान्तरायस्य लक्षणम्**

भुक्त्वा परिहातव्यो भोगस्तस्य विघ्नहेतुर्भोगान्तरायम्।

**१६२. उपभोगान्तरायस्य लक्षणम्**

भुक्त्वा पुनश्च भोक्तव्य उपभोगस्तस्य विघ्नहेतुरुपभोगान्तरायम्।

**१६३. वीर्यान्तरायस्य लक्षणम्**

वीर्यं शक्ति: सामर्थ्यं तस्य विघ्नहेतुर्वीर्यान्तरायम्।

---

ऊपर बताये के विपरीत आचरण योग्य नीच कुल का कारण नीच गोत्र है।

**१५८. अन्तराय कर्म के भेद**

दानान्तराय, लाभान्तराय, भोगान्तराय, उपभोगान्तराय तथा वीर्यान्तराय के भेद से अन्तराय कर्म पाँच प्रकार का है।

**१५९. दानान्तराय का लक्षण**

दान के विघ्न का कारण दानान्तराय होता है।

**१६०. लाभान्तराय का लक्षण**

लाभ के विघ्न का कारण लाभान्तराय है।

**१६१. भोगान्तराय का लक्षण**

जो एक बार भोगकर छोड़ दिया जाता है, उसे भोग कहते हैं। भोगों के अन्तराय का कारण भोगान्तराय है।

**१६२. उपभोगान्तराय का लक्षण**

एक बार भोगकर पुन: भोगने योग्य उपभोग कहलाता है, उसके विघ्न का कारण उपभोगान्तराय है।

**१६३. वीर्यान्तराय का लक्षण**

शक्ति या सामर्थ्य वीर्य है, उसके विघ्न का कारण वीर्यान्तराय है।

**१६४. उत्तरप्रकृतिबन्धस्य समाप्तिः**

एवमुत्तरप्रकृतिबन्धः कथितः।

**१६५. उत्तरोत्तरप्रकृतिबन्धस्यागोचरत्वम्**

उत्तरोत्तरप्रकृतिबन्धोऽगोचरो भवति।

## स्थितिबन्धः

**१६६. स्थितिबन्धकथनम्**

अथ स्थितिबन्ध उच्यते।

**१६७. स्थितिबन्धस्य लक्षणम्**

ज्ञानावरणीयादिप्रकृतीनां ज्ञानप्रच्छादनादिस्वस्वभावापरित्यागेनावस्थानं स्थितिः।

**१६८. स्थितिबन्धस्य समयः**

तत्कालश्चोपचारात्।

**१६९. ज्ञानावरणीयदर्शनावरणीयवेदनीयान्तरायस्य चोत्कृष्टा स्थितिः**

तद्यथा ज्ञानावरणीयदर्शनावरणीयवेदनीयान्तरायप्रकृतीनामुत्कृष्टा स्थितिस्त्रिंशत्कोटिकोटि-सागरोपमप्रमिता।

---

**१६४. उत्तर प्रकृति-बन्ध का उपसंहार**

इस प्रकार उत्तर प्रकृति-बन्ध कहा।

**१६५. उत्तरोत्तर प्रकृति-बन्ध की अगोचरता**

उत्तरोत्तर प्रकृति-बन्ध अगोचर है।

**१६६. स्थितिबन्ध का कथन**

अब स्थिति बन्ध कहते हैं।

**१६७. स्थितिबन्ध का लक्षण**

ज्ञानावरणीय आदि प्रकृतियों का ज्ञान को ढँकने आदि रूप अपने स्वभाव को न छोड़ते हुए स्थित रहना स्थिति है।

**१६८. स्थितिबन्ध का काल**

उसके काल को उपचार से स्थितिबन्ध कहा जाता है।

**१६९. ज्ञानावरणीय आदि कर्मों की उत्कृष्ट स्थिति**

ज्ञानावरणीय, दर्शनावरणीय, वेदनीय तथा अन्तराय की उत्कृष्ट स्थिति तीस कोटि-कोटि सागर प्रमाण है।

**१७०. दर्शनमोहनीयस्योत्कृष्टा स्थितिः**

दर्शनमोहनीयस्य सप्ततिः कोटिकोटिसागरोपमप्रमाणा।

**१७१. चारित्रमोहनीयस्योत्कृष्टा स्थितिः**

चारित्रमोहनीयस्य चत्वारिंशत्कोटिकोटिसागरोपमप्रमिता।

**१७२. नामगोत्रयोरुत्कृष्टा स्थितिः**

नामगोत्रयोर्विंशतिकोटिकोटिसागरोपमप्रमात्री।

**१७३. आयुकर्मणः उत्कृष्टा स्थितिः**

आयुष्यकर्मणस्त्रयस्त्रिंशत्सागरोपमप्रमाणा। इत्युत्कृष्टस्थितिरुक्ता।

**१७४. वेदनीयस्य जघन्यस्थितिः**

वेदनीयस्य जघन्यस्थितिर्द्वादशमुहूर्ता।

**१७५. नामगोत्रयोः जघन्यस्थितिः**

नामगोत्रयोरष्टौ मुहूर्ता।

**१७६. शेषाणां जघन्यस्थितिः**

शेषाणां ज्ञानावरणीयदर्शनावरणीयमोहनीयायुष्यान्तरायाणां जघन्य-स्थितिरन्तर्मुहूर्ता।

---

**१७०. दर्शनमोहनीय की उत्कृष्ट स्थिति**

दर्शनमोहनीय की उत्कृष्ट स्थिति सत्तर कोटि-कोटि सागर प्रमाण है।

**१७१. चारित्रमोहनीय की उत्कृष्ट स्थिति**

चारित्रमोहनीय की उत्कृष्ट स्थिति चालीस कोटि-कोटि सागर प्रमाण है।

**१७२. नाम और गोत्र की उत्कृष्ट स्थिति**

नाम और गोत्र की उत्कृष्ट स्थिति बीस कोटिकोटि सागर प्रमाण है।

**१७३. आयुकर्म की उत्कृष्ट स्थिति**

आयुकर्म की उत्कृष्ट स्थिति तैंतीस सागर प्रमाण है। इस प्रकार उत्कृष्ट स्थिति कही।

**१७४. वेदनीयकर्म की जघन्य स्थिति**

वेदनीयकर्म की जघन्य स्थिति बारह मुहूर्त है।

**१७५. नाम और गोत्र की जघन्य स्थिति**

नाम और गोत्र की जघन्य स्थिति आठ मुहूर्त है।

**१७६. शेष कर्मों की जघन्य स्थिति**

शेष ज्ञानावरणीय, दर्शनावरणीय, आयु तथा अन्तराय की जघन्य स्थिति अन्तर्मुहूर्त है।

**१७७. सर्वेषां कर्मणां स्थितिः**

सर्वेषां कर्मणां स्थितिर्नानाविकल्पा।

**१७८. स्थितिबन्धकथनस्य उपसंहारः**

इति स्थितिरुक्ता।

**अनुभागबन्धः**

**१७९. अनुभागबन्धकथनस्य प्रतिज्ञा**

अथानुभाग उच्यते।

**१८०. अनुभागबन्धस्य लक्षणम्**

कर्मप्रकृतीनां तीव्रमन्दमध्यमशक्तिविशेषोऽनुभागः।

**१८१. घातिकर्मणामनुभागः**

घातिकर्मणामनुभागो लतादार्वस्थिशैलसमानचतुःस्थानः।

**१८२. अघातिकर्मणामनुभागः**

अघातिकर्मणामशुभप्रकृतीनामनुभागो निम्बकाञ्जीरविषहालाहल-सदृशचतुःस्थानः, शुभप्रकृती-नामनुभागो गुडखाण्डशर्करामृतसमानचतुःस्थानः।

---

**१७७. सभी कर्मों की स्थिति**

सभी कर्मों की स्थिति नाना प्रकार की है।

**१७८. स्थितिबन्ध का उपसंहार**

इस प्रकार स्थितिबन्ध कहा।

**१७९. अनुभाग बन्ध कहने की प्रतिज्ञा**

अब अनुभाग बन्ध कहते हैं।

**१८०. अनुभाग बन्ध का लक्षण**

कर्मप्रकृतियों की तीव्र, मन्द, मध्यम शक्ति विशेष को अनुभाग कहा है।

**१८१. घाति कर्मों का अनुभाग**

घाति कर्मों का अनुभाग लता, दारू (काष्ठ), अस्थि तथा शिला के समान चार प्रकार है।

**१८२. अघाति कर्मों का अनुभाग**

अघाति कर्मों की अशुभ प्रकृतियों का अनुभाग नीम, कांजीर, विष और हालाहल के समान चार प्रकार का तथा शुभ प्रकृतियों का अनुभाग गुड़, खाण्ड़, शर्करा तथा अमृत के समान चार प्रकार का है।

**१८३. अनुभागबन्धकथनस्योपसंहारः**

इत्यनुभाग उक्तः।

**प्रदेशबन्धः**

**१८४. प्रदेशबन्धकथनस्य प्रतिज्ञा**

अथ प्रदेश उच्यते।

**१८५. प्रदेशबन्धस्य लक्षणम्**

आत्मप्रदेशेषुद्व्यर्धगुणहानिगुणितसमयप्रबद्धमात्राणि सिद्धराश्यनन्तैकभागप्रमितानामभव्य-जीवस्यानन्तगुणानां सर्वकर्मपरमाणूनां परस्परप्रदेशानुप्रवेशलक्षणः प्रदेशबन्धः।

**१८६. प्रदेशबन्धस्योपसंहारः**

इति प्रदेशबन्ध उक्तः।

**१८७. द्रव्यकर्मणामुपसंहारः**

एवं प्रकृतिस्थित्यनुभागप्रदेशविकल्पानि पौद्गलिकानि द्रव्यकर्माणि कथितानि।

**भावकर्म**

**१८८. भावकर्मणः लक्षणम्**

उक्तज्ञानावरणादिद्रव्यकर्मोदयजनिता आत्मनोऽज्ञानरागमिथ्यादर्शनादिपरिणामविशेषा भावकर्माणि।

---

**१८३. अनुभाग बन्ध कथन का उपसंहार**

इस प्रकार अनुभाग बन्ध कहा।

**१८४. प्रदेश बन्ध कथन की प्रतिज्ञा**

आगे प्रदेशबन्ध कहते हैं।

**१८५. प्रदेश बन्ध का लक्षण**

आत्मा के प्रदेशों में डेढ़ गुणहानि गुणित समयप्रबद्ध मात्र की सत्ता रहती है तथा प्रति समय सिद्धराशि के अनन्तवें भाग प्रमाण या अभव्य जीवों के अनन्तगुणें समस्त कर्म परमाणुओं का परस्पर प्रदेशों में अनुप्रवेश होना प्रदेशबन्ध है।

**१८६. प्रदेशबन्ध कथन का उपसंहार**

इस प्रकार प्रदेशबन्ध कहा।

**१८७. द्रव्यकर्मों के कथन का उपसंहार**

इस प्रकार प्रकृति, स्थिति, अनुभाग तथा प्रदेश के भेद से पौद्गलिक द्रव्य कर्म कहे।

**१८८. भाव कर्म का लक्षण**

उक्त ज्ञानावरणादि द्रव्य कर्मों के उदय से होने वाले आत्मा के अज्ञान, राग, मिथ्यादर्शन आदि

**१८९. भावकर्मणां परिमाणम्**

तान्यप्यसंख्यातलोकमात्राणि भवन्ति।

## नोकर्म

**१९०. नोकर्मणः लक्षणम्**

औदारिकवैक्रियिकाहारकतैजसशरीरपरिणमनपुद्गलस्कन्धा नोकर्मद्रव्याणि।

**१९१. संसारिजीवस्य लक्षणम्**

एवंविधद्रव्यभावनोकर्मसंयुक्ताः पञ्चविधसंसरणपरिणताश्चतसृषु गतिषु परिवर्तमान-जीवास्संसारिणः।

**१९२. मुक्तजीवस्य लक्षणम्**

तत्कर्मत्रयमुक्तास्सिद्धगतावस्थिताः क्षायिकसम्यक्त्वज्ञानदर्शनवीर्य-सूक्ष्मत्वावगाहनागुरु-लघुत्वाव्याबाधरूपाष्टगुणपरिणताः सिद्धपरमेष्ठिनो जीवा मुक्ताः।

**१९३. संसारिजीवानां द्वौ भेदौ**

तत्र संसारिणो जीवा भव्याभव्यभेदेन द्विधा।

**१९४. भव्यजीवस्य लक्षणम्**

---

परिणामविशेष भाव कर्म हैं।

**१८९. भाव कर्मों का परिमाण**

वे भाव कर्म असंख्यात लोक प्रमाण हैं।

**१९०. नोकर्म का लक्षण**

औदारिक, वैक्रियिक, आहारक तथा तैजस शरीर के रूप में परिणत पुद्गल स्कन्ध नोकर्म द्रव्य हैं।

**१९१. संसारी जीव का लक्षण**

इस प्रकार द्रव्य कर्म, भाव कर्म तथा नोकर्म से युक्त, पाँच प्रकार के परिवर्तनों में परिणत तथा चार गतियों में भ्रमण करते हुए जीव संसारी हैं।

**१९२. मुक्त जीव का लक्षण**

उक्त तीन प्रकार के कर्मों से मुक्त, सिद्ध गति में स्थित, क्षायिक सम्यक्त्व, क्षायिक ज्ञान, क्षायिक दर्शन, क्षायिक वीर्य, सूक्ष्मत्व, अवगाहनत्व, अगुरुलघुत्व तथा अव्याबाधत्वरूप अष्ट गुण परिणत सिद्ध परमेष्ठी मुक्त जीव है।

**१९३. संसारी जीवों के दो भेद**

संसारी जीव भव्य और अभव्य के भेद से दो प्रकार के हैं।

**१९४. भव्य जीव का लक्षण**

तत्र रत्नत्रयसामग्र्याः सकलकर्मक्षयं कृत्वानन्तज्ञानादिस्वरूपोपलब्धि-भवनयोग्यशक्ति-विशेषसहिता भव्याः।

**१९५. भव्यजीवानां चतुर्दशगुणस्थानानि**

तत्र चतुर्दशगुणस्थानवर्तिनो भव्याः।

**१९६. अभव्यजीवस्य लक्षणम्**

एकस्मान्मिथ्यादृष्टिगुणस्थानादनिवर्तमाना अभव्याः।

**१९७. अभव्यानां करणत्रयाभावः**

तेषां कदाचिदपि सम्यग्दर्शनप्राप्तिकारणकरणत्रयविधानासंभवात्।

**१९८. मिथ्यात्वगुणस्थानम्**

तत्र दर्शनमोहनीयस्य मिथ्यात्वप्रकृतेरुदयादतत्त्वश्रद्धानरूपमिथ्यादर्शनपरिणतस्सर्वज्ञवीतराग-प्रणीतं जीवादितत्त्वमश्रद्धानस्संशयानो वान्यप्रणीतमतत्त्वं श्रद्दधानो वा जीवो मिथ्यादृष्टिरिति प्रथमगुणस्थान-वर्ती भवति।

**१९९. मिथ्यादृष्टेः सम्यक्त्वस्य विधानम्**

अनादिमिथ्यादृष्टिर्वा सादिमिथ्यादृष्टिर्वा लब्धिपञ्चकसंनिधाने प्रथमोपशमसम्यक्त्वं गृह्णाति।

---

रत्नत्रय रूप सामग्री के द्वारा समस्त कर्मक्षय करके अनन्त-ज्ञान आदि स्वरूप प्राप्ति होने योग्य शक्ति विशेष से सहित जीव भव्य जीव कहलाते हैं।

**१९५. भव्य जीवों के चौदह गुणस्थान**

चौदह गुणस्थानों में स्थित भव्य होते हैं।

**१९६. अभव्य जीव का लक्षण**

केवल एक मिथ्यात्व गुणस्थान में ही रहने वाले अभव्य जीव होते हैं।

**१९७. अभव्यों के करणत्रय का अभाव**

उनके कभी भी सम्यग्दर्शन की प्राप्ति के कारण करणत्रय होना असंभव है।

**१९८. मिथ्यात्व गुणस्थान**

दर्शनमोहनीय की मिथ्यात्व प्रकृति के उदय से अतत्त्वश्रद्धान रूप मिथ्यादर्शन से युक्त, सर्वज्ञ वीतराग प्रणीत जीव आदि तत्त्वों का अश्रद्धान करने वाला अथवा संशय करने वाला या अन्य प्रणीत अतत्त्वों का श्रद्धान करने वाला जीव मिथ्यादृष्टि नामक प्रथम गुणस्थानवर्ती होता है।

**१९९. मिथ्यादृष्टि के सम्यक्त्व का विधान**

अनादि मिथ्यादृष्टि अथवा सादि मिथ्यादृष्टि पाँच लब्धियों के सद्भाव में प्रथमोपशम सम्यक्त्व को ग्रहण करता है।

**२००. क्षयोपशमलब्धिः**

तद्यथा कदाचित्कस्यचिज्जीवस्याशुभकर्मणामनुभागः प्रतिसमयमनन्त-गुणहान्युदेति, इति तेषां सर्वघातिस्पर्धकानामनन्तगुणहानिं विधाय तद्द्रव्यस्य सदवस्था उपशमः, अनन्तहीनानुभागोदये सत्यपि क्षयोपशम इत्युच्यते। तस्य लब्धिः क्षयोपशमलब्धिः।

**२०१. विशुद्धिलब्धिः**

क्षयोपशमलब्धौ सत्यामुत्पन्नस्सातादिप्रशस्तप्रकृतिबन्धकारणं जीवस्य यो विशुद्धि-परिणामस्तल्लाभो विशुद्धिलब्धिः।

**२०२. देशनालब्धिः**

षड्द्रव्यपञ्चास्तिकायसप्ततत्त्वनवपदार्थानामुपदेशकारकाचार्योपाध्याय-देशनालाभः उपदेशकर-हितक्षेत्रे पूर्वोपदिष्टजीवादितत्त्वधारणस्मरणलाभो वा देशनालब्धिः।

**२०३. प्रायोग्यतालब्धिः**

आयुर्वर्जितसप्तकर्मणामुत्कृष्टस्थितिं विशुद्धिपरिणामविशेषेण खण्डयित्वान्तःकोटिकोटिस्थितिं स्थापयति लतादार्वस्थिशैलरूपघातिकर्मानुभागं खण्डयित्वा लतादारुरूपद्विस्थानं स्थापयति

---

**२००. क्षयोपशमलब्धि**

कभी किसी जीव के अशुभ कर्मों का अनुभाग प्रतिसमय अनन्त गुण हानि क्रम से उदित होता है। इस प्रकार उन सर्वघाति स्पर्धकों की अनन्त गुणहानि करके उस द्रव्य का सदवस्था रूप उपशम अनन्त हीन अनुभाग के उदय होने पर भी क्षयोपशम कहलाता है। उसकी लब्धि क्षयोपशमलब्धि है।

**२०१. विशुद्धिलब्धि**

सातादि प्रशस्त प्रकृतियों के बन्ध का कारण जीव का जो विशुद्धि परिणाम क्षयोपशम लब्धि के होने पर उत्पन्न होता है उसका लाभ विशुद्धिलब्धि है।

**२०२. देशनालब्धि**

छह द्रव्य, पाँच अस्तिकाय, सात तत्त्व तथा नव पदार्थों के उपदेश करने वाले आचार्य, उपाध्याय की देशना का लाभ अथवा उपदेशक रहित क्षेत्र में पूर्व उपदिष्ट जीव आदि तत्त्वों के धारण, स्मरण का लाभ देशनालब्धि है।

**२०३. प्रायोग्यतालब्धि**

आयु को छोड़कर शेष सात कर्मों की उत्कृष्ट स्थिति को विशुद्धि परिणामविशेष द्वारा खण्डित करके अन्तःकोटिकोटि प्रमाण स्थिति में स्थापित करना तथा लता, दारू (काष्ठ), अस्थि, शैलरूप घाति कर्मों के अनुभाग को खण्डित करके लता, दारूरूप दो स्थानों में स्थापित करना है। इस

तद्विशुद्धि-परिणामयोग्यतालाभः प्रायोग्यतालब्धिः।

**२०४. करणलब्धिः**

दर्शनमोहोपशमनादिकरणविशुद्धपरिणामः करण इत्युच्यते। तल्लाभः करणलब्धि।

**२०५. करणस्य त्रयो भेदाः**

स च करणोऽधःप्रवृत्तकरणोऽपूर्वकरणोऽनिवृत्तिकरणश्चेति त्रिधा।

**२०६. अधःप्रवृत्तकरणस्य कालः**

तत्राधःप्रवृत्तकरणकालोऽन्तर्मुहूर्तमात्रः।

**२०७. अपूर्वकरणस्य कालः**

ततः संख्येयगुणहीनोऽपूर्वकरणकालः।

**२०८. अनिवृत्तिकरणस्य कालः**

ततः संख्येयगुणहीनोऽनिवृत्तिकरणकालः।

**२०९. त्रयाणां करणानां कालः**

त्रितयं समुदितमप्यन्तर्मुहूर्तकाल एव।

**२१०. करणत्रयेषु विशुद्धिः**

---

प्रकार की विशुद्धिरूप परिणामों की योग्यता का लाभ प्रायोग्यतालब्धि है।

**२०४. करणलब्धि**

दर्शनमोह के उपशम आदि करने वाला विशुद्धि परिणाम करण कहलाता है, उसका लाभ करणलब्धि है।

**२०५. करण के तीन भेद**

वह करण अधःप्रवृत्तकरण, अपूर्वकरण तथा अनिवृत्तिकरण के भेद से तीन प्रकार का है।

**२०६. अधःप्रवृत्तकरण का काल**

अधःप्रवृत्तकरण का काल अन्तर्मुहूर्त मात्र है।

**२०७. अपूर्वकरण का काल**

उससे संख्यात गुणहीन अपूर्वकरण का काल है।

**२०८. अनिवृत्तिकरण का काल**

उससे संख्यात गुणहीन अनिवृत्तिकरण का काल है।

**२०९. तीनों करणों का सम्मिलित काल**

तीनों करणों का सम्मिलित काल भी अन्तर्मुहूर्त ही है।

**२१०. करणत्रय में विशुद्धि**

अध:प्रवृत्तकरणप्रथमसमयादारभ्य विशुद्धि: प्रतिसमयमनन्तगुणा अप्यनिवृत्तिकरणचरमसमयं वर्तन्ते।

**२११. अध: प्रवृत्तकरणकाले विशुद्धिपरिणाम:**

तत्राध:प्रवृत्तकरणकाले संख्यातलोकमात्रविशुद्धिपरिणामविकल्पा जघन्यमध्यमोत्कृष्टा: सन्ति।

**२१२. अध:प्रवृत्तकरणस्याङ्कसंदृष्टि:**

तत्राङ्कसंदृष्ट्याध:प्रवृत्तकरणलक्षणमुच्यते–प्रथमसमयनानाजीवानां विशुद्धिपरिणामविकल्पानां जघन्यखण्डमिदम् ३९। अस्माद्द्वितीयं खण्डं विशेषाधिकम् ४०। तृतीयं विशेषाधिकं ४१। एवं चरमचतुर्थखण्डं विशेषाधिकं ४२। द्वितीयसमये जघन्यखण्डं प्रथमसमयजघन्यखण्डाद्विशेषाधिकम् ४०। ततो द्वितीयखण्डं विशेषाधिकं ४१। ततस्तृतीयखण्डं विशेषाधिकं ४२। एवं चरमखण्डं विशेषाधिकं ४३। एवं तृतीयादिसमयेषु जघन्यादिखण्डानि विशेषाधिकानि भवन्ति। ये केषांचिज्जीवानामुपरिम-समयपरिणमनवर्तिनां विशुद्धिपरिणामविकल्पा अध:स्तनसमयवर्तिनां केषांचिज्जीवानां विशुद्धिपरिणाम-विकल्पैस्सह सदृशास्सन्तीत्यध:प्रवृत्तकरणसंज्ञा युक्ता। तत्र प्रथमसमयजघन्यखण्डं चरमसमयचरमखण्डं च केनापि जघन्योत्कृष्टेन सदृशं न भवति, तथापि

---

अध:प्रवृत्तकरण के प्रथम समय से आरम्भ करके विशुद्धि प्रतिसमय अनन्तगुणी होकर भी अनिवृत्तिकरण के चरम समय तक रहती है।

**२११. अध:प्रवृत्तकरण काल में विशुद्धि परिणाम**

अध:प्रवृत्तकरण के समय में असंख्यात लोकमात्र विशुद्धि परिणाम विकल्प जघन्य, मध्यम तथा उत्कृष्ट होते हैं।

**२१२. अध:प्रवृत्तकरण की अंक संदृष्टि**

अंकसंदृष्टि की अपेक्षा अध:प्रवृत्तकरण का लक्षण कहते हैं–प्रथम समय में नाना जीवों के विशुद्धि परिणाम विकल्पों का जघन्य खण्ड ३९ है। इससे द्वितीय खण्ड विशेष अधिक है ४०। इससे तीसरा विशेष अधिक है ४१। इसी प्रकार अन्तिम चौथा खण्ड भी विशेष अधिक है ४२। द्वितीय समय में जघन्य खण्ड प्रथम समय के जघन्य खण्ड से विशेष अधिक है ४०। उससे द्वितीय खण्ड विशेष अधिक है ४१। उससे तृतीय खण्ड विशेष अधिक है ४२। इसी प्रकार अन्तिम चौथा खण्ड विशेष है ४३। इस प्रकार तृतीय आदि समयों में तथा अन्तिम समय में जघन्य आदि खण्ड विशेष अधिक होते हैं। जो किन्हीं जीवों के ऊपर के समय में परिणमन करने वाले विशुद्धि परिणाम विकल्प निम्न समयवर्ती किन्हीं जीवों के विशुद्धि परिणाम विकल्पों के साथ समान होते हैं। इसलिए इसकी अध:प्रवृत्तकरण संज्ञा उचित है। यद्यपि प्रथम समय का जघन्य खण्ड तथा अन्तिम समय का अन्तिम खण्ड किसी भी जघन्य या उत्कृष्ट खण्ड के सदृश

तद्द्वयं विहायेतरेषां सर्वेषां खण्डानामुपर्यधश्च सादृश्यमस्तीति, तेनाध:प्रवृत्तकरणसंज्ञा न विरुध्यते। अस्मिन्नध:प्रवृत्तकरणे प्रशस्तप्रकृतीनामनुभागः प्रतिसमयेऽनन्तगुणं वर्धते, अप्रशस्तप्रकृतीनामनुभागः प्रतिसमयमनन्तगुणहीनो भवति, संख्यात-सहस्रस्थितिबन्धापसरणानि भवन्ति, प्रतिसमयमनन्त-गुणवृद्ध्या विशुद्धिश्च वर्तते, इत्येतानि चत्वार्यावश्यकानि सन्ति। पुनर्गुणश्रेणि-निर्जरागुण-संक्रमस्थितिकाण्डकघातानुभागकाण्डकघाताश्चेति चत्वार्यावश्यकानि न सन्ति, तत्कारण-विशुद्धिविशेषाभावात्।

## २१३. अपूर्वकरणम्

ततः परमपूर्वकरणप्रथमसमये गुणश्रेणिनिर्जरागुणसंक्रमस्थितिकाण्ड-कघाताश्च प्रारभ्यन्ते। अत्रापि जघन्यमध्यमोत्कृष्टा विशुद्धिपरिणामाध:प्रवृत्तपरिणमेभ्यो संख्यातलोकगुणिताः सन्ति। तत्र प्रथमसमयवर्तिनानाजीवविशुद्धिपरिणामा असंख्यातलोकमाता अङ्कसंदृष्ट्या ४५६। एते सर्वेऽप्येकेनैव खण्डं बहुखण्डानीव सन्ति। उपरितनसमयपरिणामैस्सादृश्याभावात्।

द्वितीयसमयपरिणामा विशेषाधिकाः ४७२। एतेऽप्येकमेव खण्डम्। उपर्यधोऽधत्व-सादृश्याभावाद्बहुखण्डाभावः। एवं तृतीयादिसमयेष्वा-चरमसमयं विशुद्धिपरिणामा एकैकखण्डं कृताः विशेषाधिकाः सन्ति। अत एव कारणात्पूर्वपूर्वसमयोऽप्रवृत्ता एव विशुद्धिपरिणामा उत्तरसमये भवन्तीत्यपूर्वकरणसंज्ञा युक्ता। तस्याङ्कसंदृष्टिः -

---

नहीं होता, फिर भी उन दोनों को छोड़कर अन्य सभी खण्डों का ऊपर तथा नीचे सादृश्य है, इसलिए अध:प्रवृत्तकरण कहने में विरोध नहीं आता। इस अध:प्रवृत्तकरण में प्रशस्त प्रकृतियों का अनुभाग प्रति समय अनन्तगुणा बढ़ता है तथा अप्रशस्त प्रकृतियों का अनुभाग प्रति समय अनन्तगुणा हीन होता है। संख्यात सहस्र स्थितिबन्धापसरण होते हैं तथा प्रति समय अनन्तगुणी वृद्धि के हिसाब से विशुद्धि होती है-ये चार आवश्यक होते हैं, किन्तु गुणश्रेणी निर्जरा, गुणसंक्रम, स्थितिकाण्डकघात तथा अनुभागकाण्डकघात, ये चार आवश्यक नहीं होते हैं; क्योंकि इनके कारण विशुद्धि-विशेषरूप परिणामों का अभाव है।

**२१४. अनिवृत्तिकरणम्**

ततः परमनिवृत्तिकरणप्रथमसमये नानाजीवानां विशुद्धिपरिणामोऽपूर्वकरणे चरमसमय-सर्वोत्कृष्टविशुद्धिपरिणामादनन्तगुणविशुद्धिर्जघन्यमध्यमोत्कृष्टविकल्पा-भावादेकादृश एव। द्वितीयसमयेऽपि प्रथमसमयविशुद्धेरनन्तगुणविशुद्धिर्नानाजीवा-नामेकादृश एव विशुद्धिपरिणामो भवति। एवं तृतीयादिसमयेष्वनिवृत्तिकरणचरमसमयं प्रतिसमयमनन्तगुणवृद्ध्या विशुद्ध्या वर्धमानोऽपि नानाजीवानां विशुद्धिपरिणामो जघन्यमध्यमोत्कृष्टविकल्परहित एकादृश एव भवति। अत एव कारणान्निवृत्तिभेदो जघन्यमध्यमोत्कृष्टविकल्पपरिणामस्य नास्तीत्यनिवृत्तिकरणसंज्ञा युक्ता।

---

**२१३. अपूर्वकरण**

इसके बाद अपूर्वकरण के प्रथम समय में गुणश्रेणि निर्जरा, गुणसंक्रम, स्थितिकाण्डकघात तथा अनुभागकाण्डकघात प्रारम्भ होते हैं। यहाँ भी जघन्य, मध्यम, उत्कृष्ट विशुद्धि परिणाम अध:प्रवृत्तकरण के परिणामों से असंख्यात लोक गुणे होते हैं। यहाँ प्रथम समयवर्ती नाना जीवों के विशुद्धि परिणाम असंख्यात लोकप्रमाण होते हैं। उनकी अंक संदृष्टि ४५६ है। ये सभी एक ही खण्ड से बहुत खण्डों की तरह होते हैं, क्योंकि ऊपर के समयवर्ती परिणामों के साथ सादृश्य का अभाव है।

द्वितीय समयवर्ती परिणाम विशेष अधिक होते हैं ४७२। ये भी एक ही खण्ड है। ऊपर और नीचे अधत्व के सादृश्य का अभाव होने से बहुत खण्ड नहीं होते। इसी प्रकार तृतीय आदि समयों में चरम समय पर्यन्त विशुद्धि परिणाम एक-एक खण्ड करके ही विशेष अधिक होते हैं। इसी कारण से पूर्व पूर्व समय में नहीं हुए अप्रवृत्त ही विशुद्धि परिणाम उत्तर समय में होते हैं, इसलिए अपूर्वकरण कहना उचित है। इसकी अंक संदृष्टि ऊपर दी है।

**२१४. अनिवृत्तिकरण**

इसके बाद अनिवृत्तिकरण के प्रथम समय में नाना जीवों के विशुद्धि परिणाम अपूर्वकरण में चरम समय सर्वोत्कृष्ट विशुद्धि परिणामों से अनन्तगुणे विशुद्ध जघन्य, मध्यम और उत्कृष्ट विकल्पों के न होने के कारण एक सदृश ही होते हैं। द्वितीय समय में भी प्रथम समय की विशुद्धि से अनन्तगुणी विशुद्धियुक्त नाना जीवों के विशुद्धि परिणाम एक सदृश ही होते हैं। इसी प्रकार तृतीय आदि समयों में अनिवृत्तिकरण के चरम समय पर्यन्त प्रति समय अनन्तगुणी वृद्धि युक्त विशुद्धि से बढ़ने वाले भी नाना जीवों के विशुद्धि परिणाम जघन्य, मध्यम और उत्कृष्ट विकल्प रहित एक सदृश ही होते हैं। इसी कारण से जघन्य, मध्यम और उत्कृष्ट परिणामों में निवृत्तिभेद नहीं है, इसलिए अनिवृत्तिकरण कहना उचित है।

**२१५. अनिवृत्तिकरणस्य विशेषः**

तस्यानिवृत्तिकरणस्य चरमसमये भव्यश्चातुर्गतिको मिथ्यादृष्टिः संज्ञी पंचेन्द्रियपर्याप्तो गर्भजो विशुद्धिवर्धमानः शुभलेश्यो जाग्रदवस्थितो ज्ञानोपयोगवान् अनन्तानुबन्धिक्रोधमानमाया-लोभान्मिथ्यात्व-सम्यग्मिथ्यात्वसम्यक्त्वप्रकृतिश्चोपशमय्य प्रथमोपशमसम्यक्त्वं गृह्णाति। तस्य कालो जघन्योत्कृष्टेनान्तर्मुहूर्तः।

**२१६. सासादननाम द्वितीयगुणस्थानम्**

तत्रैकसमयादारभ्य षडावलिसमयपर्यन्ते कालेऽवशिष्टे सति अनन्तानुबन्धिक्रोधमानमायालोभानां मध्येऽन्यतमस्य कषायस्योदये सति जीवः सम्यक्त्वं विराध्य यावन्मिथ्यात्वं प्राप्नोति तावत्सासादन-सम्यग्दृष्टिर्द्वितीयगुणस्थानवर्ती भवति।

**२१७. सासादनगुणस्थानस्य कालः**

तस्य कालो जघन्य एकसमय उत्कृष्टः षडावलिमात्रस्ततः परं नियमेन मिथ्यात्वप्रकृते-रुदयान्मिथ्यादृष्टिर्भवति।

**२१८. सम्यग्मिथ्यादृष्टि नाम तृतीयगुणस्थानम्**

सम्यङ्मिथ्यात्वप्रकृतेरर्हदुपदिष्टसन्मार्गे मिथ्यात्वादिकल्पितदुर्मार्गे च श्रद्धावान् जीवः सम्यग्मिथ्या-

---

**२१५. अनिवृत्तकरण का विशेष**

उन अनिवृत्तिकरण के चरम समय में भव्य चारों गतियों में से किसी भी गति में वर्तमान मिथ्यादृष्टि, संज्ञी, पंचेन्द्रिय, पर्याप्तक, गर्भज, जिसकी विशुद्धि बढ़ रही है, शुभ लेश्या वाला, जागृत, ज्ञानोपयोगवान्, अनन्तानुबन्धी क्रोध, मान, माया, लोभ, मिथ्यात्व, सम्यग्मिथ्यात्व तथा सम्यक्प्रकृति का उपशम करके प्रथमोपशम सम्यक्त्व को ग्रहण करता है। उसका जघन्य तथा उत्कृष्ट काल अन्तर्मुहूर्त है।

**२१६. सासादन नामक द्वितीय गुणस्थान**

उसमें से एक समय से लेकर षडावलि समय पर्यन्त काल शेष रहने पर अनन्तानुबन्धी क्रोध, मान, माया तथा लोभ में से किसी एक कषाय के उदय होने पर जीव सम्यक्त्व की विराधना करके जब तक मिथ्यात्व को प्राप्त होता है, तब तक सासादन सम्यग्दृष्टि नामक द्वितीय गुणस्थानवर्ती होता है।

**२१७. सासादन गुणस्थान का समय**

उसका जघन्य काल एक समय तथा उत्कृष्ट षडावलि मात्र है। उसके बाद नियम से मिथ्यात्व प्रकृति का उदय होने के कारण मिथ्यादृष्टि हो जाता है।

**२१८. सम्यग्मिथ्यादृष्टि नामक तृतीय गुणस्थान**

सम्यग्मिथ्यात्व प्रकृति के उदय से अर्हन्त द्वारा उपदिष्ट सन्मार्ग में तथा मिथ्यात्व आदि कल्पित

दृष्टिरिति तृतीयगुणस्थानवर्ती भवति।

**२१९. तृतीयगुणस्थानस्य स्थितिः**

तद्गुणस्थाने उत्तरगत्यायुर्बन्धो मरणं मारणान्तिकसमुद्घाताणुव्रतमहाव्रतग्रहणं च नास्ति। यदा म्रियते तदा सम्यक्त्वं मिथ्यात्वं वा प्रतिपद्य म्रियते सम्यग्मिथ्यात्वे न म्रियते। सम्यग्मिथ्यात्व-परिणामात्पूर्वस्मिन्सम्यक्त्वे वा मिथ्यात्वे वा परभवायुर्बन्धे तदेवासंयतसम्यग्दृष्टिगुणस्थानं वा मिथ्यादृष्टिगुणस्थानं वा प्राप्य म्रियत इत्यर्थः।

**२२०. असंयतसम्यग्दृष्टि नाम चतुर्थगुणस्थानम्**

औपशमिकसम्यक्त्वे वा क्षायिकसम्यक्त्वे वा वेदकसम्यक्त्वे वा वर्तमानो जीवोऽप्रत्याख्याना-वरणक्रोधमानमायालोभकषायोदयाद्द्वादशविधेऽसंयमे प्रवृत्तोऽसंयतसम्यग्दृष्टिरिति चतुर्थ-गुणस्थानवर्ती भवति।

**२२१. देशसंयमो नाम पञ्चमगुणस्थानम्**

द्वितीयकषायोदयाभावे जीवोऽणुगुणशिक्षाव्रतरूप एकादशनिलयविशिष्टे देशसंयमे वर्तमानः श्रावक इति पञ्चमगुणस्थानवर्ती भवति।

**२२२. प्रमत्तसंयतनाम षष्ठगुणस्थानम्**

---

दुर्मार्ग में श्रद्धान करने वाला जीव सम्यग्मिथ्यादृष्टि नामक तृतीय गुणस्थानवर्ती होता है।

**२१९. तृतीय गुणस्थान की स्थिति**

इस गुणस्थान में आगे की गति के लिए आयु बन्ध, मरण, मारणान्तिक समुद्घात तथा अणुव्रत या महाव्रत का ग्रहण नहीं होता। जब मरता है तो सम्यक्त्व अथवा मिथ्यात्व को प्राप्त करके मरता है। सम्यग्मिथ्यात्व में नहीं मरता अर्थात् सम्यग्मिथ्यात्व परिणाम से पहले सम्यक्त्व अथवा मिथ्यात्व में परभव की आयु का बन्ध होने पर उसी असंयत सम्यग्दृष्टि गुणस्थान अथवा मिथ्यादृष्टि गुणस्थान को प्राप्त करके मरता है।

**२२०. असंयत सम्यग्दृष्टि नामक चौथा गुणस्थान**

औपशमिक सम्यक्त्व, क्षायिकसम्यक्त्व अथवा वेदकसम्यक्त्व में वर्तमान जीव अप्रत्याख्यानावरण क्रोध, मान, माया तथा लोभ कषाय के उदय के कारण बारह प्रकार के असंयम में प्रवृत्त रहने से असंयत सम्यग्दृष्टि नामक चतुर्थ गुणस्थानवर्ती होता है।

**२२१. देशसंयम नामक पाँचवाँ गुणस्थान**

द्वितीय अर्थात् अप्रत्याख्यानावरण कषायों के अभाव में जीव अणुव्रत, गुणव्रत तथा शिक्षाव्रत रूप ग्यारह स्थान विशिष्ट देशसंयम में वर्तमान श्रावक पंचम गुणस्थानवर्ती होता है।

**२२२. प्रमत्तसंयत नामक छठा गुणस्थान**

प्रत्याख्यानावरणकषायोदयाभावे महाव्रतरूपं सकलसंयमं प्रतिपद्य संज्वलननोकषाय-मध्यमानुभागोदयात्पञ्चदशसु प्रमादेषु वर्तमानो जीवः प्रमत्तसंयत इति षष्ठगुणस्थानवर्ती भवति।

**२२३. अप्रमत्तसंयतनाम सप्तमगुणस्थानम्**

संज्वलनक्रोधमानमायालोभकषायमन्दानुभागोदयात्सकलहिंसादिनिवृत्तिरूपसंयमे प्रमादरहिते वर्तमानो जीवोऽप्रमत्तसंयत इति सप्तमगुणस्थानवर्ती भवति।

**२२४. सातिशयाप्रमत्तस्य लक्षणम्**

स एव यदा क्षपकोपशमकश्रेण्यारोहणं प्रत्यभिमुखो भवति तदा करणत्रयमध्येऽधःप्रवृत्तकरणं करोतीति स एव सातिशयाप्रमत्त इत्युच्यते।

**२२५. अपूर्वकरणो नामाष्टमगुणस्थानम्**

पुनः क्षपकश्रेणिमुपशमकश्रेणिं वा समारुह्य प्रतिसमयमनन्तगुणविशुद्ध्या वर्धमानो गुणश्रेणि-निर्जराद्यावश्यकानि कुर्वन्नुत्तरोत्तरसमयेषु पूर्वपूर्वसमयाप्राप्तानपूर्वानेव विशुद्धिपरिणामान् प्रतिपद्यमानो जीवः क्षपक उपशमको वापूर्वकरणसंयत इत्यष्टमगुणस्थानवर्ती भवति।

**२२६. अनिवृत्तिकरणनाम नवमगुणस्थानम्**

---

प्रत्याख्यानावरण कषायों के उदय के अभाव में महाव्रत रूप सकल संयम को प्राप्त करके संज्वलन नोकषाय के मध्यम अनुभाग के उदय के कारण पन्द्रह प्रमादों में वर्तमान जीव प्रमत्त संयत नामक छठे गुणस्थानवर्ती होता है।

**२२३. अप्रमत्तसंयत नामक सातवाँ गुणस्थान**

संज्वलन क्रोध, मान, माया तथा लोभ कषाय के मन्द अनुभाग के उदय से सकल हिंसा आदि निवृत्तिरूप प्रमाद रहित संयम में वर्तमान जीव अप्रमत्तसंयत नामक सप्तम गुणस्थानवर्ती होता है।

**२२४. सातिशय अप्रमत्तसंयत का लक्षण**

वही जब क्षपक या उपशम श्रेणी चढ़ने के अभिमुख होता है, तब तीन कारणों में से अधःप्रवृत्तकरण करता है, इसलिए वही सातिशय अप्रमत्त कहलाता है।

**२२५. अपूर्वकरण नामक आठवाँ गुणस्थान**

फिर क्षपकश्रेणी अथवा उपशम श्रेणी का आरोहण करके प्रतिसमय अनन्तगुणी विशुद्धि द्वारा बढ़ता हुआ गुणश्रेणी निर्जरा आदि आवश्यकों को करता हुआ उत्तरोत्तर समय में पूर्व-पूर्व समय में अप्राप्त अपूर्व ही विशुद्धि परिणामों को प्राप्त करके क्षपक अथवा उपशमक जीव अपूर्वकरण संयत नामक अष्टम गुणस्थानवर्ती होता है।

**२२६. अनिवृत्तिकरण नामक नवम गुणस्थान**

पुनरेकविंशतिचारित्रमोहनीयप्रकृतीः क्षपयन्नुपशमयंश्च प्रतिसमयं जघन्यमध्यमोत्कृष्टविकल्प-रहितनानाजीवानामेकं सदृशविशुद्धिपरिणामस्थानं प्रतिपद्यमानश्चानिवृत्तिकरणसंयत इति नवमगुणस्थानवर्ती भवति।

**२२७. सूक्ष्मसांपरायनाम दशमगुणस्थानम्**

पुनः सूक्ष्मत्व(कृ)ष्टिगतलोभानुभागोदयमनुभवन् चारित्रमोहनीयप्रकृतीः क्षयोपशमयन्प्रति-समयमनन्तगुणविशुद्ध्या वर्तमानः प्रशस्तध्यानपरिणतः सूक्ष्मसाम्परायेति दशमगुणस्थानवर्ती भवति।

**२२८. उपशान्तकषायनाम एकादशगुणस्थानम्**

एकविंशतिचारित्रमोहनीयप्रकृतीः समः निरवशेषमुपशमय्य यथाख्यातचारित्ररूप-विशुद्धि-विशेषपरिणतः कतकफलप्रयोगादधःकृताप्रसन्नतोयसदृश-विशुद्धिपरिणामः शुद्ध(शुक्ल)ध्याननिष्ठ उपशान्तकषाय-वीतरागछद्मस्थ इत्येकादशगुणस्थानवर्ती भवति।

**२२९. क्षीणकषायनाम द्वादशगुणस्थानम्**

समस्तमोहनीयप्रकृतीर्निरवशेषं निर्मूल्य स्फटिकभाजनगतप्रसन्नतोय-समविशुद्धान्तरङ्गो द्वितीय-शुक्लध्यानबलेन ज्ञानावरणीयदर्शनावरणीयान्तरायरूपघातित्रयं क्षपयन् परमार्थनिर्ग्रन्थः

---

इसके बाद चारित्रमोहनीय की इक्कीस प्रकृतियों का क्षय या उपशम करता हुआ प्रति समय जघन्य, मध्यम, उत्कृष्ट विकल्प रहित नाना जीवों के एक सदृश विशुद्धि परिणाम स्थान को प्राप्त कर अनिवृत्तिकरण संयत नामक नवम गुणस्थानवर्ती होता है।

**२२७. सूक्ष्मसांपराय नामक दशम गुणस्थान**

फिर सूक्ष्म कृष्टिगत लोभ के अनुभाग के उदय का अनुभव करता हुआ चारित्र मोहनीय की प्रकृतियों का क्षय या उपशम करता हुआ, प्रति समय अनन्तगुणी विशुद्धि में वर्तमान, प्रशस्त ध्यान परिणत, सूक्ष्मसांपराय नामक दशम गुणस्थानवर्ती होता है।

**२२८. उपशान्त कषाय नामक ग्यारहवाँ गुणस्थान**

चारित्रमोहनीय की इक्कीस प्रकृतियों का पूर्ण रूप से उपशमन करके यथाख्यात चारित्ररूप विशुद्धि विशेष परिणत कतक फल (निर्मली) के प्रयोग से नीचे बैठ गया है मैल जिसका ऐसे निर्मल जल के समान विशुद्ध परिणाम वाला शुक्ल ध्याननिष्ठ उपशान्त कषाय-वीतराग छद्मस्थ नामक ग्यारहवें गुणस्थानवर्ती होता है।

**२२९. क्षीणकषाय नामक बारहवाँ गुणस्थान**

मोहनीयकर्म की समस्त प्रकृतियों को सम्पूर्ण रूप से नष्ट करके स्फटिक पात्र में रखे स्वच्छ जल के समान विशुद्ध अन्तरंग वाला द्वितीय शुक्लध्यान के बल से ज्ञानावरणीय, दर्शनावरणीय तथा अन्तराय रूप तीन घातिया कर्मों का क्षय करता हुआ परम निर्ग्रन्थ क्षीणकषाय वीतराग छद्मस्थ

क्षीणकषायवीतरागछद्मस्थ इति द्वादशगुणस्थानवर्ती भवति।

**२३०. सयोगकेवलिनाम त्रयोदशगुणस्थानम्**

शुक्लध्यानाग्निनिर्दग्धघातिकर्मचतुष्टयेन्धनः प्रादुर्भूताचिन्त्यकेवल-ज्ञानदर्शनविशिष्टलोचन-द्वयावलोकितकालत्रयवर्तिसमस्तवस्तुसंभृतलोकालोकानन्त-सुखसुधारससंतृप्तोऽनन्तानन्त-वीर्यामितबलः सकलात्मप्रदेशेषु निचितविशुद्धचैतन्य-स्वभावस्तीर्थकरपुण्यविशेषोदयं संप्राप्ताष्ट-महाप्रातिहार्यचतुस्त्रिंशदतिशय-समवसरणविभूतिसंभावितकैवल्यकल्याणो दिवाकरकोटिबिम्ब-विडम्बितप्रभाभासुरप्रक्षीणतमः परमौदारिकदिव्यदेह इतरकेवली वा स्वयोग्यगन्धकुट्यादिविभूति-र्जगत्त्रयभव्यजनप्रबोधपारायणपरमदिव्यध्वनिश्शतेन्द्रवन्दितस्सयोगकेवलीति त्रयोदशगुणस्थानवर्ती भवति।

**२३१. अयोगकेवलिनाम चतुर्दशगुणस्थानम्**

पुनः स एव यद्यन्तर्मुहूर्तावशेषायुस्थितिस्ततोऽधिकशेषाघातिकर्मत्रय-स्थितिस्तदाष्टभिः समयैर्दण्ड-कपाटप्रतरलोकपूरणप्रसर्पणसंहारस्य समुद्घातं कृत्वान्तर्मुहूर्तावशेषितायुःस्थितिसमान-शेषाघातिकर्मस्थितिस्सन् सूक्ष्मक्रियाप्रतिपातिनाम-तृतीयशुक्लध्यानबलेन कायवाङ्मनोनिरोधं

---

नामक बारहवें गुणस्थानवर्ती होता है।

**२३०. सयोगकेवली नामक तेरहवाँ गुणस्थान**

शुक्लध्यान रूप अग्नि के द्वारा चार घातिया कर्मरूप ईन्धन के जल जाने से प्रकट हुए अचिन्त्य केवलज्ञान तथा केवलदर्शन रूप विशिष्ट नेत्रद्वय के द्वारा कालत्रयवर्ती समस्त वस्तु समूह से भरे हुए लोकालोक को देखने वाले, अनन्त सुखरूप सुधारस से संतृप्त, अनन्त वीर्यरूप अमित बलयुक्त, समस्त आत्म प्रदेशों में व्याप्त विशुद्ध चैतन्य स्वभाव, तीर्थंकर पुण्य विशेष के उदय से प्राप्त हुए अष्ट महाप्रातिहार्य, चौंतीस अतिशय, समवसरण विभूति के द्वारा मनाया गया है कैवल्य कल्याणक जिनका, करोड़ों सूर्यों के प्रतिबिम्ब को तिरस्कृत करने वाली प्रभा से देदीप्यमान परम औदारिक दिव्य देह से युक्त तीर्थंकर अथवा स्वयोग्य गन्धकुटी आदि विभूति से युक्त सामान्य केवली परम दिव्य-ध्वनि द्वारा तीनों लोकों के भव्य जनों को प्रबोध देने में तत्पर, सौ इन्द्रों के द्वारा वन्दनीय सयोगकेवली तेरहवें गुणस्थानवर्ती हैं।

**२३१. अयोगकेवली नामक चौदहवाँ गुणस्थान**

फिर वहीं (सयोगकेवली) यदि अन्तर्मुहूर्त आयु स्थिति शेष रहने पर उससे अधिक शेष तीन अघातिया कर्मों की स्थिति शेष रहती तो आठ समयों द्वारा दण्ड, कपाट, प्रतर, लोकपूरण प्रसर्पण पुनः प्रतर, कपाट और दण्डरूप संहार के द्वारा समुद्घात करके, अन्तर्मुहूर्त अवशिष्ट आयु स्थिति के समान शेष अघाति कर्मों की स्थिति होने पर सूक्ष्मक्रियाप्रतिपाती नामक तृतीय शुक्लध्यान के

कृत्वायोगकेवली भवति। यदि पूर्वमेव समस्थितिं कृत्वा अघातिचतुष्टयस्तदा समुद्घातक्रियया विना तृतीयशुक्लध्यानेन योगनिरोधं कृत्वायोगकेवली भवति।

**२३२. मुक्तावस्थायाः स्वरूपम्**

पुनः स एवायोगकेवली सकलशीलगुणसंपन्नो व्युपरतक्रियानिवृत्ति-नामचतुर्थशुक्लध्यानेन पञ्चलघ्वक्षरोच्चरणमात्रस्वगुणस्थानकालद्विचरमसमये देहादिद्वासप्ततिप्रकृतीः क्षपयित्वा पुनश्चरमसमये-एकतरवेदनीयादित्रयोदशकर्मप्रकृतीः क्षपयित्वा तदनन्तरसमये निष्कर्मा-शरीरस्सम्यक्त्वाद्यष्टगुण-पुष्टपरमशरीरात्किचिदून-पुरुषाकारविशुद्धिज्ञानदर्शनमयो जीवो घनस्वरूप ऊर्ध्वगमनस्वभावादेकस्मिन्नेव समये लोकाग्रं गत्वा सिद्धपरमेष्ठी सन्सर्वकालमनन्तसुखतृप्तः केवलज्ञानदर्शनद्वयनिर्मल-लोचनद्वयेन त्रिकालगोचरानन्तद्रव्यगुणपर्यायान् लोकालोको च जानन् पश्यन्नवतिष्ठते। लोकाद्बहिः सति सहकारिधर्मास्तिकायाभावान्न गच्छति। अत एव लोकालोक-विभागश्च। इति सकलकर्मप्रकृतिरहित-सिद्धात्मस्वरूपं प्राप्तुकामा भव्या अनवरतं परमागमाभ्यास-जनितनिर्मलसम्यग्दर्शनज्ञानचारित्रतपोभावनानिष्ठा भवन्तु।

---

बल से मन, वचन, काय का निरोध करके अयोगकेवली होता है। यदि पहले ही अघाति कर्मों की स्थिति आयुकर्म की स्थिति के बराबर होती है, तब समुद्घात क्रिया के बिना तृतीय शुक्लध्यान के द्वारा योग निरोध करके अयोगकेवली होता है।

**२३२. मुक्तावस्था का स्वरूप**

फिर वही अयोगकेवली समस्त शील गुण सम्पन्न व्युपरत क्रिया निवृत्ति नामक चतुर्थ शुक्लध्यान के द्वारा पाँच लघु अक्षरों के उच्चारण करने योग्य, अपने गुणस्थान काल के द्विचरम समय में देह आदि बहत्तर प्रकृतियों का क्षय करके फिर चरम समय में एकतर वेदनीय आदि तेरह कर्म प्रकृतियों का क्षय करके उसके अनन्तर समय में, निष्कर्म, अशरीर, सम्यक्त्व आदि अष्ट गुण युक्त, अन्तिम शरीर से कुछ न्यून, पुरुषाकार, विशुद्ध ज्ञान-दर्शनमय, घनस्वरूप जीव ऊर्ध्वगमन स्वभाव के कारण एक ही समय में लोक के अग्र भाग में जाकर सिद्ध परमेष्ठी होकर, अनन्तकाल तक अनन्त सुख से तृप्त केवलज्ञान तथा केवलदर्शनरूप निर्मल लोचन द्वय के द्वारा त्रिकाल गोचर अनन्त द्रव्य गुण पर्यायों को तथा लोक-अलोक को जानता-देखता अवस्थित रहता है। वह लोक के आगे, सहकारी धर्मास्तिकाय के न होने के कारण नहीं जाता और इसीलिए लोक तथा अलोक का विभाग है।

इस प्रकार समस्त कर्मप्रकृतियों से रहित सिद्धों के आत्मस्वरूप को प्राप्त करने के इच्छुक भव्य जीव निरन्तर परमागम के अभ्यास द्वारा उत्पन्न निर्मल सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र और सम्यक् तप की भावना से विशिष्ट हों।

**जयन्ति विधुताशेषपापाञ्जनसमुच्चयाः।**
**अनन्तानन्तधीर्दृष्टिसुखवीर्या जिनेश्वराः॥**

कृतिरियमभयचन्द्रसिद्धान्तचक्रवर्तिनः।

**इति कर्मप्रकृतिः।**

---

जिन्होंने समस्त पाप–मल के समूह को धो डाला है तथा अनन्त ज्ञान, अनन्त दर्शन, अनन्त सुख और अनन्त वीर्य को प्राप्त कर लिया है, वे जिनेन्द्रदेव जयवन्त हों।

यह कृति अभयचन्द्र सिद्धान्तचक्रवर्ती की है।

**कर्म प्रकृति समाप्त।**

# शब्दानुक्रम

श्री
अज्ञाताचार्य-प्रणीता

## द्वितीया कर्मप्रकृति-टीका

**गा० १—**अहं नेमिचन्द्रकविः प्रकृतिसमुत्कीर्त्तनं प्रकृतीनां ज्ञानावरणादिमूलोत्तरभेदयुक्तानां समुत्कीर्त्तनं कथनं विवरणं वोच्छं वक्ष्ये कथयिष्ये। किं कृत्वा ? सिरसा मस्तकेन नेमिं नेमिनाथतीर्थंकर स्वामिनं पणमिय प्रणम्य नमस्कृत्य। किंभूतं नेमिम् ? [गुणरयणविहूसणं] गुणाः अहिंसादयः, त एव रत्नानि, तान्येव विभूषणानि आभरणानि यस्य स गुण-[रत्नविभूषण-] स्तम्। [पुनः किंभूतम् ? महावीरं] महांश्चासौ वीरश्च महावीरस्तं महावीरम्। [पुनः किंभूतम् ? सम्मत्तरयणणिलयं] स्वस्वरूपलाभः सम्यक्त्वं सप्तप्रकृतिक्षयलक्षणं क्षायिकसम्यकत्वं वा, तदेव रत्नं तस्य निलयं स्थानं आश्रयस्तम्। अथवा किं कृत्वा? महावीरं प्रणम्य, महती विशिष्टा चासौ ई लक्ष्मीश्च तां राति ददातीति गृह्णातीति महावीरस्तम्, प्रणम्य। कीदृशं महावीरम् ? [नेमिम्] निजोद्भूतपुण्यमाहात्म्येन नागेन्द्र-नरेन्द्र-देवेन्द्रवन्द्यं निजपादारविन्दद्वन्द्वं नमयतीति नेमिः। यदि वा तीर्थक-रथ-प्रवर्तकपरत्वान्नेमिरिव नेमिः, चक्रधरः। एतादृशं महावीरम्। एतानि सर्वाणि विशेषणानि अस्यापि भवन्ति वीरपक्षे। नेमिनाथपक्षे नेमिचन्द्रं कविः प्रणम्य ॥१॥

**गा० २—वाक्यम्—**स्वभावो हि स्वभाववन्तमपेक्षत इति। कयोः स्वभावः ? जीवकर्मणोः। तत्र रागादिपरिणमनमात्मनः स्वभावः, रागाद्युत्पादकत्वं तु कर्मणः, तदितरेतराश्रयदोषः। इतरेतराश्रय-परिहारार्थमनयोः सम्बन्धः अनादिः। किंवत् ? कनकोपलवत् अनयोरस्तित्वं कथं सिद्धमित्युक्ते आह—स्वतः सिद्धमिति चेत् ? अहम्प्रत्ययवेद्यत्वेनात्मनोऽस्तित्वम्; एको दरिद्रः, एकः श्रीमान् इति विचित्र-परिणमनात्कर्मणोऽस्तित्वं सिद्धमिति। जीवंगाणं जीव अङ्गयोः। प्रकृतिः स्वभावः। [अणाइसंबंधो] अनादि संबन्धः प्रवर्तते। प्रकृतिः शीलं स्वभावमिति प्रकृतिपर्यायनामानि। स्वभावस्य किं लक्षणमिति चेत्—कारणान्तरनिरपेक्षत्वं स्वभावः। वा यथा जलस्य निम्नगमनं स्वभावः, यथाऽग्नेरूर्ध्वगमनं स्वभावः, यथा [वायोः] तिर्यग्गमनं स्वभावः। स च स्वभावः स्वभाववन्तं अपेक्षते वाञ्छते। स स्वभावः कयोः? जीवकर्मणोः। कयोरिव ? कनकोपलयोर्मलमिव। यथा कनकपाषाणे मलसम्बन्धः अनादिः वर्तते। इतरेतराश्रयदोषप्रसङ्गः स्यात् तत्परिहारार्थं निवारणार्थं अनयोः जीव-कर्मणोः सम्बन्धः अनादिः वर्तते [इत्युक्तम्] ॥२॥

**गा० ३—देहोदएण** औदारिक १ वैक्रियिक २ आहारक ३ तैजस ४ कार्मण ५ शरीरपञ्चकम्, तस्योदयेन[1] जीवः कर्म-नोकर्मपुद्गलवाणवः (लाणून्) आहरदि आकर्षति। विग्रहगतौ कहतां (गच्छतां) स्वकीयशरीरं त्यक्त्वा गत्यन्तरनैकरतांथकां (?) तेन शरीरत्रयेण ३ विना कर्मैवाऽऽकर्षति न तु नोकर्मकैः।

---

१. तत्र कार्मणनामोदयजनितयोगेन। (गो० क० टी०)

समयं-समयं प्रति इति प्रतिसमयं सर्वाङ्गैः सर्वात्मप्रदेशैः जगच्छ्रेणिघनप्रमितजीवप्रदेशैः स्वस्वसंज्ञं कर्म, नोकर्म आकर्षति। औदारिकवैक्रियिकाऽऽहारकशरीरवर्गणा नोकर्म उच्यते। [तत्तायस-पिंडउव्व जलं] अयसि भवं आयसम्। यथा आयसं तप्तलोहपिण्डः गोलकः सर्वात्मप्रदेशैः जलं आकर्षति गृह्णाति, तथा शरीरनामोदयेन सहितो जीवः कर्म नोकर्म प्रतिसमयं आहरतीत्यर्थः ॥३॥

**गा० ४**—सिद्धानां अनन्तिमभागं [2]समयप्रबद्धगणनां बध्नाति, अभव्यसिद्धेभ्यः अनन्तगुणं समयप्रबद्धं बध्नाति। योगवशात् मनोवचनकायात् विसदृशं बध्नाति।

वर्गः शक्तिसमूहोऽणोरणूनां वर्गणोदिता!
वर्गणानां समूहस्तु स्पर्धकः स्पर्धकापहैः॥

जीवो योगवशात् मनोवचनकाययोगात् समयप्रबद्धं समयं समयं प्रति बध्यते इति समयप्रबद्धः। [एवंभूतं] समयप्रबद्धं गृह्णातीति विशेषः। बंधदि बध्नाति। कीदृशम् ? सिद्धेभ्योऽनन्तिमभागं सिद्धराश्यनन्तैकभागम्। पुनः कीदृशम् ? अभव्यसिद्धादनन्तगुणं कर्म नोकर्म बध्नाति। कीदृशं समयप्रबद्धम्? विसदृशं नानाप्रकारं अनेकरूपं वा विसदृशं आयुर्वर्जितसप्तानां कर्मणां बन्धम् ॥४॥

**गा० ५**—अस्य जीवस्य समयप्रबद्धः जीर्णाति। [उ-] पयोगतः ज्ञानोपयोगतः दर्शनोपयोगतः [प्रयोगतः[3] ............अनेकसमयप्रबद्धं जीर्णाति] हीनो भवति द्व्यर्धगुणहानिमात्र-समयप्रबद्धः प्रतिसमयं सत्त्वं भवेत्। एकपल्यस्यासंख्याभागाः क्रियन्ते, तेषां मध्ये एकार्धभागस्य गुणहानिसंज्ञा ज्ञेया (?) ॥५॥

**गा० ६**—एकसामान्यापेक्षया कर्मत्वेन एकं कर्म। तु पुनः तत्कर्म द्विविधम्। पुद्गलानां ज्ञानावरणादीनां पिण्डसमूह; तत् द्रव्यकर्म। तच्छक्तिः रागादिपरिणामः, तत् भावकर्म ॥६॥

**गा० ७**—तत्कर्म पुनः अष्टविधं वा ८, अष्टचत्वारिंशच्छतं १४८ वा, असंख्यातलोकमात्रं वा। तेषां कर्मणां पुनः घाति इति संज्ञा, अघाति इति संज्ञा भवति। तत्कर्म ज्ञानावरणादिभेदेन अष्टविधं भवति। वा तत्कर्म प्रकृतिभावभेदेन अष्टचत्वारिंशच्छतं भवति। वा तत्कर्म असंख्यातलोकप्रमाणमिति समुच्चयार्थः। तेषां चाष्टविधानां पृथक् पृथक् घातिरिति, अघातिरिति च द्वे संज्ञे भवतः ॥७॥

**गा० ८**—ज्ञानावरणीयं दर्शनावरणीयं वेदनीयं मोहनीयं [आयुष्कं नाम गोत्रं] अन्तरायः [इति] अष्टौ मूलप्रकृतयः ज्ञातव्याः ॥८॥

**गा० ९**—ज्ञानावरणीयं दर्शनावरणीयं मोहनीयं अन्तराय एतानि चत्वारि घातिकर्माणि ज्ञातव्यानि। कस्मात्? जीवगुणघातनात्। तथा आयुर्नाम गोत्रं वेदनीयमिति अघातिकर्माणि[4] ज्ञातव्यानि ॥९॥

**गा० १०**—घाति-घातनात् दूरीकरणात् केवलज्ञानं केवलदर्शनं अनन्तवीर्यं क्षायिकसम्यक्त्वं

---

२. समये समये प्रबध्यते इति समयप्रबद्धः। (गो० क० टी०)। ३. सातिशयक्रियोपेतस्य आत्मनः सम्यक्त्वादिप्रवृत्तिलक्षणप्रयोगेन हेतुना एकादश [स्थानीय-] निर्जराविवक्षया अनेकसमयप्रबद्धो जीर्यते। (गो० क० टी०) ४. तथा जीवगुणघातकप्रकारेण न इत्यघातिसंज्ञानि। (गो० क० टी०)

चकारात् क्षायिकचारित्रं क्षायिकदान-लाभ-भोगोपभोगाः नव क्षायिकगुणा भवन्ति। मति-श्रुतावधि-मनः-पर्ययादय एते क्षायोपशमिकगुणाः। [क्षयात्] नाशनात् घातिघातनात् [क्षायिकगुणाः भवन्ति]। सर्वघातिस्पर्धकानां उदयाभावः क्षयः, तेषां सदवस्था उपशमः, देशघाति-स्पर्धकानां उदये सति क्षयोपशमः कथ्यते। [क्षयोपशमेन भवाः क्षायोपशमिकाः। मत्यादयः क्षायोपशमिकगुणाः कथ्यन्ते।] ॥१०॥

**गा० ११**—आयुःकर्मोदयः कर्मकृते मोहवर्धिते अनादियुक्ते एवंभूते संसारे चतुर्गतिषु जीवस्य अवस्थानं स्थितिं करोति। किंवत्? वर-हडिवत्। यथा हलिः छिद्रितकाष्ठविशेषः, हलिर्वा निगडः नरं पुरुषं अवस्थानं करोति; तथा आयुःकर्म जीवस्य संसारे स्थितिकारकं भवतीत्यर्थः। छिद्रवद्दारुविशेषः हलिरित्युच्यते ॥११॥

**गा० १२**—एतस्य नामकर्मणः त्रिनवतिप्रकृतयो भवन्ति। इदं तात्पर्यम्-तासु विषयेषु काश्चन प्रकृतयो जीवविपाकिन्यो भवन्ति, काश्चन प्रकृतयः पुद्गलविपाकिन्यः क्षेत्रविपाकिन्यो भवन्ति। चशब्दात् भवविपाकिन्यो भवन्ति। याः जीवविपाकिन्यः प्रकृतयः सन्ति, ताः अनेकप्रकारगत्यादिजीवभेदान् कुर्वन्ति। [याः पुद्गलविपाकिन्यः] प्रकृतयः सन्ति, ता औदारिकादिशरीर-संस्थान-संहननादिकानेकभेदान् कुर्वन्ति। याः क्षेत्रविपाकिन्यस्ताः वर्यानुपूर्वगतेः [चतस्रः आनुपूर्व्यः गतेः] सकाशात् अन्यत्र गत्यर्थाः। जीव-पुद्गल-[भव-] क्षेत्रविपाकिनामिति कथितम् ॥१२॥

**गा० १३**—सन्तानक्रमेण अनुक्रमेण परम्पराक्रमेण आगतजीवस्याचरणं गोत्रमिति सण्णा संज्ञा स्यात्। यत्र उच्चं चरणं भवेत्, तत्र उच्चं गोत्रम्; यत्र नीचं च भवति [तन्नीचगोत्रम्] ॥१३॥

**गा० १४**—अक्षाणां इन्द्रियाणां यदनुभवनं [५]अनुभूतिः तद्वेदनीयम्। यदिन्द्रियाणां सुखस्वरूपं तत्सातम्, यद्दुःखस्वरूपं तदसातम्। तत् सुख-दुःखं वेदयतीति वेदनीयम् ॥१४॥

**गा० १५**—अयं संसारी जीवः अर्थं पदार्थं पूर्वं दृष्ट्वा जानाति, पश्चात्, सप्तभङ्गीभिः वाणीभिः श्रद्दधाति, इत्यनेन प्रकारेण दर्शनं ज्ञानं सम्यक्त्वं च [जीव] गुणाः भवन्ति। चशब्दात् वीर्यमपि गृह्यते। स्यादस्ति १ स्यान्नास्ति २ स्यादस्तिनास्ति ३ स्यादवक्तव्यं ४ स्यादस्ति-अवक्तव्यं ५ स्यान्नास्ति-अवक्तव्यं ६ स्यादस्ति-नास्ति-अवक्तव्यं ७ इति सप्तभङ्गी वाणी भगवतः ॥१५॥

**गा० १६**—खु स्फुटं सप्तभङ्गं द्रव्यं सम्भवति। केन ? आदेशवशेन पूर्वसूरिकथनवशेन। ते सप्तभङ्गाः के इति चेदुच्यते-स्याच्छब्दः प्रत्येकं अभिसंबध्यते-स्यादस्ति १ स्यान्नास्ति २ स्यादस्तिनास्ति ३ स्यादवक्तव्यं ४ स्यादस्ति अवक्तव्यं ५ स्यान्नास्ति-अवक्तव्यं ६ स्यादस्ति-नास्त्यवक्तव्यम् ७ एते सप्त भङ्गाः ज्ञातव्याः। स्यात्कथंचित्प्रकारेण विवक्षितप्रकारेण स्वद्रव्यादिचतुष्टयापेक्षया द्रव्यमस्ति १। स्यान्नास्ति-स्यात्कथंचित्प्रकारेण परद्रव्यादिचतुष्टयापेक्षया नास्त्यर्थः २। स्यादस्तिनास्ति-स्यात्कथञ्चिद् विवक्षितप्रकारेण क्रमेण स्वपरद्रव्यादिचतुष्टयापेक्षया द्रव्यमस्तिनास्तीत्यर्थः ३। स्यादवक्तव्यम्-स्यात्कथञ्चिद् विवक्षितप्रकारेण

५. विषयावबोधम्। (गो० क० टी०)

युगपद् वक्तुमशक्यत्वात् 'क्रमप्रवर्त्तिनी भारती' इति वचनाद् युगपत् स्व-परद्रव्यादि-चतुष्टयापेक्षया द्रव्यमवक्तव्यमित्यर्थः ४। स्यादस्त्यवक्तव्यम्-स्यात्कथञ्चिद्विवक्षितप्रकारेण [स्वद्रव्यादि-चतुष्टयापेक्षया] जीवोऽस्तीति अवक्तव्यं द्रव्यापेक्षया इति ५। स्यान्नास्त्यवक्तव्यम्-स्यात्कथञ्चिद्विवक्षित-प्रकारेण परद्रव्यादिचतुष्टयापेक्षया युगपत् स्व-परद्रव्यादिचतुष्टयापेक्षया वा द्रव्यं नास्त्यवक्तव्यम् ६। स्यादस्तिनास्त्यवक्तव्यम्-स्यात्कथञ्चिद्विवक्षितप्रकारेण क्रमेण स्व परद्रव्यादिचतुष्टयापेक्षया युगपद्द्रव्यमस्ति नास्त्यवक्तव्यमित्यर्थः ७ ॥१६॥

**गा० १७**—अभ्यर्हित्वात् पूज्यत्वात् पूर्वं ज्ञानं भणितम्। ततो दर्शनं भवति, अतः सम्यक्त्वं भवति। वीर्यन्तु जीवाजीवेषु प्राप्तमिति हेतोः चरमे अन्ते पठितम् ॥१७॥

**गा० १८**—[घात्यपि] अन्तरायकर्म [अ-] घातिवद् ज्ञातव्यम्। कुतः ? निःशेषजीवगुणघातने अशक्यत्वात्, नाम-गोत्र-वेदनीय-निमित्तात् नाम-गोत्र-वेदनीयान्येव निमित्तं कारणं यस्य अन्तरायस्य; तस्मादघातिनां चरमे अन्ते पठितम् ॥१८॥

**गा० १९**—भवस्य संसारस्य आयुःकर्मबलेन स्थितिः भवति, नामकर्म आयुःपूर्वकं भवति। आयुः-कर्मपूर्वस्य नामकर्मणः। तत् पुनः गतिलक्षणभवं आश्रित्य नीचत्वं उच्चत्वं च गोत्रकर्मणः नामकर्मपूर्वकं कथितं नामकर्म पूर्वं यस्य गोत्रस्य तत् ॥१९॥

**गा० २०**—वेदनीयकर्म [अ-] घात्यपि मोहस्य कर्मणः बलेन उदयेन घातिवत् जीवस्य [गुणं] घातयति पीडयति इति हेतोः कारणात् घातिकर्मणां मध्ये मोहनीयस्यादौ वेदनीयं पठितम् ॥२०॥

**गा० २१**—अनुक्रमात् पतिं (पठितम्) इति पूर्वोक्तप्रकारेण सिद्धं पठितं कथितं वा ॥२१॥

**गा० २२**—एकस्मिन्नेकस्मिन् जीवप्रदेशे कर्मप्रदेशाः हु स्फुटं अन्तपरिहीना इति अनन्ता भवन्ति। एतेषां आत्म-कर्मप्रदेशानां सम्यक् [बन्धो] सम्बन्धो भवति। किंलक्षणो ज्ञातव्यः ? घननिविडभूतः- घनवत् लोहमुद्गरवन्निविडभूतः दृढतर इत्यर्थः ॥२२॥

**गा० २३**—जीवस्य विविधकर्मणा सह अनादिभूतः बन्धोऽस्ति। तस्य द्रव्यकर्मबन्धस्य [उदयेन] पुनः राग-द्वेषमयः भावः परिणामः जायते उत्पद्यते ॥२३॥

**गा० २४**—पुनरपि तेन राग-द्वेषमयेन भावेन अन्ये बहवः कर्मपुद्गलाः आत्मनः लगन्ति बन्धं प्राप्नुवन्ति। यथा घृतलिप्तगात्रस्य निविडा रेणवो लगन्ति तथा रागद्वेष क्रोधादिपरिणाम-स्निग्धावलिप्तात्मनः निघट (निविड) रजवो (रजसः रेणवो वा) लगन्ति इत्यर्थः ॥२४॥

**गा० २५**—'जीवे' इति शेषः। एकसमयेन यत्कर्म [बद्धं] तत्कर्म आयुकर्म विना ज्ञानावरणीय-दर्शनावरणीय-वेदनीय-मोहनीय-नाम-गोत्रान्तरायभेदैः सप्तप्रकारैः परिणमनं करोति बन्धं प्राप्नोति। च पुनः यद् बद्धं आयुकर्म तद्भुक्तायुःशेषेण भुज्यमानायुस्त्रिभाग-त्रिभागानुक्रमेण [बन्धं प्राप्नोति।] ॥२५॥

कर्मभूमितिर्यग्मनुष्यायुर्बन्धविधिः—

सुर-णिरया णर-तिरिये छमास [सिट्ठगे] सगाउस्स।
णर-तिरिया सव्वाउगतिभागसेसे तु कम्मस्स ॥१॥
संसारसभावाणं जीवाणं जीवियाउ वसुवारं।
६ ५ ६ १
गयदोभाग तिगेकं छप्पणछहइगि-तिभंगदलं ॥२॥
२ १ ८ ७ ७ २ ९ २ ४ ३
इगिवीससयसत्तासी सत्तसयगुणतीस वेसय तेदालं
८ १ २ ७ ९ ३ १
पुण इक्कासी कहियं सगवीसं णव तिण्णिमेगं च ॥३॥

२ ३ ४ ५ ६ ७ ८

६५६१÷३=, २१८७÷३=७२९÷३=२४३÷३=८१÷ =२७÷३=९÷३=३÷१।

अनेनानुक्रमेणायुः कर्म बन्धं याति–

**गा० २६**—स बन्धः सूत्रे अनादिनिधनद्वादशाङ्गवाण्यां निर्दिष्टः सूत्रनिर्दिष्टः भवति। स पूर्वोक्तः कर्मबन्धश्चतुर्भेदो ज्ञातव्यो भवति। स कथम्भूतः ? जिनागमे कथितः। ते चत्वारो भेदाः के ? प्रकृतिस्थित्यनुभाग-प्रदेशबन्धाः। अयं भेदः पुरा पूर्वोक्तगाथासु (?) कथितः।

प्रकृतिः परिणामः स्यात् स्थितिः कालावधारणं।
अनुभागो रसो ज्ञेयः प्रदेशो दलसंचयः ॥२६॥

**गा० २७**—पटो वस्त्रम्! प्रतिहारो द्वारपालः। असिः खड्गम्। मद्यम् [मदिरा] हडिः काष्ठ-विशेषः निगडः। चित्रम् चित्र वस्त्रं वा चित्रकारी पुरुषः कुलालः कुम्भकारः। भाण्डागारी कोषनियुक्तः पुमान्। यथा एतेषां भावाः, तथाविधानि कर्माणि ज्ञातव्यानि ॥२७॥

**गा० २८**—ज्ञानावरणं कर्म सूत्रनिर्दिष्टं पञ्चविधं भवति। दृष्टान्तमाह–यथा प्रतिमाया उपरि क्षिप्तं क्षेपितं प्रतिमोपरि क्षिप्तं कर्प्पटकं वस्त्रं आच्छादकं भवति ॥२८॥

**गा० २९**—पुनः दर्शनावरणं कर्म किं स्वभावम् ? यथा नृपद्वारे प्रतीहारः राजदर्शननिषेधको भवति, तथा दर्शनावरण-कर्म वस्तुदर्शननिषेधको भवति। तद्दर्शनावरणीयं कर्म नवप्रकारं स्फुटार्थवादिभिर्गणधरदेवैः सूत्रे सिद्धान्ते प्रोक्तम् ॥२९॥

**गा० ३०**—पुनः वेदनीयं कर्म द्विविधं भवति। कथम्भूतम् ? मधुलिप्तखड्गसदृशम्। तत्सातासातभेदप्राप्तं सत् जीवस्य सुख-दुःखं ददाति ॥३०॥

**गा० ३१**—मोहनीयकर्म आत्मानं मोहयति, यथा मदिरा पुरुषं मोहयति। [यथा वा मदनकोद्रवा पुरुषं मोहयन्ति।] तन्मोहनीयं कर्म अष्टाविंशतिभेदेन विभिन्नं जिनोपदेशेन ज्ञातव्यम् ॥३१॥

**गा० ३२**—आयुःकर्म चतुःप्रकारम्। किं लक्षणं आयुःकर्म ? नारकश्च तिर्यक् मनुष्यश्च सुरश्च ये तेषां गतिर्गमन पर्यायदायकम्। गम्यते यया सा गतिः, तस्याः गम्यं रोचनं (?) नारक-तिर्यङ्मनुष्यसुरगतिगं प्राप्तम्। कीदृशं आयुः ? हडिक्षिप्तपुरुषसदृशम्। पुनः कीदृशम् ? जीवानां भवधारणे समर्थं भवति ॥३२॥

**गा० ३३**—नामकर्म गति-जाति-शरीरादिकं त्रिनवतिसंख्यागणितम्। पुनस्तत् किम्भूतं नाम ? चित्रपटवत् विचित्रं भवति। पुनः किम्भूतं नामकर्म ? नानानामनि- [वर्तकं] उत्पादकं भवति ॥३३॥

**गा० ३४**—गोत्रकर्म कुलालसदृशं कुम्भकारतुल्यं वर्तते। कीदृशम् ? नीचोच्चकुलेषु उत्पादने दक्षं प्रवीणम्। घटरज्जनादिकरणे यथा कुम्भकारो निपुणः ॥३४॥

**गा० ३५**—यथा भाण्डागारिकः पुरुषः राजदत्तं धनं निवारयति तथा अन्तरायपञ्चक लब्धीनां निवारकं भवति ॥३५॥

**गा० ३६**—पञ्च नव द्वौ अष्टविंशतिः चत्वारि कर्माणि अनुक्रमेण त्रिनवतिः त्र्युत्तरशतं वा द्वे पञ्चकं उत्तरप्रकृतयो भवन्ति ॥३६॥

**गा० ३७**—आभिमुख-नियमितबोधनं आभिनिबोधकं भवति [तत्] अनिन्द्रियजं इन्द्रियजं बह्वादिअवग्रहादिककृतषट्त्रिंशद्-भेदम्। किंभूतं आभिनिबोधकमतिज्ञानम् ? अनिन्द्रियजं [मनोनिष्पन्नं] इन्द्रियजं पञ्चस्पर्शनादिकोत्पन्नम्। अवग्रहादिभेदाश्चत्वारः। अवग्रहः वस्तुदर्शनम्। ईहा तद्वस्तुज्ञातुमिच्छा। अवायः तद्वस्तुनिश्चयः। धारणा तद्वस्तुनः पुनरविस्मरणम्। एते भेदाः बहु १ अबहु २ बहुविध ३ अबहुविध ४ क्षिप्र ५ अक्षिप्र ६ निःसृत ७ अनिःसृत ८ उक्त ९ अनुक्त १० ध्रुव ११ अध्रुव १२ एतैः द्वादशभिः भेदैः गुण्यन्ते, तदा ४८ भेदा भवन्ति। पुनरेते भेदा पञ्चेन्द्रियैः मनसा च गुण्यन्ते, तदा अर्थावग्रहस्य २८८ भेदा भवन्ति। व्यञ्जनावग्रहस्य ४८ भवन्ति चक्षुर्मनोभेदरहितचतुरिन्द्रियैर्गुणिताः ४८ भेदा भवन्ति। एवं (२८८+४८=)३३६ भेदाः मतिज्ञानस्य भवन्ति। मतिज्ञानमावृणोतीति मतिज्ञानावरणीयम् ॥३७॥

**गा० ३८**—अर्थादर्थान्तरं येन उपलभ्यते तदाऽऽचार्याः श्रुतज्ञानं कथयन्ति। कीदृशं श्रुतज्ञानम् ? आभिनिबोधकपूर्वं श्रुतज्ञानं नियमेन शास्त्रप्रमुखं प्रधानम्। श्रुतज्ञानमावृणोतीति श्रुतज्ञानावरणीयम् ॥३८॥

**गा० ३९**—अवधीयते मर्यादीक्रियते इति अवधिः, सीमाज्ञानमिति वर्णितं समये सिद्धान्ते। एको भवप्रत्ययोऽवधिः, एकश्च गुणप्रत्ययः, इत्येतद्द्विविधमवधिज्ञानं यदवधिज्ञा इदं ब्रुवन्ति कथयन्ति। अवधिज्ञानमावृणोतीति अवधिज्ञानावरणीयम् ॥३९॥

**गा० ४०**—चिन्तितं अचिन्तितं वा अर्धं चिन्तितं वा अनेकभेदगतं [परमनसि स्थितमर्थं] यज्जानाति, तन्मनःपर्यय इति ज्ञानमुच्यते। तत्स्फुटं नरलोके मनुष्यक्षेत्रे सार्धद्वयद्वीपे एव [भवति] न तत्परमिति। मनःपर्ययज्ञानमावृणोतीति मनःपर्ययज्ञानावरणीयम् ॥४०॥

**गा० ४१**—सम्पूर्णं पुनः समग्रं केवलं असपत्नं शत्रुरहितं सर्वभावगतं लोकालोके वितिमिरं प्रकाशकं केवलज्ञानं मुणेयव्वं ज्ञातव्यम्। केवलज्ञानमावृणोतीति केवलज्ञानावरणीयम् ॥४१॥

**गा० ४२**—मति-श्रुतावधि-मनःपर्यय-केवलज्ञानानि एतेषां आवरणं मतिज्ञानावरणीयं १ श्रुत-ज्ञानावरणीयं २ अवधिज्ञानावरणीयं ३ मनःपर्ययज्ञानावरणीयं ४ केवलज्ञानावरणीयं ५ इति पञ्चविकल्पं

पञ्चप्रकारं ज्ञानावरणीयं कर्म जिनभणितं हे शिष्य, त्वं जानीहि ॥४२॥

**गा० ४३**—भावानामाकारं नैव कृत्वा अर्थात् पदार्थान् अविशेषयित्वा यत्सामान्यं ग्रहणं तत् समये सिद्धान्ते दर्शनमिति भण्यते ॥४३॥

**गा० ४४**—चक्षुषा नेत्रेण यत् प्रकाश्यते दृश्यते तच्चक्षुर्दर्शनं ब्रुवन्ति। शेषेन्द्रियाणां स्पर्शनादीनां प्रकाशः स अचक्षुर्दर्शनमिति ज्ञातव्यः। चक्षुर्दर्शनमावृणोतीति चक्षुर्दर्शनावरणीयम्। अचक्षुर्दर्शनमावृणोतीति अचक्षुर्दर्शनावरणीयम् ॥४४॥

**गा० ४५**—परमाण्वादि द्रव्यं अन्तिमस्कन्धं त्रैलोक्यस्कन्ध [पर्यन्तं] इति मूर्त्तिद्रव्याणि तानि यत्प्रत्यक्षं पश्यति तदवधिदर्शनमिति। अवधिदर्शनमावृणोतीति अवधिदर्शनावरणीयम् ॥४५॥

**गा० ४६**—बहुविध-बहुप्रकाराः उद्योताः चन्द्रसूर्याग्निरत्नप्रमुखाः परिमिते क्षेत्रे सार्धद्वयद्वीपे [भवन्ति]। यः केवलदर्शनोद्योतः स लोकालोकवितिमिरः। केवलदर्शनमावृणोतीति केवल-दर्शनावरणीयम् ॥४६॥

**गा० ४७**—एतेषां चक्षुरचक्षुरवधिकेवलालोकानां आवरणं दर्शनावरणीयं कर्म। इतः पञ्चनिद्रादर्शनावरणं प्रभणिष्यामः ॥४७॥

**गा० ४८**—अथ १. स्त्यानगृद्धिः २. निद्रानिद्रा ३. तथैव प्रचलाप्रचला ४. निद्रा ५. प्रचला च। एवं नवभेदं दर्शनावरणीयम् ॥४८॥

**गा० ४९**—स्त्यानगृद्धिनिद्रोदयेन उत्थापिते सत्यपि स्वपिति कर्म करोति जल्पति च। निद्रानिद्रोदयेन दृष्टिमुद्घाटयितुं न शक्नोति ॥४९॥

**गा० ५०**—प्रचलाप्रचलोदयेन [मुखात्] लाला वहन्ति अङ्गानि चलन्ति। निद्रोदये सति गच्छन् सन् तिष्ठति पुनः उपविशति पतति च ॥५०॥

**गा० ५१**—प्रचलोदयेन च जीवः ईषन्नेत्रे मीलयित्वा (उन्मील्य) स्वपिति सुप्तः सन् ईषदीषज्जानाति मुहुर्मुहुः मन्दं मन्दं स्वपिति ॥५१॥

**गा० ५२**—द्विविधं स्फुटं वेदनीयं सातमसातं वेदनीयमिति। पुनः द्विविकल्पं मोहं दर्शनमोहं चारित्रमोहमिति ॥५२॥

**गा० ५३**—बन्धादेकं मिथ्यात्वम् उदयं सत्तां प्रतीत्य आश्रित्य त्रिविधं स्फुटं दर्शनमोहं मिथ्यात्वं मिश्रं सम्यग्मिथ्यात्वं सम्यक्त्वप्रकृतिः इति त्वं जानीहि ॥५३॥

**गा० ५४**—यन्त्रेण कोद्रवः त्रिधा भवति प्रथमोपशमसम्यक्त्वभावयन्त्रेण मिथ्यात्वद्रव्यं त्रिधा भवति। कीदृशं? मिथ्यात्वद्रव्यं द्रव्यकर्मणः असंख्यातगुणहीनम्। मिथ्यात्वादसंख्यातगुणहीनं सम्यग्मिथ्यात्वं भवति सम्यग्मिथ्यात्वादसंख्यातगुणहीनं सम्यक्त्वप्रकृतिमिथ्यात्वं भवति ॥५४॥

**गा० ५५**—द्विविधं चारित्रमोहं कषायवेदनीयं नोकषायवेदनीयं चेति द्विविधम्। प्रथमं षोडशविकल्पम् द्वितीयं नवभेदं उद्दिष्टं कथितम् ॥५५॥

**गा० ५६**—अनन्तानुबन्धी अप्रत्याख्यानं प्रत्याख्यानं तथैव संज्वलनं क्रोधः मानः कापट्यं लोभः षोडश कषाया एते ॥५६॥

**गा० ५७**—शिला-पृथ्वीभेद-धूलि-जलराजिरेखासमानः क्रोधः नारकतिर्यङ्-मनुष्यामरगतिषु क्रमशः क्रमेण उत्पादकः ॥५७॥

**गा० ५८**—शिलाऽस्थि-काष्ठ-वेत्ररूपनिजभेदेन अनुहरन् अनुसरन् मानः नारक-तिर्यङ्-मनुष्य-देवगतिषु क्रमशः उत्पादकः ॥५८॥

**गा० ५९**—वेणुमूल-वंशमूल-उरभ्रशृङ्ग गोमूत्र-क्षुरप्रसदृशी माया नारक-तिर्यङ्-नरामरगतिषु जीवं क्षिपति ॥५९॥

**गा० ६०**—कृमिराग-चक्रमल-तनुमल-हरिद्रारागेन सदृशः लोभः नारक-तिर्यङ्-मनुष्य-देवेषु क्रमशः उत्पादकः ॥६०॥

**गा० ६१**—सम्यक्त्वं घातयति अनन्तानुबन्धी अप्रत्याख्यानं देशव्रतं घातयति प्रत्याख्यानं महाव्रतं घातयति संज्वलनं यथाख्यातचारित्रं घातयति। कषायाश्चत्वारः षोडश असंख्यात-लोक-परिमाणाः सन्ति ॥६१॥

**गा० ६२**—हास्यं रतिः अरतिः शोकः भयं जुगुप्सा घृणा स्त्रीवेदः पुंवेदः तथा षण्ढवेदः एते नव नोकषाया ईषत्कषायाः ॥६२॥

**गा० ६३**—छादयति स्वं आत्मानं दोषैः नियतो निश्चयात् छादयति परं अन्यं अपि दोषेण। छादनशीला यस्मात् तस्मात् सा वर्णिता कथिता स्त्री।

श्रोणिमार्दव-भीरुत्व-मुग्धत्व-क्लीवता-स्तनाः।
पुंस्कामेन समं सप्त लिङ्गानि स्त्रीनिवेदने॥१॥ ॥६३॥

**गा० ६४**—पुरुगुण-पुरुभोगान् शेते स्वामित्वेन प्रवर्तते, लोके पुरुः श्रेष्ठः गुणो यस्मिन्, तत् ईदृशं कर्म करोति, पुरुः उत्तमः, उत्तमे परमेष्ठिपदे शेते तिष्ठतीति पुरूत्तमः वा पुरुषोत्तमः यस्मात् तस्मात् स वर्णितः पुरुषः।

खरत्व-मेहन-स्तब्ध-शौण्डीर्य-श्मश्रु-धृष्टताः।
स्त्रीकामेन समं सप्तम लिङ्गानि नरवेदने ॥६४॥

**गा० ६५**—नैव स्त्री नैव पुमान् नपुंसकः उभयलिङ्गव्यतिरिक्तः रहितः इष्टाग्निसमानः वेदनागुरुः कलुषचित्तः।

यानि स्त्री-पुरुषलिङ्गानि पूर्वोक्तानि चतुर्दश।
सूक्तानि तानि मिश्राणि षण्ढभावनिवेदने॥३॥ ॥६५॥

**गा० ६६**—नारक-तिर्यङ्-नरामरलक्षणं आयुःकर्म चतुर्विधं भवेत्। नामकर्म द्वाचत्वारिंशत्प्रभं

पिण्डापिण्डभेदेन ॥६६॥

**गा० ६७—**नारक-तिर्यङ्-मनुष्य-देवगति इति गतिनामपिण्डप्रकृतिश्चतुर्धा वर्तते। एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियभेदेन जातिनामपिण्डप्रकृतिः पञ्चप्रकारा ॥६७॥

**गा० ६८—**औदारिक-वैक्रियिकाऽऽहारक-तैजस-कार्मणभेदेन शरीरनाम पञ्चविधम् [इति] तेषां शरीराणां विकल्पान् विजानीहि ॥६८॥

**गा० ६९—**त्रिके औदारिक-वैक्रियिकाऽऽहारके तैजसकार्मणाभ्यां कृतसंयोगे सति चतस्रः चतस्रः प्रकृतयो भवन्ति। तैजस-कार्मणेन कृतसंयोगे सति द्वे प्रकृती भवतः। कार्मणं कार्मणेन कृतसंयोगे सति एका प्रकृतिर्भवति। एवं शरीरस्य पञ्चदश भेदा भवन्ति। [तद्यथा—]

| | | | | |
|---|---|---|---|---|
| औ | औ औ | औ तै | औ का | औ तै का |
| वै | वै वै | वै तै | वै का | वै तै का |
| आ | आ आ | आ तै | आ का | आ तै का |
| तै | तै तै | तै का | | |
| का | का का | | | |

नामकर्मत्रिनवतिमध्ये पुनरुक्तशरीरपञ्चकं च विना शरीरदशकं मिलितं चेदेतानि [१०३] ॥६९॥

**गा० ७०—**पञ्च शरीरबन्धनं नामकर्म-औदारिकबन्धनं वैक्रियिकबन्धनं आहारकबन्धनं तैजस-बन्धनं कार्मणबन्धनं इति पञ्चविधं बन्धननामकर्म ॥७०॥

**गा० ७१—**पञ्चसंघातनामकर्म-औदारिकसंघातः वैक्रियिकसंघातः आहारकसंघातः तैजससंघातः कार्मणसंघातः इति पञ्च संघातनामकर्म ॥७१॥

**गा० ७२—**समचतुरस्रसंस्थानं न्यग्रोधसंस्थानं स्वातिकसंस्थानं कुब्जकसंस्थानं वामनसंस्थानं हुण्डकसंस्थानं इति संस्थानं षड्भेदं निर्दिष्टं जिनागमे जानीहि हे शिष्य ॥७२॥

**गा० ७३—**औदारिकाङ्गोपाङ्गं वैक्रियिकाङ्गोपाङ्गं आहारकाङ्गोपाङ्गं इति भणितं अङ्गोपाङ्गं त्रिविधं परमागमकुशलसाधुभिः ॥७३॥

**गा० ७४—**पादयोर्नालिके २ बाहू २ तथा नितम्बः ५ पृष्ठी ६ उरः शीर्षः मस्तकं ८ अष्टौ अङ्गानि देहे [भवन्ति] शेषाः उपाङ्गानि ॥७४॥

**गा० ७५-७६—**द्विविधं विहायो नाम-प्रशस्तगमनं अप्रशस्तगमनमिति नियमान्निश्चयात्।

वज्रर्षभनाराचसंहननं वज्रनाराचसंहननं नाराचसंहननं तथा अर्धनाराचसंहननं कीलकसंहननं असम्प्राप्ता-सृपाटिकासंहननमिति संहननं षड्विधं अनादिनिधनाऽऽर्षे भणितम् ॥७५-७६॥

**गा० ७७—**यस्य कर्मण उदये वज्रमयं अस्थि ऋषभं नाराचं तत् संहननं भणितं वज्रर्षभनाराचं नामेति ॥७७॥

**गा० ७८**—यस्योदये वज्रमयं अस्थि, नाराचं सामान्यं एव, तत्संहननं नाम्ना वज्रनाराचमिति ॥७८॥

**गा० ७९**—यस्योदये वज्रमयाः हड्डाः वज्ररहितं नाराचं ऋषभश्च तत् नाराचशरीरसंहननं भणितव्यम् ॥७९॥

**गा० ८०**—वज्रविशेषणरहितानि अस्थीनि अर्धनाराचं च यस्योदये [भवन्ति] तत् भणितं नाम्ना अर्धनाराचम् ॥८०॥

**गा० ८१**—यस्य कर्मण उदये वज्ररहितहड्डाः कीलिता इव दृढबन्धनाः भवन्ति, स्फुटं तत् कीलकनामसंहननम् ॥८१॥

**गा० ८२**—यस्य कर्मण उदये अन्योन्यासम्प्राप्तहड्डसन्धयः नरशिराबद्धाः भवन्ति, तत् स्फुटं असम्प्राप्तासृपाटिकसंहननं भवेत् ॥८२॥

**गा० ८३**—असृपाटिकेन गम्यते आदितश्चतुःकल्पयुगलान्तम्। ततः परं द्वियुगले द्वियुगले कीलकनाराचार्धनाराचान्ताः [गच्छन्ति] ॥८३॥

**गा० ८४**—ग्रैवेयकानुदिशानुत्तरविमानवासिषु यान्ति ते नियमात् त्रिद्विकैकसंहननाः नाराचादिकाः क्रमशः ॥८४॥

तेषां स्वर्गादिगमनरचनेयम्—

| नाम | कल्पसंख्या | संह. | जी. |
|---|---|---|---|
| अनु. | ५ | १ | पु. |
| अनुदि. | ९ | २ | पु. |
| ग्रैवे. | ९ | ३ | पु. |
| १६ स्वर्गपटलानि | १ १ | ४ | स्त्री. पु. |
| | १ १ | ४ | स्त्री. पु. |
| | १ १ | ५ | स्त्री. पु. |
| | १ १ | ५ | स्त्री. पु. |
| | १ १ | ६ | स्त्री. पु. |
| | १ १ | ६ | स्त्री. पु. |
| | १ १ | ६ | स्त्री. पु. |
| | १ १ | ६ | स्त्री. पु. |

**गा० ८५**—संज्ञी षट्संहननयुक्तः व्रजति गच्छति मेघान्तम्। ततः परं चापि असृपाटिकारहिताः पञ्च पञ्च–चतुरेकसंहननाः व्रजन्ति ॥८५॥

**गा० ८६**—घम्मा वंशा मेघा अञ्जना अरिष्टा तथैव ज्ञातव्या षष्ठी मघवी पृथ्वी, सप्तमी माघवी नाम ॥८६॥

एतासु गमनरचनेयम्—

| पृ. | संह. |
|---|---|
| घम्मा | ६ |
| वंशा | ६ |
| मेघा | ६ |
| अंज. | ५ |
| अरि. | ५ |
| मघ. | ४ |
| माघ. | १ |

**गा० ८७**—मिथ्यात्वापूर्वद्विकादिषु सप्त-चतुः-पञ्चस्थानेषु नियमेन प्रथमादिषट्त्र्येकगुणस्थानेषु ओघे। [अयमर्थः—] मिथ्यात्वादिसप्तगुणस्थानेषु षट्संहननयुक्ताः जीवा यान्ति। चतुर्षु उपशमश्रेणिषु वज्रर्षभनाराच-वज्रनाराच-नाराचसंहननानि यान्ति। पञ्चक्षपकेषु एको वज्रर्षभनाराचसंहनन एव गच्छति।

गुणस्थानेषु रचनेयम्—

| | संह. | संह. | संह. |
|---|---|---|---|
| | ६ | ३ | १ |
| | गुण. | गुण. | गुण. |
| गुणस्थानानि | १ | ८ | ८ |
| | २ | ९ | ९ |
| | ३ | १० | १० |
| | ४ | ११ | १२ |
| | ५ | | |
| | ६ | | १३ |
| | ७ | | |

आदेशे [मार्गणास्थानेषु] विशेषतो ज्ञेयानि ॥८७॥

**गा० ८८**—विकलचतुष्के द्वीन्द्रिये त्रीन्द्रिये चतुरिन्द्रिये असंज्ञि पञ्चेन्द्रिये च षष्ठं संहननं भवति। असंख्यातायुर्युक्तेषु जीवेषु प्रथमं संहननं भवति। [अवसर्पिण्याः] चतुर्थकाले षट्संहननानि भवन्ति।

पञ्चमकाले त्रीणि संहननानि भवन्ति। षष्ठे काले एकं [सृपाटिकं] संहननं भवति ॥८८॥

**गा० ८९**—सर्वविदेहेषु तथा विद्याधर-म्लेच्छमनुष्य-तिर्यक्षु षट् संहननानि भणितानि। नागेन्द्र-पर्वतात्परतः तिर्यक्षु षट् संहनानि सन्ति ॥८९॥

**गा० ९०**—अन्तिमत्रिकसंहनननानां उदयः पुनः कर्मभूमिस्त्रीणाम्। आदिमत्रिकसंहननानि तत्स्त्रीणां न सन्तीति जिनैर्निर्दिष्टं कथितम् ॥९०॥

**गा० ९१**—पञ्च च वर्णाः-श्वेतं पीतं हरितं रक्तं कृष्णं वर्णमिति। गन्धं द्विविधं लोके सुगन्ध-दुर्गन्धमिति जानीहि ॥९१॥

**गा० ९२**—तिक्तं कटुकं कषायमाम्लं मधुरमिति एतानि पञ्च रसनामानि। मृदु-कोमल-कर्कश-गरिष्ठ-लघु-शीतोष्ण-स्निग्ध-रूक्षाः एते अष्टौ स्पर्शाः ॥९२॥

**गा० ९३**—स्पर्शः अष्टविकल्पः। चतस्रः आनुपूर्व्यः अनुक्रमेण जानीहि-नरकगत्यानुपूर्वी तिर्यग्गत्यानुपूर्वी मनुष्यगत्यानुपूर्वी देवगत्यानुपूर्वी चेति ॥९३॥

**गा० ९४**—एताः चतुर्दश पिण्डप्रकृतयः वर्णिताः कथिताः संक्षेपेण। अतोऽग्रे अपिण्डप्रकृतयः अष्टाविंशतिं वर्णयिष्यामि कथयिष्यामि ॥९४॥

**गा० ९५**—अगुरुलघुकं उपघातं परघातं पुनः जानीहि उच्छ्वासं आतपं उद्योतं षट् प्रकृतयः अगुरुषट्कमिति ॥९५॥

**गा० ९६**—मूलोष्णप्रभः अग्निः आतपः भवति उष्णसंयुक्तप्रभः। आदित्ये तिरिश्च उष्णप्रभा रहित उद्योतः ॥९६॥

**गा० ९७**—त्रस-स्थावरं पुनः बादर-सूक्ष्मं पर्याप्तं तथा अपर्याप्तं प्रत्येकशरीरं पुनः साधारणशरीरं स्थिरं अस्थिरम् ॥९७॥

**गा० ९८**—शुभनाम अशुभनाम सुभगनाम दुर्भगनाम सुस्वरनाम दुःस्वरनाम तथैव ज्ञातव्याः आदेयनाम अनादेयनाम यशःकीर्तिनाम अयशस्कीर्त्तिनाम निर्माणनाम तीर्थकरनाम ॥९८॥

**गा० ९९**—त्रस-बादर-पर्याप्त-प्रत्येकशरीर-स्थिर-शुभ-सुभग-सुस्वर-आदेय-यशस्कीर्त्ति-निर्माण-तीर्थ-करमिति एताः त्रसद्वादशप्रकृतयः ॥९९॥

**गा० १००**—स्थावरं सूक्ष्मं अपर्याप्तं साधारणशरीरं अस्थिरं अशुभं दुर्भगं दुःस्वरं अनादेयं अयशस्कीर्तिः इति स्थावरदशकम् ॥१००॥

**गा० १०१**—इति नामप्रकृतयः त्रिनवतिः। उच्चं नीचं इति द्विविधं गोत्रकर्म भणितं कथितम्। पञ्चविधं अन्तरायकर्म ॥१०१॥

**गा० १०२**—तथा दानं लाभः भोगः उपभोगः वीर्यम्, एतेषु अन्तरायमिति पञ्चविधं ज्ञेयम्। इति सर्वोत्तरप्रकृतयः अष्टचत्वारिंशदधिकशतप्रमाः भवन्ति ॥१०२॥

**गा० १०३—**देहे अविनाभाविन्यः पञ्च बन्धनानि पञ्च संघाताः इति अबन्धोदयाः। वर्णचतुष्के अभिन्ने भेदरहिते गृहीते सति चतस्रः प्रकृतयो बन्धोदयाः सन्ति। यः येन विना न भवति स अविनाभावी इत्युच्यते। बन्धश्च उदयश्च बन्धोदयौ, न बन्धोदयौ यासां ताः अबन्धोदयाः। अष्टाविंशतिः प्रकृतयः बन्धेऽपि न उदयेऽपि न सन्ति ॥१०३॥

**गा० १०४—**वर्ण-रस-गन्ध-स्पर्शाः चत्वारः चत्वारः एकः सप्त सम्यग्मिथ्यात्वं भवन्ति। एताः अबन्धाः बन्धनानि पञ्च पञ्च संघाताः सम्यक्त्वप्रकृतिमिथ्यात्वम् ॥१०४॥

**गा० १०५—**पञ्च नव द्वे षड्विंशतिः चतस्रः क्रमेण सप्तषष्टिः द्वे पञ्च च भणिता एता बन्धप्रकृतयः ॥१०५॥

**गा० १०६—**पञ्च नव द्वे अष्टाविंशतिः चतस्रः क्रमेण सप्तषष्टिः द्वे पञ्च च भणिता एता उदय-प्रकृतयः ॥१०६॥

**गा० १०७—**भेदबन्धे षट्चत्वारिंशदधिकं शतम् १४६। अभेदबन्धे विंशत्यधिकं शतम् १२०। भेदोदये सर्वाः १४८ उदयरूपाः प्रकृतयः। द्वाविंशत्यधिकं शतं १२२ अभेदोदये ॥१०७॥

**गा० १०८—**क्रमेण ५। ९। २। २८। ४। ९३। २। ५ एताः सत्ताप्रकृतयः भणिताः ॥१०८॥

**गा० १०९—**केवलज्ञानावरणं दर्शनषट्कं-पञ्च निद्रा केवलदर्शनं-कषायद्वादशकं-अनं० ४ अप्र० ४ प्रत्या० ४ मिथ्यात्वं च सर्वघाति। सम्यग्मिथ्यात्वं अबन्धे [सर्वघाति] ॥१०९॥

**गा० ११०—**ज्ञानावरणचतुष्कं-म० श्रु० अ० म०-त्रीणि दर्शनानि सम्यक्त्वप्रकृतिः संज्वलनं ४ नव नोकषायाः अन्तरायाः ५ [एताः] २६ देशघातिन्यः ॥११०॥

**गा० १११-११२—**साता त्रीण्यायूंषि उच्चगोत्रं मनुष्यगतिः मनुष्यगत्यानुपूर्वी देवगतिः तदानुपूर्वी पञ्चेन्द्रियत्वं शरीराणि पञ्च बन्धनानि पञ्च संघाताः पञ्च अङ्गोपाङ्गानि [त्रीणि] वर्णचतुष्कं, समचतुरस्रसंस्थानं वज्रर्षभनाराचं उपघातोनागुरुषट्कं प्रशस्तविहायोगतिः त्रसद्वादशकं (त्रस-बादर-पर्याप्त-प्रत्येकशरीर-स्थिर-शुभ-सुभग-सुस्वरादेय-यशःकीर्त्तिनिर्माण-तीर्थकराणि) [भेदत] अष्टषष्टिः ६८। द्वाचत्वारिंशत् अभेदतः प्रशस्ताः पुण्यप्रकृतयः ॥१११-११२॥

**गा० ११३-११४—**घातीनि सर्वाण्यप्रशस्तान्येवेति तानि सप्तचत्वारिंशत्। नीचैर्गोत्रं असातवेदनीयं नरकायुष्यं नरकगति-तदानुपूर्व्ये तिर्यग्गति-तदानुपूर्व्ये एकेन्द्रियादिचतुर्जातयः न्यग्रोधपरिमण्डलादिपञ्च-संस्थानानि वज्रनाराचादिपंचसंहननानि अशुभवर्णगन्धरसस्पर्शाः उपघातः अप्रशस्तविहायोगतिः स्थावरदशकम् (स्थावर-सूक्ष्मापर्याप्त-साधारणास्थिराशुभ-दुर्भग-दुःस्वरानादेयायशः कीर्त्तयः) इत्येताः अप्रशस्ताः बन्धोदयौ प्रति क्रमेण भेदविवक्षायामष्टनवतिः शतं च भवन्ति। अभेदविवक्षायां द्वयाशीतिश्चतुरशीतिश्च भवन्ति ॥११३-११४॥

**गा० ११५—**अनन्तानुबन्धिनः सम्यक्त्वं घातयन्ति अप्रत्याख्यानकषायाः देशचारित्रं घातयन्ति

प्रत्याख्यानकषाया: सकलचारित्रं घातयन्ति संज्वलनकषाया: यथाख्यातचारित्रं घातयन्ति तेन गुणनामानो भवन्ति। अनन्तसंसारकारणत्वात् मिथ्यात्वमनन्तं तद् बध्नन्तीत्यनन्तानुबन्धिन:। अप्रत्याख्यानं ईषत्संयम:, तं कषन्तीति अप्रत्याख्यानकषाया:। प्रत्याख्यानं सकलसंयम: तं कषन्तीति प्रत्याख्यानकषाया:। सम् एकीभूय ज्वलन्ति संयमेन सहावस्थानात् संयमो वा ज्वलत्येषु सत्स्वपीति संज्वलना: त एव यथाख्यातं कषन्तीति संज्वलनकषाया:। एवं शेषनोकषायज्ञानावरणादीन्यप्यन्वर्थसंज्ञानि भवन्ति ॥११५॥

**गा० ११६—**उदयाभावेऽपि तत्संस्कारकालो वासनाकाल:। स च संज्वलनानामन्तर्मुहूर्त्त: प्रत्याख्यानावरणानामेकपक्ष: अप्रत्याख्यानावरणानां षण्मासा: अनन्तानुबन्धिनां संख्यातभवोऽसंख्यात-भवोऽनन्तभवो वा भवति नियमेन ॥११६॥

**गा० ११७—**देहादि-स्पर्शान्ता: ५० पञ्चशरीर-पञ्चबन्धन-पञ्चसंघात-षट्संस्थान-त्र्यङ्गोपाङ्ग-षट्संहनन-पञ्चवर्ण-द्विगन्ध-पञ्चरस-स्पर्शाष्टकमिति पञ्चाशत निर्माणं आतपोद्योतौ स्थिरास्थिर-शुभाशुभ-प्रत्येकसाधारणानि अगुरुलघूपघातपरघाताश्चेति द्वाषष्टि: पुद्गलविपाकीनि भवन्ति पुद्गले एव एषां विपाकित्वात् ॥११७॥

**गा० ११८—**चत्वारि आयूंषि भवविपाकीनि चतस्र: आनुपूर्व्य: क्षेत्रविपाकिन्य: अवशिष्टा: अष्टसप्तति: जीवविपाकिन्य: नरकादि जीवपर्यायनिर्वर्तनहेतुत्वात् ॥११८॥

**गा० ११९—**वेदनीयद्वयं गोत्रद्वयं घातिसप्तचत्वारिंशत् नामसप्तविंशतिश्चेति अष्टसप्तति-र्जीवविपाकिन्य: प्रकृतय: ॥११९॥

**गा० १२०—**तीर्थङ्करं उच्छ्वास: बादर-सूक्ष्म-पर्याप्तापर्याप्त-सुस्वरदु:स्वरादेयानादेय-यश:कीर्त्य-यश:कीर्त्ति-त्रसस्थावर-प्रशस्ताप्रशस्तविहायोगति-सुभग-दुर्भग-चतुर्गतय: पञ्च जातयश्चेति सप्तविंशति: नामप्रकृतय: जीवविपाकिन्य: ॥१२०॥

**गा० १२१—**चतुर्गतय: पञ्चजातय: उच्छ्वास: विहायोगति-त्रस-बादर-पर्याप्तयुगलानि सुभग-सुस्वरादेय-यश:कीर्त्तियुगलानि तीर्थकरं चेत्यथवा नाम सप्तविंशति: ॥१२१॥

**गा० १२२—**उत्कृष्ट: स्थितिबन्ध: कोटीकोटिसागरोपमाणि ज्ञान-दर्शनावरणान्तरायवेदनीयेषु त्रिंशत्। नाम-गोत्रयो: विंशति:। मोहनीये सप्तति:। आयुषि शुद्धानि कोटीकोटिविशेषणरहितानि सागरोपमाण्येव त्रयस्त्रिंशत्। अत्र शुद्धविशेषणं कोटीकोटिव्यवच्छेदार्थम् ॥१२२॥

**गा० १२३—**उत्कृष्टस्थितिबन्ध: असातवेदनीय-ज्ञान-दर्शनावरणान्तरायविंशते: ओघ: मूलप्रकृतिवत्-त्रिंशत्कोटीकोटिसागरोपमाणि। सातावेदनीय-स्त्रीवेद-मनुष्यद्विकेषु तदर्धम्-पञ्चदश-कोटीकोटिसागरोपमाणि। दर्शनमोहे-मिथ्यात्वे बन्धे एकविधत्वात् तत्र सप्ततिकोटीकोटिसागरोपमाणि। चारित्रमोहनीय-षोडशकषायेषु चत्वारिंशत्कोटीकोटिसागरोपमाणि ॥१२३॥

**गा० १२४—**संस्थान-संहननानां चरमसंस्थान-संहननस्य मूलप्रकृतिवद् विंशतिकोटि-

कोटिसागरोपमाणि। शेषसंस्थान-संहनननानां समचतुरस्रसंस्थान-वज्रवृषभनाराचसंहननपर्यन्तं द्वि-द्विकोटिसागरोपमविहीन ओघः। विकलत्रयाणां सूक्ष्मत्रयाणां चाष्टादशकोटिकोटिसागरोपमाणि ॥१२४॥

**गा॰ १२५-१२६—**अरति-शोक-षण्ढवेद-तिर्यग्द्विक-भयद्विक-नरकद्विक-तैजस-द्विकौदारिक-द्विक-वैक्रियिकद्विकातपद्विक-नीचैर्गोत्र-त्रसचतुष्क-वर्णचतुष्का-गुरुलघुचतुष्केकेन्द्रिय-पञ्चेन्द्रिय-स्थावर-निर्माणासद्गमना-स्थिरषट्कानां विंशतिकोटीकोटिसागरोपमाणि ॥१२५॥

**गा॰ १२७—**हास्य-रत्युच्चैर्गोत्र-पुंवेद-स्थिरषट्क-प्रशस्तगमन-देवद्विकानां तस्यार्धं दश-कोटीकोटिसागरोपमाणि। आहारकद्वय-तीर्थकृतोः अन्तःकोटीकोटिसागरोपमाणि ॥१२७॥

**गा॰ १२८—**सुर-नरकायुषोः ओघः त्रयस्त्रिंशत्सागरोपमाणि। तिर्यङ्मनुष्यायुषोः त्रीणि पल्योपमानि। अयमुत्कृष्टस्थितिबन्धः संज्ञिपर्याप्तस्यैव असंज्ञ्यन्तानामग्रे प्ररूपणात्। योग्ये इत्यनेन अयं संसार-कारणत्वादशुभत्वात् शुभाशुभकर्मणां चातुर्गतिकसंक्लिष्टैरेव बध्यत इत्यर्थः ॥१२८॥

**गा॰ १२९—**आयुस्त्रयवर्जितशुभाशुभप्रकृतीनां उत्कृष्टस्थितिकारणं संक्लेश एवेत्याह-तु पुनः तिर्यङ्मनुष्य-देवायुर्वर्जितसर्वप्रकृतिस्थितीनां उत्कृष्टस्थितिबन्ध उत्कृष्टसंक्लेशेन भवति। तु पुनः तासां जघन्यस्थितिबन्ध उत्कृष्टविशुद्धिपरिणामेन भवति। तत्त्रयस्य तु उत्कृष्टं उत्कृष्टविशुद्धिपरिणामेन जघन्यः तद्विपरीतेन भवति ॥१२९॥

**गा॰ १३०—**आहारकद्विकं तीर्थं देवायुश्चेति चत्वारि मुक्त्वा ११६ प्रकृतिसर्वोत्कृष्टस्थितीनां मिथ्यादृष्टिरेव बन्धको भणितः। तच्चतुर्णां तु सम्यग्दृष्टिरेव ॥१३०॥ तत्रापि विशेषमाह—

**गा॰ १३१—**देवायुः उत्कृष्टस्थितिकं प्रमत्त एवाप्रमत्तगुणस्थानाभिमुखो बध्नाति अप्रमत्ते तद्व्युच्छित्तावपि तत्र सातिशये तीव्रविशुद्धत्वेन तदबन्धात्, निरतिशये च तदुत्कृष्टासम्भवात्। तु पुनः आहारकद्वयं उत्कृष्टस्थितिकं अप्रमत्तः प्रमत्तगुणस्थानाभिमुखः संक्लिष्ट एव बध्नाति, आयुस्त्रयवर्जितानां उत्कृष्टस्थितेः उत्कृष्टसंक्लेशेन इत्युक्तत्वात्। तीर्थकरं उत्कृष्टस्थितिकं नरकगतिगमनाभिमुखमनुष्यासंयत-सम्यग्दृष्टिरेव बध्नाति ॥१३१॥

शेषाणां ११६ उत्कृष्टस्थितिबन्धकमिथ्यादृष्टीनां गाथाद्वयेनाह—

**गा॰ १३२-१३३—**नरक-तिर्यङ्-मनुष्यायूंषि वैक्रियिकषट्कं विकलत्रयं सूक्ष्मत्रयं चोत्कृष्ट-स्थितिकानि नराः तिर्यञ्चश्च बध्नन्ति, औदारिकद्वयं तिर्यग्द्वयोद्योतासम्प्राप्तासृपाटिकसंहनननानि सुर-नारका एव, एकेन्द्रियातप-स्थावराणि पुनः देवाः, शेषद्वानवति उत्कृष्टसंक्लिष्टा ईषन्मध्यमसंक्लिष्टाश्च चातुर्गतिकाः। उक्कस्सट्ठिदिबंधपाओग्ग-असंखेज्जलोगपरिणामाणं पलिदोवमस्स असंखेज्जभागमेत्ताणि खंडाणि कादूण तत्थ चरमखंडस्स उक्कस्ससंकिलेसो णाम, पढमखंडस्स ईसिसंकिलेसो णाम, दोण्हं विच्चालखंडाणं मज्झिमसंकिलेसो णामेत्ति उच्चदि ॥१३२-१३३॥

**गा॰ १३४—**जघन्यस्थितिबन्धो वेदनीये द्वादश मुहूर्त्ताः, नाम-गोत्रयोरष्टौ शेषपञ्चानां तु पुनः

एकैकोऽन्त-र्मुहूर्त्तः ॥१३४॥

**गा० १३५**—लोभस्य सूक्ष्मसाम्परायबन्धसप्तदशानां च जघन्यस्थितिबन्धः मूलप्रकृतिवद् भवति क्रोधस्य द्वौ मासौ मानस्य एकमासः मायाया अर्धमासः पुंवेदस्य अष्टवर्षाणि ॥१३५॥

**गा० १३६**—तीर्थकराहाकद्विकयोरन्तःकोटीकोटिसागरोपमाणि। अयं जघन्यस्थितिबन्धः सर्वोऽपि क्षपकेषु स्व-स्वबन्धव्युच्छित्तिकाले एव नियमाद् भवति। तद्यथा-आसां तीर्थकराहारक-शरीराहारकाङ्गोपाङ्गानां बन्धविच्छित्ति-स्थानं अष्टमगुणस्थानकषष्ठमभागः तत्र जघन्यस्थितिबन्धः। दशमगुणस्थाने लोभस्य जघन्यस्थितिबन्धः अन्तर्मुहूर्त-कालः। सूक्ष्मसाम्पराये ज्ञानावरणपञ्चकं ५ अन्तरायपञ्चकं ५ चक्षुरादिदर्शनचतुष्कं ४ एतासां चतुर्दशप्रकृतीनां अन्तर्मुहूर्त्तकालः जघन्यस्थितिबन्धः। तथा सूक्ष्मसाम्पराये यशस्कीर्त्तिरुच्चगोत्रयोरष्टौ मुहूर्ता जघन्यस्थितिबन्धः सातावेदनीयस्य जघन्यस्थितिबन्धः द्वादश मुहूर्ताः ॥१३६॥

**गा० १३७**—नर-तिर्यगायुषोर्जघन्यस्थितिबन्धोऽन्तर्मुहूर्त्तो भवति सुर-नारकायुषोः दशसहस्र-वर्षाणि ॥१३७॥

**गा० १३८**—उक्ताभ्यः २९ शेषप्रकृतीनां ९१ मध्ये वैक्रियिकषट्क-मिथ्यात्वरहितानां ८४ जघन्यस्थितिं बादरैकेन्द्रियपर्याप्तः तद्योग्यविशुद्ध एव बध्नाति स्व-स्वोत्कृष्टप्रतिभागेन त्रैराशिकविधाने नेत्यर्थः ॥१३८॥

**गा० १३९**—एकेन्द्रिया मिथ्यात्वोत्कृष्टस्थितिमेकसागरोपमां बध्नन्ति द्वीन्द्रियाः पञ्चविंशति-सागरोपमाणि त्रीन्द्रियाः पञ्चाशत्सागरोपमाणि चतुरिन्द्रियाः शतसागरोपमाणि असंज्ञिनः सहस्रसागरोपमाणि, संज्ञिनः पर्याप्ता एव सप्ततिकोटीकोटिसागरोपमाणि। तज्जघन्यस्तु एकेन्द्रिय-द्वीन्द्रियादीनां स्व-स्वोत्कृष्टात् पल्यासंख्येय-पल्यसंख्येयभागोनक्रमो भवति ॥१३९॥

